ISSN-22776445

# विद्यारश्मिः

राष्ट्रियवार्षिकशोधपत्रिका-2018

## आचार्यरामानुजदेवनाथस्मृतिविशेषाङ्कः



राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)

NAAC द्वारा A श्रेण्यां प्रत्यायितम्

भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम्

क.जे.सोमैयासंस्कृतविद्यापीठम्, विद्याविहारः, मुम्बई-77

ISSN-22776445

# विद्यारश्मिः

## राष्ट्रियवार्षिकशोधपत्रिका-2017-18

# आचार्यरामानुजदेवनाथस्मृतिविशेषाङ्कः

वेदर्चामर्चयन्तस्स्मृतिचयवचनं तत्त्वतश्चर्चयन्तः
शास्त्रान्तःसंस्पृशन्तोऽमृतगतिमतिदं दर्शनं दर्शयन्तः।
साहित्यं स्वादयन्तस्सहृदयवसतौ भासमुद्भासयन्तो
विद्याया रश्मयो ज्ञान् पिपुरतु सुधियां शेमुषीमेषयन्तः॥

**प्रधानसम्पादकः**

प्रो. सुदेशकुमारशर्मा, प्राचार्यः

**सम्पादकमण्डलम्**

प्रो. प्रकाशचन्द्रः    प्रो. ई. एम्. राजन्    प्रो. मदनमोहनझाः

प्रो. बोधकुमारझाः    डा. नारायणन् ई. आर्.

डा. वी. एस्. वी. भास्कररेड्डी    डा. (श्रीमती) गीतादुबे

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)

NAAC द्वारा A श्रेण्यां प्रमाणितम्

(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)

क. जे. सोमैयासंस्कृतविद्यापीठम्

विद्याविहारः, मुम्बई-400077

**विद्यारश्मिः** **ISSN-22776445**

**© प्रकाशकाधीनम्** **UGC Reg. No. 40920**

**प्रकाशकम् राष्ट्रियसंस्कृतसंस्थानम्**

प्राकानवर्षम् 201 8

अङ्कः षष्ठः

प्रधानसम्पादकः प्रो. सुदेशकुमारशर्मा, प्राचार्यः

सम्पादकमण्डलम् प्रो. प्रकाशचन्द्रः

प्रो. ई. एम्. राजन्

प्रो. मदनमोहनझाः

प्रो. बोधकुमारझाः

डा. नारायणन् ई. आर्.

डा. वी. एस्. वी. भास्कररेड्डी

डा. (श्रीमती) गीतादुबे

पत्रिकाप्रतिरूपाणि 350

मुद्रकः BG&K Associates, Lower Parel, Mumbai-13

अवधातव्यम् पत्रिकायाममुष्यां प्रकाशितलेखानां मौलिकत्वस्य तत्रत्यप्रतिपादितविचारस्य च कृते समग्रमुत्तरदायित्वं पत्रलेखकानामेव, न तु प्रकाशकस्य, सम्पादकस्य वेति स्पष्टं विज्ञप्यते।

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)

NAAC द्वारा A श्रेण्यां प्रमाणितम्

(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)

क. जे. सोमैयासंस्कृतविद्यापीठम्

विद्याविहारः, मुम्बई-400077

आचार्यः ए. पि. सच्चिदानन्दः
प्राचार्यः (प्र)
राष्ट्रियसंस्कृतसंस्थानम्,
(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः, शृङ्गेरी – 577 139

Prof. A. P. Sachidananda
Principal (I/C)
RASHTRIYA SANSKRIT SANSTHAN
(Deemed University under MHRD Govt. of India)
Rajiv Gandhi Campus, Sringeri - 577 139

# सहते किन्नु वियोगमीदृशम्

वन्दे तं प्रियदर्शनं मुहरहं विद्यानिधिं सज्जनम्
श्रीवत्साङ्कगुरोःप्रियं वसुमतेर्नाथं सतां सम्मतम् ।
पाण्डित्येऽप्रतिमं कृतौ पटुतरं शीलेऽनुशील्यं सदा
औदार्ये खलु पाकशासननिभं तं देवनाथं हृदा ॥१॥

शिक्षाशास्त्रविचक्षणं कविवरं व्याख्यानविद्याग्रणीं
कृत्स्नव्याकरणादिशास्त्रनिपुणं विज्ञानविद्योतनं ।
शिष्याणां सुखदं प्रशासनपटुं सद्ग्रन्थलेखोत्सुकम्
स्वल्पे ह्यायुषि साधिताखिलकृतिं संस्तौति लोकश्चिरम् ॥२॥

वाग्देव्याः समुपासनेन निखिलैः सम्मानितः पण्डितः
शिक्षारत्नपुरस्कृतः पुनरयं ब्रह्मर्षिनाम्ना स्तुतः ।
विद्यायान्तु बृहस्पतिः सुमहितः सच्छास्त्रविद्वन्मणिः
भूयोऽसौ बहुमानितो विजयतां, श्रीदेवनाथः सुधीः ॥३॥

गैर्वाणीं परिरक्षितुं परिसरे राजीवगान्ध्याह्वये
छात्रप्राज्ञसमूहमण्डितपदे दैवात्समाप्नोदसौ ।
यस्यैवागमनेन नूनमखिलं वृद्धिं गतं प्रत्यहं
तं प्राज्ञन्त्विह देवनाथविबुधं वन्दामहे सात्त्विकम् ॥४॥

मुदिता वसुधा समीहितं निजनाथं समवाप्य संस्कृतम् ।
ग्रसितं विधिना निरीक्ष्य सा सहते किन्नु वियोगमीदृशम् ॥५॥

भुवमेत्य समर्च्य वाङ्मयं कृतपुण्यैरवधूतकिल्बिषम्
गतमेनमवेत्य भारती सहते किन्नु वियोगमीदृशम् ॥६॥

ए. पी. सच्चिदानन्दः
ए. पि. सच्चिदानन्दः

राष्ट्रहिताय संस्कृतम्
प्रा. श्रीनिवास वरखेडी
कुलगुरुः
Prof. Shrinivasa Varakhedi
Vice-Chancellor

# कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

रामटेकनगरम् (महाराष्ट्रराज्यम्)

# Kavikulaguru Kalidas Sanskrit University

Ramtek (Maharashtra)

Established Government of Maharashtra Accredited by NAAC with'B" Grade

जा. क्र. ककासंवि/व्हीसीओ/2018/49

दिनांक :- 14.02.2018

**देवनाथविभूतौ श्रद्धाञ्जलिः**

यद्यद् विभूतिवत् सत्त्वं श्रीमद् ऊर्जितमेव वा।
तत्तद्देवावगच्छ त्वं मम तेजोंऽशसम्भवम्।।
— भगवद्गीता

कीर्तिकायस्य आचार्यदेवनाथस्य महात्मनः स्मृतिमात्रं चोदयत्यस्मान् स्वकर्मसु। तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठे कानिचन वर्षाणि सेवां कृतवतो मे तत्रैव आचार्यदेवनाथमहाविभूतेः सान्निध्यं प्राप्य अष्टादशेभ्योऽपि समेभ्यः अधिकः कालः व्यतीयाय। न केवलं ज्येष्ठप्राध्यापकरूपेण मार्गदर्शकः अपि तु सुहृत्त्वेन हितबोधकोऽपि स मामुपाकार्षीत्। सदाचारेषु दीक्षितः, कार्येषु दक्षः, शास्त्रेषु विचक्षणः, मन्त्रेषु दीर्घदर्शी, बोधनेषु बृहस्पतिः, छात्रेषु सुहृच्छीलः, वृद्धेषु विनीतः, कर्मसु बद्धश्रद्धः, ग्रन्थेषु कुशलः नान्यः कश्चित् दृष्टः देवनाथाचार्येण तुलामधिरोढुम्।

आचिनोति हि शास्त्रार्थान् स्वान् शिष्यान् ग्राहयत्यपि।
स्वयमाचरते यस्तु तमाचार्यं प्रचक्षते।।

इत्यस्य अभियुक्तवचनस्य अनितरसाधारणं निदर्शनमेकम् आचार्यदेवनाथः आजीवनम् अहर्निशं स्वान्तःसुखाय श्वासोच्छ्वासवत् गीर्वाणवाणीसेवां विधाय स्वजनमानसे स्थिरं विलसन्तमाचार्यम् - देवनाथं स्मरति भूदेवलोकः।

देवनाथसमो नास्ति गैर्वाणजनमण्डले।
पाण्डित्ये च पटुत्वे च शासने कार्यसाधने।।

श्रीवरः
श्रीनिवास वरखेडी
कुलगुरू



आचार्यरामानुजदेवनाथः



काञ्चीपुरे दण्डपाणिपौरस्त्यविद्यालये संस्कृताध्यापकः।



तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठे शास्त्रार्थप्रशिक्षणावसरे।



आचार्येण हरेकृष्णशतपथिना साकं पुत्र्याः अनुकम्पायाः विवाहावसरे।



छात्रैरध्यापकादिभिश्च समं पुत्र्याः अनुकम्पायाः विवाहावसरे।



SHOT ON MI A1
MI DUAL CAMERA

जम्मूनगरे श्रीरणवीरपरिसरे गणेशपूजां कुर्वन्।



श्रीरणवीरपरिसरे शास्त्रचर्चायाम् आचार्यसुरेन्द्रशास्त्रिणा (वामवर्तिणा) आचायर्प्रियतमचन्द्रशास्त्रिणा (दक्षिणवर्तिणा) च साकम्।



श्रीरणवीरपरिसरे आचार्येण परमेश्वरनारायणशास्त्रिणा सार्धम्।



श्रीरणवीरपरिसरे सुन्दरवनीस्थश्रीमद्विश्वात्मानन्दसरस्वत्या समम्।



MI A1
CAMERA

श्रीरणवीरपरिसरे वेदविभागे।



१५-०८-२०१६-तमे दिनाङ्के श्रीरणवीरपरिसरे स्वतन्त्रतादिनकार्यक्रमे।



जम्मूनगरस्थे गृहे सपरिवारम्।



श्रीरणवीरपरिसरे आचार्यविश्वमूर्तिशास्त्रिणा आचार्यमनोजकुमारमिश्रेण च साकम्।



OT ON MI A1
DUAL CAMERA

श्रीरणवीरपरिसरे आचार्येण परमेश्वरनारायणशास्त्रिणा,
जम्मूकश्मीरराज्योपमुख्यमन्त्रिणा डा. निर्मलकुमारसिंहेन च सार्धम्।



अधिमञ्चं आचार्यदयानन्दभार्गवेण, आचार्ययुगलकिशोरमिश्रेण, आचार्येपरमेश्वरनारायणशास्त्रिणा,
डा. निर्मलकुमारसिंहेन, आचार्यमनोजकुमारमिश्रेण च साकम्।




ON MI A1
AL CAMERA

नवदेहल्यां कुलपतिना आचार्येण परमेश्वरनारायणशास्त्रिणा सार्धम्।



जम्मूविश्वविद्यालयकुलपतिना आचार्येण आर्.डी. शर्मणा साकम्।



स्वामिनित्यानन्दसरस्वतीमहाराजानां सान्निध्ये।



१४.०५.२०१४-तमे दिनाङ्के श्रीरणवीरपरिसरस्य प्राचार्यपदवीं स्वीकुर्वन् कुलपतिना आचार्येण परमेश्वरनारायणशास्त्रिणा सार्धम्।



आचार्येण के.बी.सुब्बरायुडुना सम्मानितः श्रीरणवीरपरिसरप्राचार्यः।



०८.०४.२०१६-तमे दिनाङ्के श्रीरणवीरपरिसरीयवार्षिकसमारोहे
आचार्येण एम्. श्रीधराचार्यलुना समम्।



SHOT ON MI A1
MI DUAL CAMERA




०२ जनवरी
-संस्कृत-महाविद्यालय
-संस्थानम् (मानित
दिल्ली


विद्यालयः, वलसाड़
जरातराज्यम्
(मानितविश्ववि
दिल्ली




त्रिदिवसीया राष्ट्रियसङ्गोष्ठी
















HOT ON MI A1
I DUAL CAMERA















ON MI A1
AL CAMERA

प्रधानमन्त्रिकार्यालयसचिवेन जम्मूकश्मीरराज्यदण्डधरविशिष्टाध्यक्षेण श्रीमता शक्तिपाठकेन सार्धम्।




श्रीरणवीरपरिसरीयभाषाकार्यशालोद्घाटसमारोहे आचार्यपरमेश्वरनारायणशास्त्रिणा, केन्द्रीयविद्यालयसङ्घटनजम्मूविभागीयेपनिदेशकेन श्रीमता ए.वि.एल्.जे. ऱावुना च समम्।



SHOT ON MI A1
MI DUAL CAMERA

२९.०५.२०१६-तमे दिनाङ्के केन्द्रीयविद्यालयसङ्घटनभाषाकार्यशालासमापनसमारोहे जम्मूकश्मीरराज्यन्यायाधिपेन डा. जी.डी.शर्मणा साकम्।



१४.०८.२०१४-तमे दिनाङ्के संस्कृतसप्ताहसमारोहे संस्कृतपदयात्रामुद्घाटयन्।



**प्रो. पी.एन्. शास्त्री**
कुलपति
**राष्ट्रिय संस्कृत संस्थान**
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
**('ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं
प्रत्यायन परिषद् द्वारा मान्यता प्राप्त)**

**Prof. P.N. Shastry**
Vice-Chancellor
**RASHTRIYA SANSKRIT SANSTHAN**
Deemed to be University
(Under MHRD, Govt. of India)
(Accredited by NAAC with 'A' Grade)

**श्रीः**

**नम्रत्वेनोन्नमन्तः परगुणकथनैः स्वान् गुणान् ख्यापयन्तः**
**स्वार्थान् संपादयन्तो विततपृथुतरारम्भयत्नाः परार्थे।**
**क्षान्त्यैवाक्षेपरूक्षाक्षरमुखरमुखान् दुर्मुखान् दूषयन्तः**
**सन्तः साश्चर्यव( च )र्या जगति बहुमताः कस्य नाभ्यर्चनीयाः॥**

साश्चर्यवर्याः साश्चर्यचर्याः च सत्पुरुषाः पृथिव्यां सर्वस्यापि अभ्यर्चनीया भवन्ति।

आचार्यः आर् देवनाथमहोदयः अन्यादृशं व्यक्तित्वं भजते स्म। आचार्यं देवनाथं स्मारं स्मारं तद्गुणततिषु अद्वैतभावं लभते अयं जनः। मित्रमणेः सान्निध्यं सर्वदा सर्वथा नवनवोन्मेषशालि प्रातिभम् उपस्थापयति स्म। प्रायः त्रिंशद्वर्षेभ्यः पूर्वं तिरुपतिक्षेत्रे कुत्रचित् विद्यालये शिक्षणाभ्यासकाले आवयोः समागमः, विरामकाले सुदीर्घः संवादः स्मर्यते। वैदिकपरम्परायाः प्रतिष्ठा, शास्त्रपरम्परायाः संरक्षणं चेति विषये चिन्तनं मन्थनं च आवयोः मैत्रीबन्धस्य जीवातुरासीत्। तत्प्रभृति यदा यदा सहवासः, संवादश्च भवति स्म, तदा तदा गुरुकुलेषु वेदाध्ययनपरम्परायाः, शास्त्राधिगमोपायानां चिन्तनम् अकरवाव। ततः परं प्रतिवत्सरमावयोः समागमः भवति स्म। राष्ट्रियसंस्कृतसंस्थानस्य परिसरेषु, अन्यान्यावसरेषु शास्त्रसंरक्षणोपायानां क्रियान्वयनं कथमिति विचारः प्रस्फुरति स्म। शिष्यवत्सलाः आचार्याः देवनाथवर्याः पुनः पुनः भर्तृहरेः श्लोकमिमं स्मारयन्ति। यथा–

**मनसि वचसि काये पुण्यपीयूषपूर्णा**
**स्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः।**
**परगुणपरमाणून् पर्वतीकृत्य नित्यं**
**निजहृदि विकसन्तः सन्ति सन्तः कियन्तः॥**

संस्कृतजगत् न कदापि आचार्यान् विस्मर्तुं शक्नोति। संस्कृतकार्ये तत्रापि शास्त्रसंरक्षणसन्दर्भे कीर्तिशेषाणां मित्रमणीनां वचः प्रतिपदं स्मरामि।

इति आचार्यान् स्मरन्

प ना शास्त्री
(परमेश्वरनारायणशास्त्री)

56-57, Institutional Area, Janakpuri, New Delhi-110058 Ph.: (O) 28523949 (Fax) 28521948
EPABX : 28524993, 28521994, 28524995 E.Mail : rskspvc@yahoo.com

Vedāntaviśārada
Vidwadratnam, Shāstranidhi
Recipient of Certificate of Honour from the President of India
**Professor Vempaty Kutumba Sastry**
President,
International Association of Sanskrit Studies, Paris
36, Evergreen Apartments, Plot. 9, Sector 7, Dwaraka,
New Delhi - 110075 (India)
Phone : 011-25083455 (M) 9968966893
E-mail : kutumba10@gmail.com

Formerly
Director and Vice-Chancellor, Rashtriya Sanskrit Sansthan, New Delhi
Vice-Chancellor, Sampoornanand Sanskrit University, Varanasi (U.P.)
Vice-Chancellor, Sri Somnath Sanskrit University, Veraval (Gujrat)
Professor and Head, Department of Sanskrit, Pondicherry Central University (Pondicherry)

प्रयत्नप्रवर्तितापि लेखनी न प्रसरति श्रीमतः देवनाथाचार्यस्य विषये लेखितुम्। मनस्यपि स्पष्टता नास्ति। किं लेखनीयम्? कीदृशः आरम्भः? कथं निर्वहणम्? कीदृशी च समाप्तिः? सर्वे एव प्रश्नपरम्पराः पुरतः परिस्फुरन्ति। फलतो लेखने वैमनस्यम्।

योग्यं मध्यमञ्च सबलं शरीरम्। तेजस्वि वर्चस्वि च मुखम्। दृढानि गात्राणि। वेगवत् गमनम्। ऊर्जस्वि भाषणम्। विद्युत्स्फुरणसमा कार्यनिर्वहणरीतिः। चतुरता व्यवहारे। सामर्थ्यं संप्रेषणे। अप्रतिहता गतिः सर्वासु भारतीयासु तदितरासु च भाषासु। स्फूर्तिः सभासु। स्मृतिरनपोहना। चतुरस्रं पाण्डित्यम्। अतिगहनं व्याकरणशास्त्रपरिज्ञानम्। अनितरसाधारणं शिक्षाशास्त्रविषयकम् अभिनवविज्ञानम्। अप्रसिद्धपदप्रयोगकौतुकिता। अप्रसिद्धेषु छन्दस्सु कवितालेखनकौशलम्। नैकग्रन्थविरचनावैदग्ध्यम्। विविधेषु देशेषु विविधानां महतां पदानां सोत्कर्षं निर्वहणम्। गुरुजनेषु मूर्तिमान् विनयः। शिष्येषु मूर्तिमान् स्नेहः। आश्रितेषु मूर्तिमद्वात्सल्यम्। सुन्दरः सुसंस्कृतश्च परिवारः। सदाचारशोभितं जीवनम्। कालज्ञता कर्तव्येषु। समयज्ञता वाचि। कर्मठता आत्मनि। प्रपत्तिः श्रीपतौ। किं नास्ति देवनथाचार्ये ऋते वेदोक्तात् पूर्णादायुषः।

विद्यार्थिदशातः मे परिचयः देवनाथाचार्यस्य। मन्निर्देशने मञ्चिते मृच्छकटिके प्रकरणे चारुदत्तपात्रमभिनीय प्रयत्नसाफल्याय निदानभूत आसीत्। तदीये वैवाहिके मङ्गले तदीये पैतृके ग्रामे देवनाथधाम्नि उपस्थितोऽहमासम्। नैकविधाः आवयोर्मध्ये सम्बन्धा आसन्। सर्वेऽपि च ते स्मरणार्हा एव। आन्तञ्चावयोस्सम्बन्धः हर्षद एवासीत्।

देवनथाचार्याणां अकालस्वर्गवासेन न केवलमस्मादृशां, न केवलं तदीयपरिवारस्य, न केवलं संस्थानादिसंस्थानां, अपि तु समग्रसंस्कृतजगतः अपूरणीया क्षतिः सम्पन्ना। तेषां बह्वायामयुतं बहुमुखप्रज्ञासुशोभितं साहचर्यं अमूल्यधनरूपं सदा वयं स्मरन्त एव भवामः।

संस्कृतसेवकः,

वेम्पटि कुटुम्बशास्त्री

## दिव्यस्मृतिः

श्रीमान् आचार्यः देवनाथः चिरात् मम परिचितः आसीत्। यदा सः तिरुपतिविद्यापीठे शिक्षाशास्त्रिकक्षायां प्रविष्टः तदारभ्यैव तेन सह कश्चन विशिष्टः स्नेहबन्धः आसीत्। सौहार्दमस्य जन्मसिद्धो गुणः। अत एवास्मिन् सर्वे विश्रम्भन्ति स्म। अयं यद्यपि विद्याभ्यासकाले तथा प्रबुद्ध इव नाभासत परन्तु अचिरादेव अयं सर्वतोमुखीं शेमुषीमासादितवान्। कस्यापि कुत्रापि सन्देहः तर्हि देवनाथः प्रष्टव्यः इति प्रथा आसीत्। तथैवायं सर्वेषां मार्गदर्शनं करोति स्म। वेदाङ्गेषु, वेदान्ते,शिक्षाशास्त्रे,काव्यनाटकालङ्कारादिषु,आधुनिकगणकयन्त्रादिविज्ञानेषु,आङ्ग्ल-हिन्दी-तेलुगु-तमिल-ओरिया-कन्नड-मलयाल-मराठीप्रभृतिषु अनेकासु भाषासु, किमेकत्र सर्वत्र अयं प्रावीण्यं संपादितवान्। आदौ संस्थाने एव शिक्षाशास्त्रविभागे अध्यापकत्वेन प्रविष्टः ततः किञ्चित् कालं तिरुपतौ शिक्षाशास्त्रप्रगताध्ययनकेन्द्रे कार्यं कृत्वा पुनः प्राचार्यत्वेन संस्थानं गतः स्वीयेनानिर्वचनीयेन प्रशासनकौशलेन सर्वान् प्रभाव्य परिसराणां सर्वतोमुखाभिवृद्धौ प्रधानभूमिकामवहत्। ततः संस्थानकुलसचिवत्वं राजस्थानसंस्कृतविश्वविद्यालयस्य कुलपतित्वं च सम्यक् निरुह्य समेषां प्रीतिपात्रमभवत्। अस्य प्रशासनकौशलं, विविधेषु आयामेषु पाण्डित्यं, कुशाग्रा बुद्धिः, विशिष्टा स्मृतिशक्तिः, एतत्सर्वापेक्षया उत्तमम् अग्रणीत्वं, सौहार्दं च अमुमङ्गुलिगणनीयेषु व्यक्तिविशेषेषु अन्यतममकुर्वन्।विशिष्य अस्य सदाचारनिष्ठा असाधारणी। अयं यत्र यत्र आसीत् तत्रत्याः सर्वे अमुं सादरं स्मरन्तीतीदमेवालं अस्य माहात्म्यप्रकटनाय। अस्य अकालनिधनं तु संस्कृतलोकस्य अशनिपात एव। वामनत्वेनावतीर्य विष्णुर्यथा त्रिविक्रमो भूत्वा सर्वं लोकजातमाक्रान्तवान् तथैव देवनाथार्योपि अचिरादेव त्रिविक्रमो भूत्वा संस्कृतलोकमाक्रम्य संस्कृतमातरं संसेव्य स्वजीवनं सफलं कृतवान् येनायमस्माभिः प्रातःस्मरणीयः संवृत्तः।

एतादृशस्य महानुभावस्य स्मृत्यङ्करूपेण कश्चन ग्रन्थः प्रकाशनीय इति यः सङ्कल्पः संस्थानीयैः आचार्यसुदेशशर्मणां नेतृत्वे कृतः सोवश्यमभिनन्दनीयः। मम शिष्यकल्पोयं देवनाथः मयि अत्यन्तं भक्तिमान् प्रीतिमांश्चासीत्। बहवो विषयाः ततो मया ज्ञाताः। तादृशः स महानुभावः परमपदे श्रीभगवत्सेवाभाग्यमनुभवन्नास्ते इति विश्वस्य, स्मृत्यङ्कप्रकाशनोद्यतान् पुनरेकवारमभिनन्द्य विरमामि विस्तरात्।

इत्थं,

निवेदयिता,

कं.वें.रामकृष्णमाचार्यः

श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः
(भारतीयसर्वकारस्य १९९३ मे २६ दिनाङ्के F-९-९/९२ - U३ प्रकटनमुद्रायुतस् यविश्वविद्यालयानुदान योगस्य १९५६ विधेः तृतीयविधिमनुसृत्य विश्वविद्यालयत्वेन प्रकटीकृतः)
SRI CHANDRASEKHARENDRA SARASWATHI VISWA MAHAVIDYALAYA
(SCSVMV UNIVERSITY)
(University u/s 3 of the UGC Act 1956)
(Accredited with 'A' Grade by NAAC)
Enathur, Kanchipuram - 631 561.

Prof.Dr. Vishnu Potty V.S.
Vice-Chancellor

श्रीगुरुभ्यो नमः

10/10/2017

वैदुष्योन्मिषिता विशेषमहिता निश्शेषविद्वन्नुता
प्रज्ञा यस्य विभास्वरा विमलधीवृन्दैकदीपायिता।
सोऽयं मित्रवरो गिरां पतिरहो सत्कीर्तिकायं गतः
वाणीक्रोडसमाश्रितो विजयते श्रीदेवनाथस्सुधीः॥

यस्योत्कृष्टपदाप्तिराप्तमनसामानन्दसन्दायिनी
यत्कीर्तिर्विमला दिगन्तमहिता विद्वज्जनामोदिनी।
चारित्र्यं यदुपज्ञमेव विदितं सद्धर्मकर्मोज्ज्वलं
श्रीरामानुजदेवनाथकविराट् सोऽयं दिवि भ्राजते॥

यन्मैत्री हृदयेहिता ननु पुरा काञ्च्यां सुरागोज्ज्वला
भूयो मेलनवर्धिता तिरुपतौ यद्दर्शनेष्वादरात्।
तद्योगस्खलनाग्निना भृशमहो तप्तं मनो बाधते
हा हा दैव कदर्यता प्रकटिता श्रीदेववाण्यां त्वया॥

यद्यपि कार्यान्तरादरात्स्थितोऽपि मनस्सम्पर्कादत्यन्तनिकटवर्तिनमिव सुहृद्वर्यं देवनाथार्यं संस्मरन् तस्य सौहार्देन प्रचोदितोऽयं जनः वस्तुतः तस्य वियोगो बहुभारपीडितहृदयः। संसर्गो विपश्चितां नितरां पीडनकरः यो वियोगेषु तापभरितान्तरङ्गं कुरुत इतरम्। नात्र दैवादृते उपालब्धुमन्यत्रावसरः येन विद्वद्वन्द्यः अत्यन्तापेक्षितसुरभारतीवरीवस्योपि सुहृद्वर आत्माङ्के निलीन अकारि।

शेमुषीविभूषोज्ज्वलोऽयं सुहृद्वरः दैवाद्दिष्टमिव काञ्च्यामदर्शि मया। काञ्चीस्थे दण्डपाणिप्राच्यविद्यालय उद्योगवेलायामवसर उपनतो दर्शनाय। प्राक्कालादिव स्निग्धस्य कस्यचिन्मित्रस्य भावोऽन्वभावि हृदयेन स्नेहोद्दीपितमैत्रीदीपेन। गुणानां सम्प्रसवः कश्चिदिति विदित्वा दर्शं दर्शमामोदं

044 - 2729 6815 (O) 2726 4408
Mobile : (P) 94457 83508 (O) 95973 87773
Fax : 044 - 2726 4295
e-mail : vc@kanchiuniv.ac.in (O)
website : www.kanchiuniv.ac.in

श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः
(भारतीयसर्वकारस्य १९९३ मे २६ दिनाङ्के F-९-९/९२ - U३ प्रकटनश्रुयायुतस् यविश्वविद्यालयानुदान ायोगस्य १९५६ विधेः तृतीयविधिमनुसृत्य विश्वविद्यालयत्वेन प्रकटीकृतः)
SRI CHANDRASEKHARENDRA SARASWATHI VISWA MAHAVIDYALAYA
(SCSVMV UNIVERSITY)
(University u/s 3 of the UGC Act 1956)
(Accredited with 'A' Grade by NAAC)
Enathur, Kanchipuram - 631 561.

**Prof.Dr. Vishnu Potty V.S.**
**Vice-Chancellor**

परमवापि मनसा उररीकृतस्नेहवचसा। सरस्वतीसमुपासकः देवतोपासनाविदीपितवैदुष्यः भाविनि भाविनिवेशपदमण्डको भवितेति केनाप्यकथीव कर्णे।

ततः भूयसा तद्गुणैः कर्णमागत्य मोदाम्बुधाविवागाहत हृदयं तदुन्नतिसमाप्लावितमुदुदयम्। तस्योत्कृष्टपदास्याऽऽत्मोत्कर्षसमुपलब्धप्रघनमोदप्रवाहेणेव समोमुद्यत चेतः। तिरुपतौ विद्यापीठे भाषणावसरेषु तद्दर्शनोद्दीपितमानसमोदोद्रेकः नूतनमिव व्यधात्पर्यावरणम्। मनसो विगलितेव स्नेहोद्रेकः नर्नर्ति स्माऽन्तरे रङ्गे। सरलवाग्विभूतिं स्मितपूर्वभाषितां मैत्रीबहुमानञ्च समीक्ष्यानन्दमन्दमिव प्रसादविस्फारितमिव अशरीरमपि सञ्जातरोमहर्षणमिवाभून्मनः।

ततः नवदेहल्यां सत्स्नेहदेहल्यां राष्ट्रियसंस्कृतसंस्थाने तद्दर्शनावसरविशदीकृतरागस्फूर्तिरयं जनः तदुत्कर्षवीक्षणामोदविसारविद्योतितान्तःकरणोऽवर्तै। बहुभाषाभाषणकौशलविस्फारितकीर्तिमण्डलं निजवैदुष्यसमावर्जितसकलधीधनं तेजोविलासतुरीवीतयशःपताकं धिषणाविडम्बितधिषणमपि काव्यज्ञम्, अनुपममपि सदुपमम् तं वीक्ष्य विशदीकृतस्नेहप्रदीपायितेन मयाऽमन्दानन्दसन्दोह आत्मसादकारि।

ततश्च भूयस्तत्कीर्तिं श्रावं श्रावं समुत्फुल्लितात्माऽयं जनोऽभूवम्। तद्वियोगवार्तां विश्रुत्य अङ्गारचुम्बितमिव व्यथमानमास्ते हृदयम्। देववाणीसुतः कश्चिदुत्कृष्टपदभूषित इति हर्षोत्कर्षोत्फुल्लितहृदयोऽयं हृदयनिष्पीडनखिन्न इव दुःखाम्बुधिं गाहते। सोऽयं कीर्तिकायः चिरन्तनकीर्तिः विभायादिति भगवन्तमभ्यर्थये।

Vishnu Potty V.S. (signature)

VICE - CHANCELLOR
SCSVMV University
Enathur, Kanchipuram-631 561.

☎ 044 - 2729 6815 (O)
2726 4408
Mobile : (P) 94457 83508
(O) 95973 87773
Fax : 044 - 2726 4295
e-mail : vc@kanchiuniv.ac.in (O)
website : www.kanchiuniv.ac.in

# राष्ट्रिय-संस्कृत-संस्थानम्
(मानितविश्वविद्यालयः)
क. जे. सोमैया संस्कृतविद्यापीठम्, विद्याविहारः, मुम्बई - 77
Ph. 022-21025482, 21025452,
E-mail: rsksmumbai@yahoo.com www.rsksmumbai.in

प्रो. सुदेशकुमारशर्मा
प्राचार्यः


ॐ

## प्रास्ताविकम्

प्रणम्य परमात्मानं देवीं वाणीं कृपामयीम्।
श्रीदेवनाथस्मृत्यङ्कविद्यारश्मिं दिशाम्यहम्॥

राष्ट्रियसंस्कृतसंस्थानस्य मुम्बईपरिसरः प्रतिवर्षं परिसरीयां राष्ट्रियवार्षिकशोधपत्रिकां प्रकाशयतीत्यत्र नास्ति कश्चन विशेषः। परमैषमः २०१७–१८ तमस्याध्ययनवर्षस्य षष्ठाङ्कस्य विद्यारश्मेः प्रकाशनं दिवङ्गतानामाचार्याणां श्रीमद्रामानुजदेवनाथमहोदयानां परिसरप्राचार्यचराणां स्मृतिविशेषाङ्कतया भवेदिति पत्रिकासम्पादकमण्डलेन परिकल्पितमित्येतदानन्दस्य विषयः। किञ्च विशिष्य तु मदीयसुहृदुत्तमानामाचार्यदेवनाथानामकालविरामं दुःखास्पदं मनसि निधाय तदनुस्मरणरूपं विविधविद्वदनुष्ठितशोकवाङ्मालरूपा रचनाः संकलय्यास्मिन् स्मृतिविशेषाङ्के प्रस्तोतुमैच्छम्। तदेवाचार्यदेवनाथसत्सङ्गसौहृदफलभूता पुण्यस्मृतिरूपा वाक्पुष्पमालाकल्पेयं पत्रिका चिरं विराजतांतराम्। तदियं शोधपत्रिकाऽऽचार्यरामानुजदेवनाथस्मृतिविशेषाङ्करूपा सत्स्मृतिबाष्पाञ्जलिसमेताऽनु-वाचकानां पुरस्तात् प्रस्तौमीति शम्॥

इति विदुषां विधेयः,

(प्रो. सुदेशकुमारशर्मा)

मुम्बई
वसन्तपञ्चमी, 2074 (वि.)

ॐ

# सम्पादकीयम्

अथ प्रकाश्यतेऽस्माभिर्**विद्यारश्मिरै**षमो २०१७-१८ तमस्याध्ययनवर्षस्य षष्ठाङ्कोऽयं **श्रीमदाचार्यरामानुजदेवनाथस्मृतिविशेषाङ्को** भवतां विद्वत्सहृयानां करारविन्देषु समर्प्यमाणेति।।

ननु भोः! सहृदयाः! विद्वन्मणयः! राष्ट्रियसंस्कृतसंस्थानस्य मुम्बईपरिसर-प्राचार्यचराणामकालजीवितविरामभाजां पुण्यस्मृतिरूपा वाक्यपुष्पमालिकेयं चिराय प्रशोभतांतमाम्। ऐषमस्तावद्विशेषाङ्के व्याकरणन्यायसाहित्यवेदान्तज्योतिषशिक्षा-शास्त्राधुनिकविषयादिनैकरचनानामेकत्र संयोगो विद्वत्सहृदयान् मोदयेत्तरामित्यत्र नास्ति काचन संशीतिः।।

**आचार्यरामानुजदेवनाथस्मृतिखण्डेन** प्रारभ्यमाणोऽयं विशेषाङ्को विशिष्यात्रैषमो न्यायशास्त्रस्यापि च वेदान्तस्यापि रचना बिभर्तीति सामोदं निवेदयामः।।

अपि च सर्व्वा अपि शास्त्रीयरचना निजप्रौढितया सहृदयान् विदुषश्च समाकृष्य समालोचयितुं संशोध्य सम्पादयितुं च प्रेरयिष्यन्तीति सम्पादकमण्डलं विश्वसिति।।

तदित्थम्-

शास्त्रीयरचनाः सर्व्वा निजप्रौढितया स्थिताः।
सहृदयान् विदुषश्चैव चिरं तोषयितुं क्षमाः।। इति।

**इत्याचार्यरामानुजदेवनाथानुग्रहपात्त्रं**
**सम्पादकमण्डलम्**

# रचनानुक्रमणिका

## स्मरणिकाविभागः


| क्र. | रचनानाम | रचयितृनाम | पृष्ठसङ्ख्या |
|---|---|---|---|
| 1 | ॐ श्रीमते रामानुजदेवनाथाय नमः | डा. को. वे. सोमयाजुलुः आचार्यः | 1 |
| 2 | पुण्यस्मरणम् | आचार्यः का. ई. देवनाथन् | 4 |
| 3 | वियोगिनीकल्लोलिनी | आचार्यः जि.यस्.आर्. कृष्णमूर्तिः | 6 |
| 4 | सखा गुरुश्च मे | आचार्यः राजन्. ई. एम्. | 8 |
| 5 | चिरं स्मराम्याचार्यरामानुजदेवनाथ - वर्यम् | प्रो. सुकान्तकुमारसेनापतिः | 10 |
| 6 | सदाचारिणे आचार्यरामानुजदेवनाथाय ललितस्यानुभूतिः | आचार्यललितकुमारसाहुः | 12 |
| 7 | आचार्यदेवनाथस्मरणम् | डा. हरिओम्शास्त्री | 15 |
| 8 | आचार्यदेवो भव | डा. शिवरामभट्टः | 16 |
| 9 | Devanathan – My Best Friend | Dr. S V R Murthy | 21 |
| 10 | Dear Departed | Dr. Sharat Chander Sharma | 23 |
| 11 | देशिकप्रणामः | डा. एम्-जयकृष्णन् | 31 |
| 12 | आचार्यो देवनाथः | डॉ. दे. दयानाथः | 32 |
| 13 | लीनोऽसि कुत्र प्रभो ....! | डा. प्रियव्रतमिश्रः | 37 |
| 14 | भजेऽहं भजेऽहं सदा तेऽङ्घ्रिपद्मम् | डा. विनायकरजतः | 41 |
| 15 | ज्ञानमहिममण्डिताः शिक्षाशास्त्रिणः प्रो. रामानुजदेवनाथाः | डा. परमेशकुमारशर्मा | 50 |
| 16 | आचार्यः सः नो महान् | डा. नितिनकुमारजैनः | 55 |
| 17 | आचार्य रामानुज देवनाथन: एक संस्मरण | डा. शिवदत्त आर्य | 58 |
| 18 | व्यक्तित्व के गुणों के धनी आचार्य रामानुज देवनाथन् | डा. प्रेमसिंहसिकरवार | 59 |
| 19 | पुण्यश्लोक: आचार्य: रामानुजदेवनाथ: | डा. देवदत्तसरोदे | 66 |

| | | | |
|---|---|---|---|
| 20 | आदर्श अध्यापक के गुणों को परिपूर्ण आचार्य रामानुज देवनाथन जी | डॉ. श्रीगोविन्द पाण्डेय | 70 |
| 21 | चिरस्स्मरणीयाः वन्दनीयाश्च गुरवः | डा. राधागोविन्दत्रिपाठी | **73** |

व्याकरणविभागः

| क्र. | रचनानाम | रचयितृनाम | पृष्ठसङ्ख्या |
|---|---|---|---|
| 1 | वैयाकरणमतानुसारं पदशास्त्रीयशाब्दबोधसिद्धान्तसमीक्षणम् | डा. कोड्कुलवेङ्कट-सोमयाजुलुः आचार्यः | **78** |
| 2 | काल एव हि विश्वात्मा | प्रो. प्रकाशचन्द्रः | 94 |
| 3 | पाणिनीयपद्धत्या ए बी सी डी – इत्यादीनां सिद्धिः | प्रो. बोधकुमारझाः | 107 |
| 4 | समासस्य तत्त्वबोधिनीलघुशब्देन्दु - शेखरयोः तुलनात्मको विमर्शः | डा. सुभाष मीणा | 111 |
| 5 | व्याकरणनये सम्बन्धनिरूपणम् | डॉ. माधवदत्तपाण्डेयः | 115 |
| 6 | कर्त्तृकर्मणोः कृति | डॉ. नवीनकुमारमिश्रः | 125 |
| 7 | भाषाविज्ञानदृष्ट्याशब्दार्थसम्बन्धविमर्शः | चेमटे सुरेशः | 134 |
| 8 | सिद्धान्तकौमुदीवैदिकप्रकरणस्थ-लौकिकवेदिकोहरणानामनुसन्धानम् | ऋतम्भरापाण्डेयः | 144 |

न्यायविभागः

| क्र. | रचनानाम | रचयितृनाम | पृष्ठसङ्ख्या |
|---|---|---|---|
| 1 | विलक्षणं सिद्धान्तलक्षणम् | डा. ना .रा. श्रीधरन् | 156 |

साहित्यविभागः

| क्र. | रचनानाम | रचयितृनाम | पृष्ठसङ्ख्या |
|---|---|---|---|
| 1 | राजकुमारमिश्रप्रणीतभारतभूषणकाव्यस्य पर्यालोचनम् | डॉ. कृपाशङ्करशर्मा | 160 |

| | | | |
|---|---|---|---|
| 2 | ध्वन्यालोकलोचनाभ्यां प्रकाशितं कलातत्त्वम् | डा. नारायणन्. ई. आर्. | 166 |
| 3 | आलङ्कारिकाभिमता व्यङ्ग्यबोधिनी व्यञ्जना | डा. एम्. सुदर्शनचिपळूणकरः | 172 |


ज्योतिषविभागः


| क्र. | रचनानाम | रचयितृनाम | पृष्ठसङ्ख्या |
|---|---|---|---|
| 1 | राष्ट्र के निर्माण में ज्योतिषशास्त्र की भूमिका | प्रो. भारतभूषण मिश्र | 178 |
| 2 | मिथिला के शाक्त परम्परा में राजनगर के मन्दिरों का वास्तु विन्यास | डा. आशीष कुमार चौधरी | 184 |
| 3 | ज्योतिष-वास्तुशास्त्रयोः दिग्ज्ञानवैशिष्ट्यम् | डा. अनिरुद्ध नारायण शुक्लः | 189 |


वेदान्तविभागः


| क्र. | रचनानाम | रचयितृनाम | पृष्ठसङ्ख्या |
|---|---|---|---|
| 1 | श्रीसुरेश्वराचार्याणामाभासवादः | डॉ. भगवानसामन्तरायः | 196 |
| 2 | आधुनिककाले भगवद्गीतायाः प्रासङ्गिकता | डा. ए. सच्चिदानन्दमूर्त्तिः | 200 |
| 3 | संस्कृतवाङ्मये भक्तितत्त्वानि | डॉ. विनोद कुमार शर्मा | 204 |


शिक्षाविभागः


| क्र. | रचनानाम | रचयितृनाम | पृष्ठसङ्ख्या |
|---|---|---|---|
| 1 | श्रीमहेन्द्रनाथदत्तानां शैक्षिकं चिन्तनम् | डा. एम्-जयकृष्णन् | 211 |
| 2 | भारोपीयभाषापरिवारः संस्कृतञ्च | डा. आरती शर्मा | 216 |
| 3 | संस्कृतशिक्षणे नवीनता | डॉ. सच्चिदानन्दमूर्त्तिः | 222 |
| 4 | श्रीमद्भागवते विश्वबन्धुत्वपोषकाणि शैक्षिकतत्त्वानि | डा. परमेशकुमारशर्मा | 225 |

| | | | |
|---|---|---|---|
| 5 | संस्कृतिसंरक्षणे भाषाप्रयोगशालायाः उपयोगिता | डॉ. प्रेमसिंहसिकरवारः | 231 |
| 6 | शिक्षायां मानसिकस्वास्थ्यम् | डा. कौशलेश शर्मा | 241 |
| 7 | उच्च शिक्षा में गुणवत्ताः समस्याएं एवं संभावनाएं | डा. शुद्धात्मप्रकाश जैन | 245 |
| 8 | वैदिकशिक्षायाः स्वरूपं तद्वैशिष्ट्यानि च | डा. देवदत्त सरोदे | 253 |
| 9 | वर्तमानशिक्षाव्यवस्थायां बौद्धशिक्षायाः योगदानम् | डा. वी. एस्. वी. भास्कररेड्डी | 266 |
| 10 | भारतीयसन्दर्भमनुसृत्य आधुनिकीकरणे शिक्षायाः भूमिका | डा. सुनील कुमार शर्मा | 274 |
| 11 | संस्कृतभाषाधिगमे पठनकौशलम् | सचिनकुमारः | 280 |


आधुनिकविभागः


| क्र. | रचनानाम | रचयितृनाम | पृष्ठसङ्ख्या |
|---|---|---|---|
| 1 | मॉरीशस के हिन्दी उपन्यास सम्राटः अभिमन्यु अनत | डॉ. गीता दूबे | 288 |
| 2 | A Comparative Study of the Future Tense **............** | Dr. Swargakumar Mishra | 294 |
| 3 | Impact of Globilization on Indian Culture | Dr. Kumar | 303 |
| 4 | Women Education in India | Dr. Pinki Malik | 310 |
| **5** | Culture in Chinua Achebe's Things Fall Apart | Dr. Shweta Sood | 316 |
| **6** | Gender And Environment Debate | Dr. Suman Singh | 322 |
| **7** | शारिरिक तंदुरुस्ती विकास के लिए प्रशिक्षण पद्धति | डॉ. आंधळे शंकर बाबुराव | 331 |
| **8** | साहित्य प्रकारांचे स्वरुप | डॉ. मीनाक्षी बरहाटे | 336 |
| **9** | Java Applets | Ms. Vaishali Nivadunge | 339 |

## ॐ श्रीमते रामानुजदेवनाथाय नमः

**डा. कोडुकुलवेङ्कटसोमयाजुलुः आचार्यः**
व्याकरणविभागः, रा. सं. सं. ( मा.वि.)
श्रीसदाशिवपरिसरः, पुरी,
उडीशाः पिन – ७५२००१

श्रीमत्परमहंसपरिव्राजकाचार्यवर्ययमनियमासनप्राणायामप्रत्याहारध्यानधारणसमाध्यष्टाङ्गयोगनिष्ठागरिष्ठसनातनहिन्दुधर्मसम्प्रदायप्रवर्तकप्रचारप्रसारकतत्त्वसिद्धान्तप्रबोधकसनातनधर्मप्रचोदितास्तिकनास्तिकानिखिलश्रौतस्मार्तसत्कर्मानुष्ठापकाचारपूतविशिष्टाद्वैतसिद्धान्तप्रबोधकतत्प्रचारप्रसारकभगवद्रामानुजाचार्यसत्सम्प्रदायपरम्परागतसकलसद्विद्यासम्प्रदायप्रचोदितानादितपश्चर्याचरणबद्धैकदीक्षातत्परैतत्कालावच्छेदेन ब्रह्मलीनभगवद्विष्णुसायुज्यप्राप्तसन्मित्रमणिस्वर्गीय - रामानुजदेवनाथाचार्यपुण्यसंस्मरणाङ्गभूतस्मृतिविशेषाङ्कग्रन्थप्रकाशनाख्यपुण्यवृत्तान्तश्रवण-सन्देशप्रभावितोऽहमपि मन्मित्रप्रवरस्य स्वर्गीयरामानुजदेवनाथस्य विष्णुसायुज्या दायकस्वाध्याय-तपस्यामाध्यमेनानुष्ठीयमानैतत्पुण्यकर्मानुष्ठानावसके वैयाकरणमतानुसारं पदशास्त्रीयशाब्दबोध - सिद्धान्तसमीक्षमाख्यं किञ्चित् प्रस्तोष्यमाणं शोधपत्रं यथाशक्ति यथामति तस्य श्रद्धाञ्जलिरूपेण साङ्गोपाङ्गं तदीयस्मृतिविशेषाङ्कग्रन्थे साञ्जलिबद्धमग्रे निबध्नामि।

**सन्मित्रमणिरामानुजदेवनाथेन सह मदीयपुण्यानुभवस्मृतयः** –

ए.डी.१९८० तमे वर्षे जुलाईमासे शिक्षाशास्त्रिकक्ष्यायां प्रविवित्सुरहं राष्ट्रियसंस्कृत - संस्थानान्तर्गततिरुपतिनगरस्थकेन्द्रीयसंस्कृतविद्यापीठं जगाम। तत्समये शिक्षाशास्त्रिप्रवेशाङ्गभूत - साक्षात्कारे भागग्रहणं कृत्वा तद्विद्यापीठीये छात्रावासेवेदाचलाख्येऽहं प्रविश्याकुण्ठितदीक्षाया अन्वहं तद्विद्यापीठीयशिक्षाशास्त्राध्ययनाय प्रावर्ते। एवं स्थिते ए.डी. १९८० तमे वर्षे जुलाईमासस्यैकत्रिंशद्दिनाङ्के तमिलनाडुराज्यस्थ पवित्रकाञ्चीपुरग्रामाद्रामानुजदेवनाथाख्यो - ऽन्वर्थनामाकश्चिद्वैष्णवः शिक्षाशास्त्रिकक्ष्यांयां प्रविश्य मदीयपार्श्वसने उपविशत्। तदा आवयोः

परस्परपरिचयप्रदानावसरेऽहं रामानुजदेवनाथो भवत्स्नेहं वाञ्छामीति प्रेम्णा मामवीवदत्। तदारभ्यावयोः परिचयमैत्र्यादिकं नितान्तमैधत। तत उभाभ्यामहोरात्रमवच्छेदकावच्छेदेन शिक्षाशास्त्रसारस्वतसेवान्वष्ठायि। ततः कतिपयवर्षानन्तरं मुक्तिधामस्वन्यतमे श्रीजगन्नाथधाम्नि पुरुषोत्तमक्षेत्रे श्रीविहारे पुरीनगरे विराजमानस्य भगवतो नीलाद्रिनाथस्य भक्तानुग्रहकारकस्य मुमुक्षूणां मोक्षप्रदातुः श्रीजगन्नाथदेवस्यापारकरुणया आवामुभावपि पुरीनगरस्थे तदानीन्तनश्रीसदाशिव - केन्द्रियसंस्कृतविद्यापीठे व्याख्यातृपदे प्राविशाव। तदारभ्यार्थात् १९८७ जुलैमासादारभ्य ए. डी. १९९७ तमे वर्षे अक्तोबरमासं यावदध्यापनरतौ भूत्वा ऽऽवां सहकर्मिणावभवाव। आवयोरुभयो - र्विभागीयपार्थक्ये सत्यपि श्रीमान् रामानुजदेवनाथो मया सह तदानीन्तनव्याकरणविभागा - ध्यक्षाणामाचार्यप्रवरकेवलकृष्णशास्त्रिगुरुचरणानां परमपूतमार्गनिर्देशने व्याकरणशास्त्रीयमनुसन्धानं विधायैकस्मिन्नेव शुभसमये व्याकरणशास्त्रे विद्यावारिधिरित्युपाधिविभूषितस्समजायत। आवयो - र्गवेषणकालेऽस्मदध्यापनसमयमपहाय शोधकार्यसम्बद्धव्याकरणस्वाध्यायतपो मया सह विच्छिन्न- भावेन व्यधायि। ततः सा रामानुजदेवनाथो बहुग्रन्थप्रणयनमाध्यमेन शिक्षाशास्त्रे पारङ्गतो भूत्वा शिक्षाशास्त्रविभागे एवं अध्यापनमाध्यमेनाचार्यो भूत्वाजीवनं शिक्षाशास्त्रमध्यापयाम्बभूव । स्वीयसर्वतोमुखपाण्डित्यप्रभावेनास्मन्मित्रमणी रामानुजदेवनाथो विशिष्टपूर्णवैदुष्यविभूषितस्तिरुपति- नगरस्थे राष्ट्रीयसंस्कृतविद्यापीठे शिक्षाशास्त्रविभागे उपाचार्याचार्यपद्योर्महत्त्वपूर्णमध्यापनं विधाय स्वीययोग्यता बलनैव राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिपदे स्थित्वा राष्ट्रियसंस्कृतसंस्थानस्य विकासाय अत्यन्तं परिश्रमं विधाय राष्ट्रियसंस्कृतसंस्थानस्य महत्त्वमम्बरचुम्बयामास। अनितरसाधारणं तस्य वैदुष्यसदाचारसल्लोकव्यवहारपरोपकारस्वभावादिभ्यः प्रभावितो राजस्थान - राज्यसर्वकारो राजस्थानराज्यान्तर्गतजयपुरस्थश्रीजगद्गुरुरामानन्दसंस्कृतविश्वविद्यालयकुलपतिपदे - ऽस्मन्मित्रमणिरामानुजदेवनाथं सश्रद्धमधिरोहयामास। तस्य पवित्रतायाः प्रभाविता मादृशस्सुहृदः तच्छिष्यप्रविष्यास्तत्सहकर्मिणोऽधिकारिणश्च तमाधुनिकमुनिमिवाभ्यर्चयाम्बभूवुः। उत्कलराज्यस्थ - पुरीनगरे आवयोः स्थितिकालेऽस्मदध्यापनातिरिक्तसमये श्रीकृष्णयजुर्वेदीयतैत्तिरीयशाखाध्यापनाय मामयं रामानुजदेवनाथोऽभ्यर्थयामास। अनुजकल्पस्य सुहृद्वर्यस्य तस्याभ्यर्थनां वेदमिव मन्यामानोऽहं प्रतिदिनं प्रातःकाले चतुर्वादनात्पञ्चवादनं यावत् कृष्णयजुर्वेदीयतैत्तरीयशाखान्तर्गतकातिपया - ध्यायानहमवच्छेदकसामानाधिकरण्येनापाठ्यमित्येतत्कारणेन सोऽयं महानुभावो मच्छिष्याग्रेसरः

अपि सञ्जात इत्यमुं विषयं सानन्दमहं निखिलविद्वल्लोकं प्रति विज्ञापयामि। मातृपितृभक्ति - परायणोऽयं महात्मा स्वपितुरुपदेशप्रभावितस्सन् स्वपुत्रं सम्पूर्णं श्रीकृष्णयजुर्वेदमाचार्यमाध्यमेन पाठयिता तं श्रीकृष्णयजुर्वेदे क्रमपाठिनं विद्यारण्यभाष्यकोविदञ्चासृजत्। स एव रामानुजदेवनाथर्पुत्रो दयानाथदेवनाथाख्यो जम्मूनगरस्थश्रीरणवीरपरिसरे वेदविभागे अतिथिप्राध्यापकस्सन् तद्विभागीय - च्छात्रान् सुतनिर्विशेषमिदानि पाठयन् पितॄ र्णमपाकरोति। एतादृशो महान् पुण्यात्मा विद्याविनयसम्पन्नो मनीषिमण्डलमण्डनायमानो देवतामातृपितृभक्तिपरायणशिशिष्यवत्सलस्सदा - चारसम्पन्नो मुनिकल्पः परोपकारी मत्सहपाठी, मत्सहकर्मी, मत्प्रियतमशिष्यो रामानुजदेवनाथाचार्यो दैवदुर्विपाकात् ०७ .०१.२०१७ तमे दिनाङ्के मुम्बईनगरस्थचिकित्सालये अपमृत्युग्रस्तस्सन्निदं निखिलचराचरजगत्स्थावरजङ्गमात्मकं परित्यज्य विष्णुसाम्राज्यमवापेति कारणेन तदीया वयं सर्वेऽपि दुःखसागरे निमग्नाः भवाम इति दुःखस्यास्य विषयोऽस्मदादीनां सर्वेषामपि। पुण्यात्मनस्तस्य विष्णुसायुज्यावाप्तिद्वारा पुनरावृत्तिरहितजन्मरहितशाश्वतवैकुण्ठे नित्यनिवासो भूयादिति तदर्थं भगवन्तं श्रीजगन्नाथं बहुधा सम्प्रार्थ्यये।

***

## पुण्यस्मरणम्

**आचार्यः का. ई. देवनाथन्**

कुलपतिचराः, श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपतिः।

श्रीरामानुजसद्भक्तः रामानुजसुतो गुणी।
रामानुजगुणैः मान्यः देवनाथोऽभवत्सुधीः॥१॥

मनसि बुधजनानां आढ्यतां प्राप्य रेजे दिनमणिनिभतेजो भासुरो देवनाथः।
अवनतलमशेषं कर्मभूमिं विधाय जनहितकरणेन ख्यात आसीत् विशिष्टः॥२॥

दिशि दिशि महिमानं लेखनेन स्वकीयं
ननु विशदयतिस्म श्रीयुतो देवनाथः।
ललितसरसवाचा छात्रसेव्यः सदैव
सहृदयहृदयेऽसौ राजते वाक्प्रवाहैः॥३॥

उपकृतिमनिशं यः शिष्यवर्गस्य कृत्वा
निरुपधिकरुणां स्वां व्यक्तमाविश्चकार।
व्ययमपि बहु चक्रे स्वर्जितानां धनानां
स्वपरहितपरः तत्साम्यमाप्नोति कोऽत्र ?॥४॥

अभिजनबहुयुक्तोऽप्यास डंभादिशून्यः
कृतमुखबहुमान्योप्यास नत्या विनीतः।
बहुपदमहितोऽसौ वत्सलः स्वावरेषु
सुगुणगणविशिष्टः तादृशो नास्ति भूमौ॥५॥

प्रकृतिसुभगभङ्ग्या साधुशब्दप्रयोगः
कवनकरणमस्मिन् चापि दृष्टं विशिष्टम्।
असमनिपुणताया लाघवेनैव नित्यं
पदविषयविविक्तौ व्यक्तिमाविश्चकार॥६॥

क्रन्दन्तः सुरभारतीबुधवराः तादृक्षविद्वन्मृतेः

शोकार्तः निजशिष्यवर्गनिचयः स्वाचार्यनिर्याणतः।
मुग्धाः बन्धुजनाः स्वकीयनिधनात् निःसीमदुःखावहाद्
वर्तन्ते बुधनाथ दत्तहृदयाः कार्याक्षमा भूतले॥७॥
सर्वेषां बहुमानभाग् सुकृतिनामग्रेसरः पाटवात्
दक्षः कार्यकरः प्रगल्भधिषणः भाषास्वनेकासु सः।
विद्वद्वृन्दचकोरचन्दिरसुधीः वाचामधीशः भुवि
लोकाह्लादनतत्परो विजयते विष्णोः समीपेऽधुना॥८॥
देवनाथमहाभागस्मरणं किञ्चिदाश्रितम्।
देवनाथाख्यमित्रेण तत्स्नेहकृतचिन्तया॥९॥

***

# वियोगिनीकल्लोलिनी

## सुहृद्वररामानुजदेवनाथमहाप्रस्थानस्मरणिका

**आचार्यः जि.यस्.आर्. कृष्णमूर्तिः**
साहित्यविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः।

सुहृदां निवहं प्रशिष्यकं बहुसंस्थानानिकेतनानि च ।
सकलं च विहाय यासि किम् ? क्व च रामानुजदेवनाथ हा ! ॥ 1 ॥
परिवारसुखं विहाय वा निखिलं जीवितमर्पितं त्वया ।
सततं कृतमद्भुतं परं बहु सौख्यं बहुधाप्यदायि च ॥ 2 ॥
असवस्सुहृदो बुधाश्च ते तव सौख्यस्य च भगहारिणः ।
सुखमेव तदीयमाहितम् क्व च लभ्येत भवादृशः सुहृत् ॥ 3 ॥
मधुरं तव भाषणं प्रियं बहुभाषासु समानतो हि तत् ।
कुशला धिषणा किलोत्तमा समशास्त्रेषु समानतो गतिः ॥ 4 ॥
मनसा वचसा तथैकता दृढकायेन समानयत्नता ।
अत एव फलं च लब्धवान् किमकार्यं तव जीवने समग्रे ॥ 5 ॥
मधुराकृतिरेव भूषणं चरितं भूषितमेव साधुता ।
परवैष्णवधर्म आश्रितः सफलं जीवनयापनं तवैव ॥ 6 ॥
अधिकाञ्चि सुशिक्षणं तव प्रभुविद्यालयभित्तयो वदन्ति ।
सुरवाक्चतुरप्रचारणं शिरसा श्लाघनकारि साम्प्रतम् ॥ 7 ॥
बहुशिक्षकशिक्षणे पुरा तव पुर्यां बहु शस्यते बुधैः ।
अधिमानसशास्त्रबोधनं समशिष्यैरनुभूयते भृशम् ॥ 8 ॥
तिरुपत्यभिधायिपत्तने मधुरा वाक्प्रभुता महानघा ।
बुधकर्णरसायनात्मिका भवनेष्वद्य तवेव घुष्यते ॥ 9 ॥
कविता तव दण्डकान्विता रुचिशब्दैरथ चौजसा कृता ।

नतमस्तकसूरिमण्डली कविगोष्ठीषु चिरं च पठ्यते ॥ 10 ॥
सुखबोधनशिक्षका हि ते परमप्रीतिकरा हि साधवः ।
बहुशिष्यगणो विवेकवान् ह्यधिमुम्बापुरि भूरि शंसति ॥ 11 ॥
सचिवत्वपदेकुले स्थितं भवतश्शासनमेव काङ्क्षति ।
समबोधकबोधकेतरं ह्यधिसंस्थानजनं प्रशंसति ॥ 12 ॥
ननु शृङ्गगिरौ कृतं त्वया सुविशालं खलु खेलनाङ्गणम् ।
नयनैः करुणार्द्रितैः परैः परिश्यन्ति निकेतनानि च ॥ 13 ॥
गुरुवायुपुरे यदा तदा भवतश्शासनमीडितं बहुज्ञैः ।
मलयालवचोझरी सदा विदुषां तोषकरी प्रसन्नता ॥ 14 ॥
जयपूरकुलाधिपो यदासीः बहुषु क्लेशसमुच्चयेष्वपि ।
अतिगत्य हरेः कृपावशात् कृतकृत्यो विजयी तदाभवः ॥ 15 ॥
रणवीरनिकेतशासनं त्वभिवीक्ष्यैव तदीर्ष्ययेव वा ।
करुणाविमुखेन मृत्युना कबलीकृत्य भवन्तमन्वयात् ॥ 16 ॥
रघुनाथमुखाः कुलधिपाः गुरुप्रह्लादसुधीवरा अपि ।
वचसां भवदीयचातुरीं प्रविलोक्यैव विमुग्धतां गताः ॥ 17 ॥
नवभाषितभाषणैस्त्वया बहुसंस्कारविभूषितेन च ।
त्रिदशाधिकसेवया गिरां मधुगीर्वाणवचो हि वर्धितम् ॥ 18 ॥
उपषष्टिवयोतिकाले विजयश्रीरिति कान्तया वृतोऽसि ।
अधिगत्य च शास्त्रवारिधिं भुवि मेवाडपुरस्कृतोऽसि च ॥ 19 ॥
शम एव सुखस्य साधनम् इति सन्देशक ! देवनाथ ! मित्र !
वयमत्र तदेव मन्महे दिवि शान्तिश्च तथा तवास्तु च ॥ 20 ॥

***

# सखा गुरुश्च मे

**-आचार्यः राजन्. ई. एम्.**
क.जे.सोमैयासंस्कृतविद्यापीठम्, मुम्बई।

विदिते विबुधालयाकुले भुवि काञ्च्यामतिमोहने पुरे।
वरदाभिधदेववत्सलस्समभूत्भूसुरपण्डितर्षभः॥१॥
सकलेष्विह देवनाथभागवसन्मे गृहपार्श्ववर्तिनि।
प्रियबन्धुतया स्ववेश्मनि प्रियमाचर्य समस्तबन्धुषु॥२॥
वरदोत्तरभागवर्त्मनि स्वगृहे वासमसौ विधायत-
द्वरदेश्वरदर्शनाच्छनैरभवत्सर्वविदां महाग्रणीः॥३॥
प्रतिवासरदर्शनेननौ सहजं भूतलसख्यमैधत।
अमृतद्युतिकान्तिवत्सिते जलधेर्वीचिनिभं दिनात्यये॥४॥
फणिशास्त्रविशारदःपरं समभूच्छिक्षणशास्त्रकोविदः।
अपठत्स्वयमाङ्गलादिकं प्रथमं बालकपाठकोऽभवत्॥५॥
विधिवत्स्वयमागमादिकं हृदये स्वीयमनन्यचिन्तया।
वहनेन तथाक्रियां कृता गुरुरामानुजशास्त्रवेद्यभूत्॥६॥
अचलाधिपतेः कृपानिधेः वरदाधीशसमस्तदातृतः।
समनुग्रहमाप्य सङ्गतो जगतां नाथपुरीं स्वकर्मणे॥७॥
सुरवाणिसमस्तशास्त्रविच्छवशुरं पार्वतिसन्निभां प्रियां।
पितृमार्गचरात्मजन्तथा समवापात्मनि कन्यकाद्वयम्॥८॥
समवर्धतसाधुजीवनं परमोत्कृष्टपथेन जीवतः।
तदिहाभवदात्मने हितं परमाचार्यपदं निषेवितुम्॥९॥
अथ मे हृदि जातसौहृदं गुरुभावङ्गतमात्मकल्पितम्।
वयसाऽपि च बुद्धितस्तथा मम सोऽभूद्भुवनेऽग्रजात्मताम्॥१०॥
सकलाश्रितकल्पपादपं गुरुवाताधिपमाश्रितस्ततः।

समवाप्तकृपोऽगमत्कथं?श्रुतजम्मूपुरमीश्वरेच्छया॥११॥
बहुमानपदं बहुत्र सःकुलसाचिव्यकुलाधिपादिकम्।
समलङ्कृतसाधुजीवनस्सकलानां हृदयं गृहीतवान्॥१२॥
विविधोत्तमकर्मभिस्सदा परसन्तोषणमात्रतत्परः।
स्ववपुःपरिरक्षणन्त्यजन् निजलोकात्परलोकमाश्रितः॥१३॥
किमिदं बत कष्टमीश्वरः करुणायाः निधिरुच्यते वृथा।
भुवि निर्मलकर्मकारिणीञ्जनतां स्वर्गमहो नयन्नपि॥१४॥
वसुधैव कुटुम्बकं सदामनुषे सर्वहिते मुदा रतः।
किमु तामधुनैवसन्त्यजन् परलोके रतिमानभूस्स्वयम्॥१५॥
परिवारमचिन्त्यभूमिगं त्वयि मग्नप्रियमानसं कथम्।
गतवान्निजलोकवर्जितं परलोकं निजकार्यतत्परम्॥१६॥
भुवने निजकृत्यपूर्णतामधिगत्यान्यपरायणा वृथा।
निवसन्ति परित्यजन् हरे! निखिलांस्तान् किमुनीतवानमुम्?॥१७॥
अविचिन्त्य सुकार्यकर्मठं निजकार्येष्विह सामि साधितम्।
परसाह्यविधानतत्परं कथमेनं नयसि स्वमालयम्॥१८॥
कति सन्ति समस्तकर्मणि प्रभवस्ते त्रिदशालये प्रभो!।
विरला इह तादृशाःपरं परमार्थं न हि वेत्सि दिव्यदृक्॥१९॥
इहवर्तत एककल्पभाग्दिवि नानाविधकल्पपादपाः।
कथमेनमितोऽपिमूलतस्स्वयमुद्धृत्य दिवं प्रणीतवान्॥२०॥
न हि वच्मि विभो! कठोरतां परमेशाखिललोकपालक!।
तदपि प्रियमेकमेव नः प्रदिश त्वं हृदि दुःखमोचनम्॥२१॥

स्मरत सकललोकाः! कालिदासस्य वाक्य-
ङ्गतपरमरहस्यं तत्त्वबोधे समर्थम्।
मरणमिह रसायां वर्तते जन्मभाजा-
न्तदपि वरद! याचे देवनाथात्मशान्तिम्॥२२॥

# चिरं स्मराम्याचार्यरामानुजदेवनाथवर्यम्

**प्रो. सुकान्तकुमारसेनापतिः**
परीक्षानियन्त्रकः, राष्ट्रियसंस्कृतसंस्थानम्।

संस्कृताध्ययनार्थम् अहम् आन्ध्रप्रदेशस्य तिरुपतिक्षेत्रं प्रति 1983 तमे वर्षे जूनमासस्य 27 दिनाङ्के पुरुषोत्तमक्षेत्रात् (पुरीतः) यात्रारम्भं कृतवान्। तत्र तिरुपतिरेल स्थानतः विद्यापीठं प्राप्तवान्। ततः जुलाई प्रथमसप्ताहे प्राक्शास्त्रिकक्षायां प्रवेशं प्राप्य अध्ययनम् आरब्धवान्।
पूर्वजन्मसम्बन्धवशात् अनेकैः सिद्धैः सह सङ्गमः अभवत्। तेषु सर्वजनप्रियाः संस्कृतजगतः आदर्शभूताः आचार्यरामानुजदेवनाथवर्याः अन्यतमाः आसन्। अहं यदा शास्त्रिद्वितीयवर्षे 1986 तमे वर्षे आसम् तदा तैः सह मम परिचयः अभवत्। अप्रैलमासस्य एकस्मिन् भानुवासरे मध्याह्ने ते छात्रवासं प्रति समागताः। मां दृष्ट्वा अपृच्छन् अत्र शिक्षाशास्त्रविभागस्य एके आचार्याः डा . के. हैमवतीशमहोदयाः कुत्र तिष्ठन्ति? तेषां गृहं क्व वर्तते? अहं तान् द्रष्टुम् इच्छामि, अहम् अवदम् अहं जानामि। भवन्तं तत्र नयामि इति। ते अवदन् भवान् कथं मा प्रापयति? मया उक्तं द्विचक्रिकायाम् इति, भवान् द्विचक्रिकायाः चालनं जानाति किम्? आम् श्रीमन्! इति उत्तरं दत्तवान्। ततः 1987 तमे वर्षे ते संस्थानस्य पुरीस्थे केन्द्रीयसंस्कृतविद्यापीठे शिक्षाशास्त्रविभागे ( pedagogy) व्याख्यातृपदे नियुक्तिमलभन्त। ततः तैः सह मम सम्बन्धः निबिडात् निबिडतरः अभवत्। अनुकूलचिन्तकाः इमे सर्वैः सह उत्तमव्यवहारं कृत्वा सर्वेषां प्रियाः अभवन्। अहं यदा यदा शैक्षणिकगतिविधिषु प्रवृत्तः , सर्वदा आचार्यणां प्रेरणां प्राप्तवान्। शोधपत्रलेखने , पुस्तकादिलेखने, अन्यविधशैक्षणिककार्येषु समुदितजिज्ञासानामुपशमनेन सह गुणात्मक-परामर्शैः अहं सर्वदा अनुगृहीतः श्रीमद्भिः आचार्यैः।

मम कृते इमे आसन् प्रामाणिकाः वेद-व्याकरण-दर्शन-शिक्षाविशारदाः। सर्वकालेषु संस्कृतस्य विकासाय संस्कृतशिक्षायां गुणवत्तायै , संस्थानस्य, तत्परिसराणां च प्रतिष्ठायै सततं प्रयत्नशीलाः बद्धकटयश्च। आचार्याणां कार्यशैली सूतरां विलक्षणैव आसीत्। ते अध्यापक-आचार्य-प्राचार्य-कुलसचिव-कुलपत्यादिपदेषु निष्ठया कार्यं कृत्वा संस्कृतजगति कीर्तिभाजः अभवन्।

पुण्यश्लोकानामाचार्याणां व्यक्तित्वं शुद्धम् अपापविद्धं च आसीत्। तेषां प्रत्युत्पन्नमतित्वं शास्त्रेषु अप्रतिहतगतित्वम् अनितरसाधारणमेव आसीत्। संस्कृतकाव्यरचनायाम् ओजःपूर्णभाषणे , प्रशासने, शिक्षणे जवेन कार्यसम्पादने च आचार्याः विचक्षणाः आसन्। प्राच्यपाश्चात्त्यविद्ययोः समन्वयः आचार्येषु आसीत्। एतेषां व्यवहारकुशलता समयबद्धता कर्मनिष्ठता , विद्यानिपुणता प्रशासनदक्षतादिगुणाः अन्येषां कृते पाथेयरूपेण आसन्। सदा स्वाश्रितेषु प्रीतिः ज्येष्ठेषु आदरभावः भगवति भक्तिः च एतेषां नैसर्गिकः स्वभावः आसीत्।

संस्कृतशिक्षायाः विकासाय सदा अभिनवचिन्तनं समस्यानाम् आशु समाधानम् , संस्थायाः विषये अभिमानं सर्वेषां हितचिन्तनम् आदि दिवंगतानामाचार्याणामात्मगुणाः आसन्। संस्थानस्य परीक्षाविभागे परीक्षानियन्त्रकपदस्य कार्यभारग्रहणाय यदा अहम् अधिकारिभिः सूचितः तदा आदौ निराकृतवान्। तत् यदा तैः ज्ञातं ते दूरवाणीं कृत्वा अकथयन् अरे! सुकान्त ! भवता दायित्वं ग्रहणीयमिति कुलपतयः स्वयम् इच्छन्ति। अपि च अहम् अस्मि , भवता चिन्ता न कार्या। मत्तः सर्वविधं सहयोगं प्राप्स्यति। यावत् ते इह संसारे आसन् अन्तिमक्षणपर्यन्तं ते संस्थानस्य सर्वेषु कार्येषु सहयोगं कृतवन्तः। संस्कृतशिक्षाक्षेत्रे सदा चलद्विश्वकोष इव राजन्ते स्म , आचार्याणां कीर्तिशेषाः अनेके छात्रः आभारतं संस्कृतसेवायां सन्ति। इमे आचार्याः यद्यपि सम्प्रति इहलीलां त्यक्तवन्तः तथापि कालजयी पुरुषरूपेण सर्वेषां नो हृदि राजन्ते। विभूतिस्वरूपाणाम् आचार्याणां सत्कर्मणः बलात् ते दुःखस्वरूपं ससारं विहाय नित्यानन्दे परमपदे लीनतां गताः। तत्र भगवत्सान्निध्यं प्राप्य तत्सारूप्यमलभन्त इति विश्वसिमः।।

***

# सदाचारिणे आचार्यरामानुजदेवनाथाय ललितस्यानुभूतिः

**आचार्यललितकुमारसाहुः**
धर्मशास्त्रविभागः, राष्ट्रियसंस्कृतसंस्थानम्,
सदाशिवपरिसरः, पुरी

संस्कृतिप्रधानोऽयमस्माकं देशो भारतवर्षम् , यस्मिन् विविधाचारविचारवादव्याकुले संस्कृतिरुपादेयतामाप्नोति; या सर्वेषां स्वान्तःकरणे सद्भावाविर्भावपुरःसरं आत्महितं , विश्वबन्धुत्वं चादर्शत्वेनोररीकरोति। यस्मात् एष मानवः प्राणिश्रेष्ठः सन् आत्मानं पशुभ्यो व्यवच्छेदयति । कारणं मानवजीवनं न केवलं भोगार्थमेव, अपि तु आत्मोन्नत्तेः प्रमुखं साधनम्। आध्यात्मिकी भावना मानवं देवत्वं प्रापयति। अध्यात्मप्रवृत्त्या जीवनमुन्नत्तं भवति। येन सः प्रतिपदमानन्दमनुभवति। निखिलमपि संस्कृतवाङ्मयं व्याप्तं भावनयाऽनया। भावनैषा चेतः प्रसादयति , आत्मानं मोक्षाधिगमं प्रति प्रेरयति। एतादृशी या भावना गीतोपनिषदादिषु समुपलभ्यते, तस्याः महत्त्वं सर्वैरनुभूयते।

अनुभवजन्या बुद्धिरनुभूतिरिति वक्तुं शक्यते। अनुभूतिरियं आचारेण संभवा , यश्चाचारः कर्मेति उच्यते। यस्मिंश्च मानवस्याधिकारोऽस्तीति भगवता श्रीकृष्णेनोपदिष्टम्। एवं कर्त्तव्यभावनयाऽनासक्तेन च यत् कर्म क्रियते तत्कर्म कौशलमिति अभ्युपपद्यते। एतादृशं कर्म धर्मशास्त्रे सदाचार उच्यते। अस्य सदाचारस्य पालनेन जनः श्रेष्ठत्वं गुणोत्कर्षत्वं चासाद्यते , सदाचारेण संयुक्तो मानवः सर्वां सिद्धिं समधिगच्छति। सदाचारः सर्वेषां तपसां मूलम्। इत्थमाचारसम्भूता काचिदनुभूतिः आचार्यरामानुजदेवनाथविषये ममास्ति, या व्यक्तीक्रियते।

आचार्यरामानुजदेवनाथमहोदयैः सह साक्षात्कारो १९८७ संवत्सरे राष्ट्रियसंस्कृतसंस्थानस्य पुरीस्थश्री-सदाशिवकेन्द्रीयसंस्कृतविद्यापीठे जातः, यदा अहं शोधच्छात्रत्वेन शोधकर्मणि आत्मानं नियुक्तवान्। तस्मिन् वर्षे तैः सह अन्येऽपि भुवनेशोपाध्याय-रमेशकुमारपाण्डे-खगेश्वरमिश्र-अतुलकुमारनन्दप्रभृतयः अध्यापकाः नूतनत्वेन संस्थाने पुरीविद्यापीठे नियुक्ताः।

मम शोधनिर्देशका आचार्याः किशोरचन्द्रमहापात्रमहोदया आसन् , यैः सह आचार्यदेवनाथमहोदयानां संपर्कः घनिष्ठ आसीत्। गुरुभिः महापात्रमहोदयैः मम संपर्कः

देवनाथमहोदयैः सह सृष्टः। संप र्केण आचार: सिद्ध्यति। ते आचार्या: यद्यपि शिक्षाशास्त्रविभागीया आसन् तथापि तेषामाचरणेन अहमेवमाकृष्टो यत् प्रत्यहं तेषां दर्शनमाकांक्षितम् ।
मानवः समयस्य दासः , येन कर्मफलभोगाय १९८८ संवत्सरे सर्वकारीयनियुक्तिं संप्राप्य विद्यापीठं परित्यज्य कर्मक्षेत्रं गतवान्। इत्यवसरे सप्तवर्षाणि व्यतीतानि। ततः १९९५ संवत्सरे पुनः कृतकर्मणः फललाभाय राष्ट्रियसंस्कृतसंस्थानस्य पुरीविद्यापीठे अध्यापकत्वेन नियुक्तः। अतः क्रमशः देवनाथमहोदयानां स्थानान्तरकारणात्तिरुपतौ राष्ट्रियसंस्कृतसंस्थाने च दर्शनं प्राप्तम् । तेषां संस्थाने वर्षद्वयं कुलसचिवत्वेन सेवासमये बहुवारं साक्षात्कारो जातः।

कथनस्याभिप्रायो यद्बहुभिः सह जीवनयात्रायां मेलनं भवति , किन्तु एतैराचार्यैः सह मेलने सर्वथा सर्वदा च स्वतन्त्रमनुभूयते स्म। कारणं तेषां सदाचारः तानाचार्यान् पृथक्प्रदर्शयति स्म। अनुभूत्या प्रतीयते स्म यत् त एव वास्तवपक्षे मनुमतं प्रतिक्षेत्रं पालयन्ति स्म। यतस्तैः ज्ञातं सदाचारविहीनस्य सर्वैव क्रिया निष्फला एव भवन्तीति -

आचाराद्विच्युतो विप्रो न वेदफलमश्नुते ।
आचारेण तु संयुक्तः सम्पूर्णफलभाग् भवेत् ॥ (१/१०९)

इमे देवनाथमहोदया नैकेषु व्याकरण-वेद-कर्मकाण्डच्छन्दःशास्त्रेषु कुशलिनो विद्वांस आसन्। किञ्चैते संस्कृत-तमिल-हिन्दी-अंग्रेजी-तेलुगु-कनड-मालायालम-ओडिआदिभाषासु दक्षा विवेचिताः। यस्य फलस्वरूपं ते विभिन्नेषु अनुष्ठानेषु विश्वविद्यालयेषु च कुलपतिरूपेण , कुलसचिवरूपेण, प्राचार्यत्वेन आचार्यत्वेन च कार्यं कुर्वाणाः सर्वविधकर्मणः सुफलं प्राप्तवन्तः। पुनश्च अध्यापकत्वेन शोधकर्मण्युपदेष्टृत्वेन , विद्वत्सभासु आधारपुरुषरूपेण प्रवाचकत्वेन च आशानुरूपमजस्रं फलमधिगतम्।

कर्मफलमात्मानमनुधावति। यदि मानवः सत्कर्मप्रवृत्तः कर्म करोति , तर्हि निःसन्देहं कृतकर्मफलं समयानुसारं प्राप्नोति। यस्य फलञ्च एतैरपि प्राप्तम्। फलत्वेन अनेके उपादेयग्रन्थाः प्रणीताः प्रकाशिताश्च। नैकानि शोधपत्राणि बहुषु विद्वत्सभासु उपस्थापितानि यानि प्रतिष्ठितपत्रिकासु प्रकाशितानि। किञ्च बहुभिः पुरस्कारैः पुरस्कृताः। बहुप्रतिष्ठितानुष्ठानानां विद्यापरिषत्सु सभ्यत्वेन विनियुक्ताः। संस्कृतसाहित्ये व्याकरणे , निरुक्ते, छन्दःसि शिक्षाया -ञ्चैतेषां पाण्डित्यमुल्लेखयोग्यं विवेचितम्।

मानवजीवनं दीर्घजीवितस्योपरि प्रतिष्ठितं न भवति। मानवस्य समग्रमायु: तस्य कर्मण उपरि विविच्यते। यतस्तस्य जीवनस्य मूल्यबोधं तस्य कर्मणा उत आचारेण समाजो मिमीते। एतै: रामानुजदेवनाथमहोदयैरित्थमाचरणं प्रदर्शितं , येन जीवन्मुक्ता: सन्तः अपि बन्धुभिः सह राजन्ते। अतः इमे ममानुभूत्या यथा मया स्मर्यन्ते तथैव सर्वैरपि स्मरणीयाः स्युरिति आशासे।

परिशेषे जगतो नाथस्य श्रीजगन्नाथस्य सविधे पुरीवासित्वेन प्रार्थये , स भगवान् एषां महत्तां संस्कृतानुरागिणां व्यवहारनिपुणानामाचारवताञ्च रामानुजदेवनाथमहोदयानामात्मकल्याणं विदधात्विति ललितकुमारसाहुः।

***

# आचार्यदेवनाथस्मरणम्

**डा. हरिओमशास्त्री**
सहायकाचार्यः, शिक्षाविभागः,
रा.सं.सं., जयपुरपरिसरः, जयपुरम्

संस्कृतजगद्विश्रान्तानामाचार्यरामानुजदेवनाथमहोदयानां स्मृतिविशेषाङ्कसंस्मरणप्रेषणे सर्वप्रथममहं तान् साष्टाङ्गं प्रणमामि। प्रेतलोके परलोके को जाना तिति धिषणा ऽऽमुष्मिकं कल्याणमिह जिजीविषा मानवधर्मः। अस्मिन्नेव जीवनक्रमे भवन्ति बहवो ऽत्युत्तमा देवतुल्याः पुरुषाः। तेषां सान्निध्ये यदा यदा भवति वायुतुल्यवेगः, तदा तदा मनसि विचिन्त्य आगच्छन्ति नूतना विचाराः, एतादृशा आसन् व्यक्तित्वेन व्यवहारनिपुणा आ चार्यरामानुजदेवनाथमहोदयाः। मम पक्षत एकं संस्मरणं स्मर्यते, यदा वृत्तिविच्छेदकाले सम्पर्क अभवत्, तदा महोदयैरन्ततः पूर्णमनोयोगेन सम्बलनं प्रदत्तम्। किन्तु, यदा राजकार्येषु बाधा न स्यात्, तदा पूर्वपक्षः प्रशंसनीयः। विपरीतमेतत् सिद्धान्तपक्षमेवाश्रयते। सर्वत्र जीवने ज्वारमारावागच्छतः इति धिषणा तेषां कथनम्-भाग्यं फलति सर्वत्र। भवति स्म। इति श्रुत्वा ऽन्येऽपि विद्वांसः स्वतःप्रामाण्यं स्वीकुर्वन्ति स्म। तेषां स्नेहानुरागविषयाणामनेकान्युदाहरणानि काले काले मया ऽनुभूतानि। तेषां सम्बोधने एवाकर्षणं चुम्बकत्वरूपेण दृश्यते स्म। तेषां व्यक्तित्वे गुरुत्वाकर्षणं पूर्णरूपेणासीत्। शासने क्रियाप्रतिक्रियाश्च सिद्धान्तः पुनः पुनः स्मर्यते। शिक्षाया क्षेत्रे तेषामावर्तनं परावर्तनरूपेणासीत्, इति शिक्षाया उपक्रमः सर्वदा एव तेषां मुखे विराजते स्म। अन्ते तेषां जीवनचित्रणं प्रकृतौ एवमेवास्ति-

जलेऽपि सूर्यो गगनेऽपि सूर्यःसूर्यद्वयं चित्रमलं तनोति।
बिन्बं यदुच्चैः प्रतिभाति नित्यं निम्नास्पदं तत् प्रतिबिम्बमेति॥

इति पुनश्च साष्टाङ्गं प्रणमन्नमामि शिरसा इति डा. हरिओमशास्त्री।

***

# आचार्यदेवो भव

**डा. शिवरामभट्टः**

सहायकप्राध्यापकः, वेदव्याकरणविभागः

कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः

रामटेकम्, नागपुरम्, महाराष्ट्रम्

## प्रस्तावना

भारतीयसनातनसंस्कृतिपरम्परायां नैके महर्षयः कवयो विद्वांसः पण्डिताः शास्त्रज्ञा आचार्या वेदानां विविधार्थबोधकवाक्यानि आधृत्य स्वबुद्धिविकल्पेन नैकानि शास्त्राणि मतानि सिद्धान्तान् सम्प्रदायान् विद्याश्च प्राचीकशन् । तदेवोक्तं वाक्यपदीये ब्रह्मकाण्डे –

तस्यार्थवादरूपाणि निश्रिताः स्वविकल्पजाः।

एकत्विनां द्वैतिनां च प्रवादा बहुधा मताः॥ इति।

एतदेकं वैशिष्ट्यं भारतीयसनातनसम्प्रदायस्य यत् विविधतायामेकतेति। सम्प्रदायाः पद्धतयः जीवनशैल्यः भोजनभाषणव्यवहाररीतयश्च भिन्नास्सन्ति चेदपि सर्वेषामेतेषां लक्ष्यं धर्मार्थकाममोक्षपुरुषार्थचतुष्टयस्य सिद्धिर्वर्तते। अतो गमनमार्गा विविधाश्चेदपि गन्तव्यस्थानमेकमेव वर्तते । एतदेव मनसि निधाय विविधतायामेकता भारतीयता इति विश्वस्तरे भारतस्य वैशिष्ट्यं गुरुस्थानं च वरीवर्ति । पूर्वोक्तास्सर्वे महर्षय आचार्याः, तेषां मतानि सिद्धान्ताश्च पुरुषार्थचतुष्टयस्य साधनपूर्वकं समाजे उत्तमजीवनमुत्तमास्तित्वमेव बोधयन्ति ।

वेदोऽखिलो धर्ममूलमिति अभियुक्तवचनानुसारं सर्वेषां सम्प्रदायानां मूलं वेदा एव। ओंकारात्मकस्य ऋग्वेदादिप्रकारचतुष्टयस्य भगवतो वेदस्य अर्थमवबोधयितुं मानुषशेमुष्यशक्तत्वात् तच्छाखाः अङ्गानि उपाङ्गानि शास्त्राणि च प्रादुरभूवन्। वेदमूलकशास्त्रसम्प्रदाये दर्शनसम्प्रदायोऽप्यन्यतमः। आस्तिकनास्तिकभेदेन दर्शनस्य द्वैविध्यं प्रसिद्धमस्ति। आस्तिकदर्शनेषु द्वैताद्वैतविशिष्टशक्तिविशिष्टाद्वैतभक्तिविशिष्टाद्वैतादयोऽनेके सम्प्रदाया भारतीय-दर्शनपरम्परायां विराराज्यन्ते। तत्र विशिष्टाद्वैतसिद्धान्तस्य स्थापने कृतभूरिपरिश्रमेषु नाथमुनियामुनाचार्य-रामानुजाचार्यास्त्रय आद्यास्तपस्विन आचार्या मुख्या मन्यन्ते। तादृशविशिष्टाद्वैतसम्प्रदायमनुसरत्सु

आचार्येषु अस्मदाचार्या: स्वनामधन्या आचार्या रामानुजदेवनाथन्महोदया: शास्त्रगुरुसम्प्रदायलोकसेवातत्परा: महनीया अन्यतमा:।

आचार्यो नाम आचारं ग्राहयति, आचिनोति अर्थान्, आचिनोति बुद्धिं वा इति त्रिप्रकारकं निर्वचनं निरुक्ते प्रत्यपादि। तन्निर्वचनत्रैविध्यमप्यस्मदाचार्यविषये लालग्यते। उपनीय तु य: शिष्यं वेदमध्यापयेद्विज:। संकल्पं सरहस्यं च तमाचार्यं प्रचक्षते। आचिनोति च शास्त्रार्थमाचारे स्थापयत्यपि। स्वयमाचरते यस्तु स आचार्य इति स्मृत:। । इति स्मृतिवचनानुसारं अस्मदाचार्याआचार्यपदं वहन्ति न केवलमुपाधित्वेन रूपेणोपाधिम् ।

**कर्मठा आचार्या: -**

आचार्या: रामानुजदेवनाथन्महोदया: कर्मठा आसन्। गृहे शास्त्रोक्तं सन्ध्यावन्दनादिकं कर्मउद्योगक्षेत्रे शासनोक्तं च कर्म यथावेलं कुर्वन्ति स्म। प्रारब्धमुत्तमजना न परित्यजन्तीति सुभाषितस्य साक्षात्कार आचार्येषु परिदरीदृश्यते स्म। आफलोदयकर्माण आचार्या लक्ष्यसाधनाय छात्राध्यापकहितायसंस्थाहिताय परिवारहिताय च अहर्निशं परिश्रमं विदधति स्म। तेषां परिश्रमफलेन बहवश्छात्रा अध्यापका: प्रशासनं संस्थाश्च लाभान्वितास्सन्ति। शास्त्रोपासेवका: सुरभारतीसेवकाश्च इमे शास्त्राणां संरक्षणे सुरभारत्या: प्रचारे प्रसारे च निरन्तरं कार्यं, तन्निमित्तं प्रवासं च कुर्वन्ति स्म। बहवो विद्वांसो जना वा लोके स्थाय्युद्योगप्राप्त्यनन्तरं केवलं स्वकार्यं कुर्वन्त: सर्वं साधितमिव जीवनं यापयन्ति समाजे। परन्त्वस्मदाचार्या एतद्विरुद्धा आसन्। स्थाय्युद्योगे सति बहु कर्तव्यमिति मनसि धरन्त: सर्वहितं विचिन्त्यानवरतं कार्यं कुर्वन्ति स्माचार्या: । देशे विदेशे चाचार्याणां कर्मणा कार्यपद्धत्या वा प्रेरिता: प्रभाविताश्च बहवो जना आचार्यान् हृदयसिंहासने संरक्ष्य तदध्ययनाध्यापनप्रशासनभाषणादिषु कर्मसु तन्मार्गमनुसरन्तो दरीदृश्यन्ते ।

**बहुभाषाविद्वांस आचार्या:**

डा. रामानुजदेवनाथन्महोदया: बहुभाषाविद्वांस आसन् । आचार्याणां मातृभाषा तमिळुभाषा आसीत् । वृत्तिभाषा समादरणीयाभाषा चसंस्कृतम्आसीत् । व्यावहारिकी भाषा हिन्दी आङ्ग्लं च आसीत् । आचार्या विविधराज्येषु वृत्तिमकृषतेति कृत्वा तत्रत्या भाषा अपि ते मङ्क्षु अध्यगीषत । यथा – तिरुपतिस्थे राष्ट्रियसंस्कृतविद्यापीठे शिक्षाविभागे अध्यापनवृत्तिमकुर्वन्निति आन्ध्रप्रदेशे निवासकारणेन तेलगुभाषां भाषन्ते स्म । राष्ट्रियसंस्कृतसंस्थानस्य पुरीस्थे सदाशिवपरिसरे तत:

वृत्तिमकार्षुरिति उत्कलराज्ये निवासकारणेन उत्कलभाषां वदन्ति स्म ।तत: शृङ्गगिरिस्थे राजीवगान्धिपरिसरे प्राचार्यपदं व्यभूषयन्निति कृत्वा कर्णाटकराज्ये निवासकारणेन कन्नडभाषां भाषन्ते स्म । एवमनेकभाषासु भाषमाणानामाचार्याणां सर्वासु भाषासु समानं सामर्थ्यं समाना गतिश्चासीत् । वैयाकरणा वैदिकाश्चेम इति कृत्वा कामपि भाषां शुद्धां समुच्चारयन्ति स्म । तेषां वज्रकण्ठो विना ध्वनिवर्धकमपि सभायां कोणे स्थितमपि पुरुषं प्राप्नोति स्म।

**शास्त्रचुञ्चव आचार्या:**

अस्मदाचार्या व्याकरणाद्यनेकशास्त्रेषु कृतभूरिपरिश्रमा: शास्त्रचुञ्चवोऽधिगतान्तस्सत्त्वा: शास्त्रेषु प्रतिष्ठापितप्रतिष्ठाश्चासन् । मूलतो वैदिका वेदाध्यनेन सह व्याकजणाध्ययनमकार्षु:। अतो वेदे व्याकरणे च आचार्याणां प्रवृत्तिसमवायोऽविद्यत । व्याकरणशास्त्रं शिक्षाशास्त्रं चाधिकृत्याचार्याणां बहूनि पुस्तकानि शोधलेखा: पाठा: भाषणानि सान्द्रमुद्रिकाश्च वर्तन्ते । एवमेवाचार्या: सम्प्रदायप्राप्तं विशिष्टाद्वैतसिद्धान्तमप्यध्यगीषत । आचार्याणामध्यापनवृत्ति: शिक्षाशास्त्रे आसीदिति कृत्वा शिक्षाविदो महोदया अनेकेभ्यस्संशोधकच्छात्रेभ्यो मार्गदर्शनं व्यधु:। एवं व्याकरणविषयेऽपि बहुभ्यश्शोधच्छात्रेभ्योऽध्वदर्शनमकार्षु: । शिक्षाशास्त्रकोविदा आचार्या विशिष्य मनोविज्ञानिन इति संस्कृतलोके शिक्षाक्षेत्रे च प्रथिता अवर्तिषत । मनोविज्ञानिनोऽमी पुरतो विद्यमानस्य जनस्य मनस्सुलभतयाऽवगच्छन्ति स्म। एतदाचार्याणां वैशिष्ट्यमासीत् ।

**अध्यापनशैली** –

अस्मदाचार्याणामध्यापनशैली अनुपमा अनितरसाधारणा सरला स्ववगम्या चासीत्। आबालवृद्धं विषयबोधनक्षमता आचार्येष्वनुरक्ताऽसीत्। अचिरादेवशिक्षणक्षेत्रेप्रविष्टेभ्योबालेभ्य: किञ्चिदधिगतविद्येभ्यो बालकेभ्योऽधिगतशास्त्रेभ्यश्छात्रेभ्योऽध्यापकेभ्यश्च कथं बोधनीयमिति मनोविज्ञानिनोऽस्मदाचार्या: स्तरानुसारं च्छा त्रान् स म्यग्बोधयन्ति स्म। एतदतिरिच्य समाजे सामान्यानां संस्कृतानुरागिणां कृतेऽपि ते संस्कृतभारतीमूलकं विद्यापीठकमूलकं स्वयं वा संस्कृतवाङ्मयविषये वेदशास्त्रादिविषये प्रभावशाल्युद्बोधनं कुर्वन्ति स्म। येन जना: संस्कृतं प्रतिवेदशास्त्रादिकं प्रति आकृष्टा भवन्ति स्म। महोदयानां वैदुष्यं विषयतज्ज्ञतादिकमवलोक्य तन्मार्गदर्शने विद्यावारिधिं कर्तुं संशोधका: प्रतीक्षन्ते स्म। शृङ्गगिरिस्थे राजीवगान्धिपरिसरे व्याकरणाचार्यं कुर्वाणं माम् आचार्या विशिष्य संगणकमाध्यमेन वाक्यपदीयं ब्रह्मकाण्डमपीपठन्।

संगणकद्वारापि संस्कृतव्याकरणशास्त्रं पाठयितुं शक्यत इति मया आचार्याणामध्यापनमनु अज्ञायत। तादृशमध्यापनं मम जीवने प्रथमवारमासीत्। क्लिष्टं दुरवबोधमपि विषयमाचार्याः सरलपद्धत्या अवगमयन्ति स्मेति तेषां तद्वैशिष्ट्यम्। कश्छात्रः कक्ष्यायां विषयमवगच्छन्नस्ति को नेति छात्रमुखं दृष्ट्वैव आचार्या अवगच्छन्ति स्म। छात्रैः पृच्छयमाणानां जिज्ञासानां समाधानं विदधति स्माचार्याः। एवन्तेषां विशिष्टाध्यापनशैली सर्वैश्छात्रैरध्यापकैश्चानुकरणीया वर्तते।

आचार्या रामानुजदेवनाथन्महोदया वैयाकरणाः शिक्षाविदश्च सन्तः कवयोऽप्यासन्। आचार्याणां कविताकण्ठरवं श्रुत्वा सभा निश्शब्दं सश्रद्धं शृणोति स्म। विशिष्टच्छन्दोभिरपि आचार्याः श्लोकान् विरचयन्ति स्म। देशे प्रचलितेषु बहुषु कविसमवायेषु सहभागं गृह्णन्त आचार्याः सहृदयहृदयमाह्लादयन्ति स्म। श्लोकेषु समासघटितपदानां विशिष्टक्रियापदानां च समावेशो वरीवृत्यते स्म।

**अनुभवः -**

कर्णाटकराज्यस्य उत्तरकन्नडमण्डले यल्लापुरनामकोपमण्डले विराजमानायां श्रीमातृसंस्कृतमहापाठशालायां प्रथमातो विद्वन्मध्यमापर्यन्तं व्याकरणविषयमधीत्याग्रिमाध्ययनाय चतुरधिकद्विसहस्रतमे वर्षे राष्ट्रियसंस्कृतसंस्थानस्य शृङ्गगिरिस्थे राजीवगान्धिपरिसरे व्याकारणाचार्यनिमित्तं प्रवेशं स्व्यकार्षम्। षडधिकद्विसहस्रतमे वर्षे आचार्या रामानुजदेवनाथन्महोदयाः प्राचार्या भूत्वा राजीवगान्धिपरिसरं समायासिषुः। वस्तुतः स परिसरस्य स्वर्णयुगारम्भकाल आसीत्। तेषां प्राचार्यत्वे प्रशासनत्वे च शैक्षणिकपरिसर एकस्मिन्नेव वर्षे महतीमुन्नतिं प्रापत्। शैक्षणिकभवनं बालकानां बालिकानां च छात्रावासोऽध्यापकनिवास इत्यादीनि शैक्षणिकपरिसरस्य आवश्यकभौतिककार्याणि यथासमयं मङ्क्षु समपद्यन्त।

कार्येषु बहुषु सत्स्वपि तदस्माकं भागधेयमासीद्यत्साक्षात्कृतधर्मणामाचार्याणां मुखारविन्दाद्व्याकरणशास्त्ररूपाममृतवाणींश्रोतुमशक्यामेति। षडधिकद्विसहस्रतमे वर्षे ऐदम्प्राथम्येन आचार्याणां मार्गदर्शने आध्यक्ष्ये उत्तमपरिकल्पनायां च छात्रप्रतिभाप्रकाशनाय वाग्वर्धिनी-परिषदारभ्यत। तस्याः परिषदः अध्वदर्शित्वेन व्याकरण-विभागस्य सहायकाचार्याः डा. चन्द्रशेखरभट्टमहोदया आचार्यैश्चिता आसन्। एवमेवकार्यदर्शित्वेनछात्रप्रतिनिधित्वरूपेण च मम नियुक्तिः कृता आसीत्। अतआचार्याणां सान्निध्ये कार्यं कर्तुमितोऽप्युत्तमोऽवसरो मह्यं नासीदन्यः।

आचार्याणामुत्तममार्गदर्शने न सर्वविधकार्येषु सर्वैस्सह सामञ्जस्यं कथं सम्पादनीयमित्यादिकमभ्यास्यम्। वाग्वर्धिनीपरिषद्वारा विविधस्पर्धानामायोजनमकरवाम। छात्राणामध्यापकानां च विविधविषयकलेखोपेतां पत्रिकामेकाम् आचार्याणां मार्गदर्शने प्रथमवारं प्राचीकशाम। एवमाचार्याणां कृपाकदम्बकपूर्वकमुत्तमानुभवेन सह व्याकरणाचार्यं नेट्परीक्षां चोदातारयम्।

तत एकस्मिन्दिने उपाचार्यं गत्वा 'इत: परं किंकरवाणि' इति तानपृच्छम्। तेऽवदन्यद्जीवने एकवारं तिरुपतिविद्यापीठं गन्तव्यमिति। तत्र किं पठेयमिति पृष्टे सति शिक्षाचार्यं पठत्विति आदिष्ट: 'आज्ञागुरूणांह्यविचारणीया' इति विज्ञाय तिरुपतिं गत्वा शिक्षाचार्यमकार्षम्। तत आचार्याणां मुरलीधरशर्मणां मार्गदर्शने विद्यावारिधिं कर्तुं सूचित: तस्मिन्नेव समये तिरुपतिविद्यापीठे एव आंशुकालिकाध्यापकत्वेन व्याकरणविभागे नियुक्त:। ततो वर्षद्वयाभ्यन्तरे नागपुरस्थस्य कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य व्याकरणविभागे स्थायिपदं प्राप्नवम्।

एवं सप्तसु वर्षेषु गतेषु सत्सु षोडशाधिकद्विसहस्रतमे वर्षे डिसम्बरमासस्य चतुर्विंशतिदिनाङ्कत: दशदिनानि यावत्केन्द्रीयविद्यालयसंस्कृताध्यापकानां कृते जाते सेवाकालिकप्रशिक्षणवर्गे कार्यक्रमसंयोजकैराचार्याणामनुमत्या सूचित: पञ्चदिनानि आचार्याणां सान्निध्ये उषित्वा प्रशिक्षकेभ्यो निर्दिष्टपाठ्यक्रमं पाठयित्वा आचार्याणामाशीर्वादं प्राप्य स्वस्थानं प्रत्यागमम्। ततो मासाभ्यन्तरे जातामाकस्मिकीमिमां दुर्घटनां श्रुत्वा विचलितोऽभवम्। मनसि तीव्रवेदना समजायत। संस्कृतस्य तदाश्रितानां च बहूनां भविष्यं किं स्यादिति महान् खेदो जाजायत। नियते: कठोरे नियमे वयं समकुचाम। आचार्याणां रामानुजदेवनाथन्महोदयानामिहलोकत्यागेन नितरां संस्कृतलोक एव शोकतप्तोऽभवत्। संस्कृतक्षेत्रे तेषामतीवावश्यकता सर्वदाऽवलोक्यते। मम जीवने आचार्यै: कृतंमार्गदर्शनम् उद्बोधनम् उपकारश्च सदा संस्मर्यन्ते। तेषामिहलोके शरीराभावेऽपि मानसे सर्वदा निवसन्त आशीर्वादं कुर्वन्तो भवन्त्येवेति मे दृढो विश्वास आचार्येषु। आचार्यदेवो भव इति शम्।

***

## Devanathan – My Best Friend

S V R Murthy

It was 1987. A lease of fresh air blown through the Rashtriya Sanskrit Sansthan, an autonomous body under the MHRD, Government of India, across all its constituent Vidyapeethas (Campuses called at that time). It was the second glorious period in the history of the Sansthan as far as the bulk appointments are concerned. First was in 1980, when I joined the Sansthan at its PuriVidyapeetha. Second phase even overtook the first one and a host of young and enthusiastic Sanskrit scholars were given a chance to showcase their talent as Lecturers in their allocated Shastras, though most of them were experts in more than one Shastra like Ramanuja Devanathan. All of a sudden the PuriVidyapeetha came bustling to life with a lot of youthful energy, as so many young scholars like R. Devanathan, Bhuvanesh Kumar Upadhyay, Sudhesh Kumar Sharma, SarvanaryanJha, RampujanPandey, Sachhidananda Mishra, K. V. Somayajulu, J. Ramakrishna, Harekrushna Mohapatra, Khageswar Mishra, Atul Kumar Nanda, MinatiRath, Ramesh Kumar Pandey and Narottam Senapati etc. joined as Lecturers. Devanathan though a good scholar in Vyakarana and Darshana Shastras was given appointment in Siksha Shastri. The Principal was Dr. Harihar Jha, who should have felt lucky to have such a bunch of good Sanskrit scholars joining him to strengthen his hands. We – Bhuvaneshji, Devanathanji and me were called Trimurties passionately by Dr. Jhaji and KetakiNayakji and we along with Sudheshji were given prime role to play in the development of the Vidyapeetha. Devanathan was very clever, shrewd and diplomatic and always tried to satisfy all the stakeholders equally, which is indeed a rare trait. Devanathan was always helpful to the needy. He was a workaholic with untiring energy. He even took extra classes for Sahityastudents after his duty in his Department was over. He along with Bhuvaneshji and Sudheshji helped his Department and its students to be very strong. They always helped their HOD – A P Sachhidananda. Whenever somebody was in trouble, he used to be in forefront to extend all possible help. I had seen him helping so many colleagues financially. He was always positive and nobody had ever got a "no" from him.

He, along with Viroopaksha Jaddipal, was instrumental in bringing up all the important publications, which now the Sansthan boasts of!

He was very simple and never liked to be a showy one. He would forget eating and sleeping till the task he had undertaken was completed. How can I forget that one week he spent in the publishing house in that chilly winter to get my book, “SamudrikaShastra” printed!

He went on to become an Associate Professor to join TirupatiVidyapeetha and from there his life was drastically changed upwards and sky is the limit for him. He was instrumental in getting NAAC A grade for TirupatiVidyapeetha. He became indispensable along with ViroopakshaJaddipal for TirupatiVidyapeetha. Then one incident changed his life again and though he became a Professor in SikshaShastri Department of TirupatiVidyapeetha, he left it with a broken heart to join as a Principal in Rashtriya Sanskrit Sansthan, his parent organization. He served Shringeri Campus and was instrumental in its all-round development. He also served Guruvayur, Mumbai and Jammu Campuses. He served as the Registrar-in-Charge of the Sansthan for a brief period. Later he became Vice chancellor of Ramanandacharya Sanskrit VishwaVidyalaya, Jaipur. He served it with distinction for three years. He came back and joined to head Jammu Campus. He put his duty above his health even forget the family! He never unduly worried about it. He is an ardent lover of Sanskrit. I think he is the only Sanskrit scholar in the Sansthan, who have his children pursue their studies in Sanskrit. His son is a Vedic Scholar. His daughters studied in the Campuses of the Sansthan. He could get his eldest daughter married. He went away to Heavenly abode leaving his wife, son and daughter. Had he lived now, certainly he would have been in the chair of Vice Chancellor of a reputed Sanskrit University! It is a great personal double loss for me – first Bhuvanesh and now Devanathan. But it is an irreparable loss for Sanskrit World as it lost its great stalwart. It is an irreparable loss for Sanskrit students and others who rarely found such personalities like Devanathan who has a very rare quality found in the Sanskrit Scholars – Empathy! Yes!! You heard it right!!! He is the one who has been always in forefront to listen to their problems and to try to solve their problems satisfactorily. Really, very really, the Sanskrit World has become orphaned in his absence! May his soul be rested in Peace!!!

# DEAR DEPARTED

**Dr. Sharat Chander Sharma**
Associate Professor (Eng.)
Shri Ranbir Campus, Jammu

**THE BEGINNING**

*"NAMASKARAH SARVEBHYA"*

The big sound boomed and all conversation in the room ceased. A figure was standing in the doorway of the Conference Room – hair tied into a tight bun on the back of a powerful head, a holy design of *tilak* adorning a broad and high forehead, a long, salt-and-pepper beard covering the best part of his athletic chest, a long, immaculately white *kurta* and *dhoti*. "Professor Ramanuja Devanathan, our Registrar!!!" whispered the man sitting next to me. I hardly knew him, as I seldom took interest in the University administration, content with my class work and books. Loitering in the corridors of power had never been my pastime, so I was not well-versed in the 'who's who' of the university.

He came and ensconced himself in the chair opposite me – separated from me by the comfortable distance of the big table in-between. Face lit up with a beaming smile, he was asking about the well-being of all the guests present in the room. Throughout the encounter, he hardly deigned me a smile of recognition. But, I did not blame him; I had been an incorrigible recluse. But that gave me an opportunity of observing the Lion, at close quarters, without getting noticed.

Outwardly, he looked like a seer from the Vedic times. He exuded an air of holiness, an air of a Guru from an Ashram situated amidst woods adorned with perpetually verdant foliage. But what was he doing as a Professor in the air-conditioned New Delhi headquarters of Rashtriya Sanskrit Sansthan, the deemed university which prided itself on being the world's largest and country's only multi-campus Sanskrit University?

THE END

I touched the shrouded feet.

Immediately, I felt the chill of that moment – the chill of death, unmistakable, palpable. Had they kept him in the freezer? I had heard that they did, in case the body had to be kept for long without cremation. But he had arrived only three days back. I had been told, he along with Professor Sudesh Kumar Sharma and Professor Y.S. Ramesh, had had a refreshing sojourn at Valsad Ashram, and had reached Mumbai with them on January 4 in the afternoon. He had visited the famous *Siddhi Vinayaka* temple of Mumbai, before retiring to the Math, for the night stay because he would never stay in a hotel. He could only stay where a water-well was close by. He would not touch tap water, not even the water purified by an RO+UV water filter.

And yet he lay, shrouded, on a stretcher, in the back of an ambulance, while the soft Mumbai sea breeze played with the white fabric. All those present at the scene – Prof. Sudesh Kumar Sharma, Prof. Y. S. Ramesh, teachers of the Mumbai Campus – were paying tearful tributes to the dear departed. Even during his brief illness at Mumbai, he would impatiently urge the treating doctors to let him go as he had to perform *Shraddha* for his mother, Smt. Kanakavalli who had left the world this very day, a few years before, and now he had chosen the same day to join his mother in heaven!!!

THE MIDDLE

During one of his informal chats with me, he told me about the reasons for this tough vow. His tough lifestyle of piety was a commitment he had made to his father, Shri S. Ramanujacharya of Aheendrapuram (Cuddalore District) Tamil Nadu. He was a man of tradition, who followed a tough life-style himself, as ordained by his sect. Being at an advanced age, he was in a desperate need of care of young Devanathan. But still he refused to come to Puri and stay with him because his son was a jean-clad, fun-loving, young family man, given to leading a carefree life, often speeding on his scooter in the palm-tree lined roads along the long Puri beech. How could he come and stay with such a 'modern', irreligious son!

Finally, being a faithful and obedient son, Devanathan submitted to his father's wish and took up the religious vows of his cult and his father moved in with him at Puri. He was allowed to continue in the *Grihastha Ashrama* but his way of life as well as his appearance changed. He grew a beard which reached down to his

chest, and hair which he generally kept tied up in a tight bun on the back of his head. A big tilak adorned his broad forehead. His morning and evening hours were spent reciting shlokas and prayers in Sanskrit. He shunned his favourite pants, jeans, suits, and that time onwards, wore *dhoti kurta* only, but his great tastes showed in the exquisite quality of his new garments.

Some of the conditions imposed on him by the new discipline related to his eating habits too – he had to take only the food prepared by his wife or by himself, in totally hygienic conditions. Another requirement was never to drink tap water, only the water drawn from a well. He kept up those vows, even though with the passage of time and his father's blessings, he rose in his position in life in general and academic/administrative circles in particular. Starting as a teacher, he quickly rose in his career, within a service span of 33 years, from lecturer, senior lecture, reader, professor, principal, registrar, and reached the pinnacle of his illustrious career as a Vice Chancellor. He was fluent in Sanskrit, Tamil, Hindi, English, Telugu, Kannada, Malayalam & Oriya, authored 12 books in Sanskrit, 10 books on education, guided 14 research scholars, was a resource person at 200 seminars, served as member of numerous Academic Bodies of Universities. But such was his humility, that he was least perturbed when at the end of his tenure, he again joined the Rashtriya Sanskrit Sansthan as a Principal. Many would have looked upon it, as a sort of coming-down, but being a workaholic, he looked upon his new assignment as just another challenge, where he had to prove himself. And prove he really did!!!! And that was a blessing for us at Jammu Campus, because it was there that he joined after joining back as the principal. He arrived like a jet crash-landing at a village mud strip. He brought the same zeal and power and perfection, which he was wont to work with as the vice chancellor at his University. Unable to tolerate the bullock cart speed of the official processes, he took the matter straight into his hand. He was computer-savvy and often wrote and answered official mails himself straight from the computer in his office, much to the chagrin of the campus office. Even I was in for a pleasant surprise when I sent him an application via email requesting a casual leave, and pat came the reply in ten minutes, "your leave is sanctioned." And this, from scholar of Sanskrit from a traditional educational system!!! After that, most of our official communication was through modern means of emails

and WhatsApp messages. He often would ask me to give up my habit of seeking his permission when I had to enter his office. And there had been a time, when he flew into a terrifying rage when he found that a teacher had left the campus, casually dropping the leave application on his table while he was taking a class in the B.Ed department. He called the teacher concerned, who had travelled quite a distance in the public transport, and ordered her to be back at once. And what a tongue-lashing followed after that!!! All the staff took note of it, and mended their ways accordingly.

Although a firm, and at times hard taskmaster, his heart overbrimmed with love and affection. Once, a UGC peer team was about to arrive and I got late in the computer room preparing the necessary documents to be given to them. A teacher, who lived on the campus, saw my car still parked in the parking lot and came in to inquire what was happening, and then returned again with loads of refreshment for us. Prof. Devanathan was still in his office and when he was informed that I was still in the office working, he enthusiastically sent the snacks which were kept for visiting dignitaries. But more than the food he sent, I was struck by the fact that although he had no business to stay back so late, yet, being a perfect gentleman, he did not wish to leave, when we were at work for the betterment of the campus.

During his tenure at Shri Ranbir Campus, he introduced Annual Sanskrit Route March *(Shobha Yatra)*. The first one was held in Jammu City – starting from Indira Chowk, it passed through the renowned Raghunath temple and Raghunath Bazar, and culminated at Shri Ranbireshwar Temple. The second one was held at the historic Akhnoor town. In both of the Route Marches, the whole campus participated. 6 buses carried the students to Akhnoor. The impressive route marches raised loud slogans in favour of Sanskrit Language and drew a lot of public interest.

Another first by him was the introduction of day and night recitation (*Ashṭāyāma Pārāyaṇa*) of the Mantra at the campus in which the students and staff of the campus participated with great enthusiasm. Later, I learnt that it was for the first time that such an event was held in the state of the J&K. I feel proud to say that Prof. Devenathan entrusted me with the responsibility of conducting

the shobha Yatra at Akhnoor and one recitation event and was lavish in his praise for the way these events were organized by me and my team.

He was a man of many talents – a marvelous scholar, perfectly at home in Tamil, Hindi, Sanskrit, English, Telugu, Kannada, Malayalam and Odia, and the same time, equally well-versed in the intricacies of official and administrative work. This rare combination made him indispensable for the University Headquarters. This necessitated his frequent visits to various metropolises dotting the length and breadth of the country and these were the very places where wells with drinking water had become almost extinct. Whenever he travelled, he would carry such quantity of well water from his residence as would last for the duration of his journey.

Unfortunately, on that fateful journey, there had been some problem with his water supply and cooking arrangement. He had been surviving only lassi salt and sweet. He left Jammu on the 29th December and accompanied by Prof. Sudesh Kumar Sharma and Prof. Y.S. Ramesh, attended a seminar at Valsad Ashram. Then, along with them, he left for Mumbai where he had to chair an IQAC meeting, which I too had to attend.

On January 4th, he arrived at one of the most glamorous cities of India – the fabled city of Bombay, currently called Mumbai. But the myriad delights of the commercial capital of the country held no attraction for Prof. Devanathan. He paid obeisance at the famous Siddhivinayaka and other temples of the city and felt he had had a fulfilling journey. Fulfilling, indeed!!! He had had a fulfilling life, which was about to come to an abrupt end – an end which he refused to accept right till the end. Next morning, we, the members of the NAAC Steering Committee, gathered in the meeting hall, waiting for the meeting to begin. Principal, Professor Sudesh Kumar Sharma entered and said something about Professor Devenathan having fallen sick during the night, and started to talk to someone on the phone. We presumed that it was a case of indigestion or some ailment of similar nature and which would go away with some over-the-counter medicines. “You ask take him to a doctor first, and get him the treatment, and if the doctor allows only the bring him to the campus, please,” the Principal was overheard saying.

Then a look of exasperation came over his face. “Ok, then do as he says,” he said and terminated the conversation. “Gentlemen,” he said, addressing the members of the committee. “Professor Devenathan, the Chairman of the NAAC Steering Committee of the Sansthan, has fallen sick. I wanted him to be taken to the doctor first, but the Professor is asking to come to the campus, first and then be taken to the doctor, if the need arises. So, let us proceed to the Principal’s office complex, and see he is made comfortable there.

Mumbai Campus Principal’s office is located on the first floor in a building near the gate, close to the plot of land earmarked for the construction of Mumbai Campus building. That place was at least fifteen minutes walk away from our present location. We all rushed there with some members of the campus staff. A room was prepared in an antechamber of the office. A narrow bed was placed in it with cushions and a blanket. Some teachers were deputed to take turns to provide continuous care. After sometime, a vehicle entered the premises and Professor Devenathan alighted from it. Two teachers supported him, holding him between them. He was barely able to walk. With great difficulty he managed to climb the stairs. He was rushed straight to the makeshift bed and laid down. Immediately, a couple of teachers started massaging the soles of his feet and the palms of his hands. He was hyperventilating and shivering. As I stood near his head, he did not notice me. I was shocked because I had never seen him in such a condition.

I came out, wondering what had led to this. Soon, he came out again, supported by teachers who held him by the arms. As usual, he walked fast. He wanted to go to the toilet, but still he noticed me and said clearly, “Oh, Sharatji, you are here!!!” He sounded strong and eager, but there was a vacant look in his eyes, which was disturbing. It was decided unanimously that he needed to pay an urgent and immediate visit to the hospital for a detailed medical examination and treatment. The vehicle which had brought him was still there. He was escorted down, assisted by the teachers, and put on the back seat of the waiting vehicle. I also wanted to go, but the vehicle was already full with the local teachers, who knew the way around and were familiar with the hospital where he was being taken.

In the evening, we visited the campus again and were informed that he had developed an infection which had been aggravated due to a high blood sugar level and had affected his kidneys. His micturition rate had come down drastically. He had been admitted to the Intensive Care Unit of the hospital.

In the morning, I got a call from the Principal. He informed me that doctors had said that his condition was critical and his family members should be informed. His family was in Jammu, where I was serving and which, incidentally, was my home town too. He often used to give me the charge of the Jammu campus when he had to leave the station. I called up a female contractual teacher to go to his wife and inform her of the situation and if she wants we could make arrangements for their travel to Mumbai. She informed that the news had already reached the Jammu Campus and that she had already met his wife. The wife told her that his son, who was on his way to Sansthan Headquarters in New Delhi, has been asked to proceed to the IGI Airport New Delhi, where he would get his ticket to Mumbai, and that she would decide on the journey on the basis of the information her son gave on seeing his father. On visiting the hospital, I was informed that he had been put on dialysis. We were given an opportunity to visit him briefly one by one in the Intensive Care Unit. He was asleep when I visited him. I returned after having his darshan and doing a pranam. He seemed so distant, aloof, unmindful of what we all felt.

His son, Dr. D. Dayanath arrived in the evening and was straight driven to the Hospital. Later, we took him to the hotel where we were staying, so that he could rest and refresh himself. But hardly half an hour had passed that there was a call from the hospital – the doctors wanted to see Dayanath. We left hurriedly. Professor Sudesh was already there along with some other members of the Mumbai Campus staff. Both Professor Sudesh and Dayanath were whisked away in the lift. Later, I was told that he was required as there were some formalities to be completed, before his father could be put on ventilator.

I learnt that he had been conscious throughout. He was impatient with the doctors for having made an unnecessary fuss. He was convinced that there nothing seriously wrong with him and there was no need to hold him up as he was ok and he had to proceed to his home town in Chennai to perform the shraddha of his parents. When he saw his son Dayanath, he was surprised and

asked him how come he was in Mumbai as he had to go to New Delhi. And then he asked, “Have u got your tickets to New Delhi?”

At around, seven in the morning, Prof. Y.S. Ramesh came to our hotel room, with the news. Professor Ramanuja Devanathan had left for his heavenly abode. I called up the Jammu Campus to communicate the sad news. There was a gasp and sobs on the other end of the line. -------------------------

The engines of the plane roared as they generated their full take-off thrust, pushing the passengers of the Jammu bound flight deep into their seats, as the g-force mounted. I could see the buildings of the Mumbai airport receding at an ever increasing speed. The hurtling air craft shuddering and shaking as it gathered speed to reach the take off threshold. The luggage in the overhead bin started rattling with the vibrations. And then all vibrations suddenly ceased, as the aircraft tilted backward, lifting the nosewheel high in the air. Soon, the main undercarriage was also airborn, and the smoothness of the flight and consequent quietude in the cabin seemed uncanny – like the soul taking flight, leaving the earthly fret and fury down below, to join the wind, the sun, the moon, the stars, rising higher and higher towards the blue heaven.

The plane veered off to the left. That was unusual. Normally, it flies over the land, but I was seeing the dull green of the Arabian Sea under me. Far down below, the sunrays shimmered on the sea waves which looked incredulously tiny from that height.

Tiny and temporary, like the existence of Man in this world, as Professor Sudesh used to philosophize during his walks on the sea-shore in Puri. But could Professor Devanathan be described in those terms? Perhaps, yes – he was a human being, temporary, transitory, mortal, but what about the legacy he had left, what about the lives he had touched, what about the contribution he had made to the world of Sanskrit? What about the void he had left behind? How could be that to be described as ‘tiny and temporary’? What about the fact that although it is almost a year since he left, I find myself writing this piece about him at Kolkata Airport, waiting for my flight to New Delhi, on the way from Agartala to Jammu? There are things which lie beyond the pale of time……

## देशिकप्रणामः

**डा. जयकृष्णन्**
सहाचार्यः, शिक्षाशास्त्रविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, ;
मानितविश्वविद्यालयः, नवदेहली -110016

भगवद्पदे साम्प्रतं रममाणानाम् आचार्य रामानुजदेवनाथन् महाभागानां चरणयोः मे सादरा नतिः। न अयं जनः ततो अधीतविद्याः तथा अपि तिरुपतिविद्यापीठीयशिक्षाशास्त्रविभागेन आयोजितेषु नैकेषु कार्यक्रमेषु तिरुमलदेवस्थानाधिकारिणां नेतृत्वे समायोजित - संस्कृतषिक्षकसम्मेलने च श्रीमद्भिस्सह कार्यरतो भवितुम् अवसरो मह्यं लब्धः। सततं छात्रहिताय प्रयासरतानिमानाचार्यान् यदा शिक्षाशास्त्रिप्रवेशपरीक्षातितीर्षून् उद्बोधयितुं वयं प्रार्थितवन्तः तदा अतीववात्सल्यपुरस्सरं तां प्रार्थनामभ्युपगम्य अतिप्रातरेव ते नियमितरूपेण उपस्थिता अभवन्। वैयक्तिकजीवने अपि तेषां कारुण्यपूर्णवचांसि मत्प्रेरणायै उपकृतानि। प्रार्थये अखिलकल्याणगुणार्णवं नारायणं यत् देवनाथवर्यसदृ शानामाचार्याणां परोक्षानुग्रहरश्मयः सदा अस्मान् पुनन्त्विति सादरनमोवाकपुरस्सरम्, डा. जयकृष्णन्।

***

# आचार्यो देवनाथः

**डॉ. दे. दयानाथः**
सहायकाचार्यः (सं), वेदविभागः
राष्ट्रियसंस्कृतसंस्थानम्
श्रीरणवीरपरिसरः, जम्मूः – 181122
दूरवाणी – 9419295841
ईमेल – sridayanath@gmail.com





तमिलनाडुप्रदेशे कडलूर इत्याख्ये मण्डले अस्ति तिरुवहीन्द्रपुरम् इति ग्रामः। स च ग्रामः 108 श्रीवैष्णवदिव्यस्थलेष्वन्यतमो वर्तते। ग्रामस्यास्य पूर्वस्यां दिशि विराजते औषधगिरिः यत्र हि वासो भगवतः वेदपुरुषस्य श्रीलक्ष्मीहयग्रीवस्य। ग्रामस्य पश्चिमे प्रवहति गरुडनदी। ग्रामस्य मन्दिरे विराजते भगवान् विष्णुः देवनाथनामकः।

तस्मिन् ग्रामे श्रीरामानुजकनकवल्लीदम्पत्योः कनिष्ठकुमारत्वेन


Prof. V. Srivatsankacharya

क्रैस्ताब्दे 02.04.1959 तमे दिनाङ्के जनिमलभद् आचार्यः । पितृभ्यां तस्य बालकस्य नाम देवनाथ इत्यकारि । आचार्यस्य सार्धैके वयसि तन्माता दिवङ्गता । बाल्यादारभ्य गृहे आसीन्महत् कष्टम् । पित्रा साकं नैके ग्रामाः एतैः पर्यटिताः ।

सम्प्राप्ते वयसि उपनीतो आचार्यः मधुरान्तकग्रामे अहोबिलमठीयसंस्कृतपाठशालायां शिक्षार्थं प्रेषितः। आचार्यः बाल्यादेव कोलाहलप्रियः साहसप्रियाश्चासीत् । तस्मिन् ग्रामे या नदी प्रवहति स्म तत्र प्रत्यहं गत्वा स्नानादिनित्यक्रियाम् अकरोत् सः । तस्मिन् ग्रामे नद्यां यदा महान् जलप्रवाहः अभूत् तदा एषः महता उत्साहेन तत्रातरत् ।

अस्यां तरणक्रीडायाम् आसीन्नियमः यदि कश्चित् नद्याः पारं प्रथमं प्राप्नोति तस्मै एकाचत्वारिंशत्पृष्ठयुक्तपुस्तिका पुरस्कारत्वेन सहपाठिभिः दातव्येति । नात्र वक्तव्यमस्ति यदाचार्यः सर्वदैव विजेता आसीदिति । परं पाठशालायाः नियम आसीत् कोऽपि महाविद्यालयस्य विद्यार्थी नद्याः समीपं न गच्छेदिति । अहो ! न कश्चिन्नियमः आचार्यं बद्धुं समर्थः ! एवं न केवलं साहसक्रियायाम् अपितु शैक्षिकक्रियायामपि सर्वदा आचार्यः पुरस्कारं प्राप्नोत्, विशिष्य भाषणप्रतियोगितायाम् ।

विद्यालयशिक्षासमनन्तरम् आचार्यः व्याकरणशिरोमणिपठनार्थं चेन्नईनगरस्थे श्रीमद्राससंस्कृतमहाविद्यालयं प्राविक्षत् । तत्र व्याकरणविभागे आचार्याः आसन्महामहोपाध्यायाः राष्ट्रपतिसम्मानिताः अभिनवपतञ्जलिरिति ख्याताः प्रो . श्रीवत्साङ्काचार्यवर्याः ये आचार्यस्य मातुलाश्च आसन् । 'गुरुशुश्रूषया विद्या ' इति भणितिं सार्थकीं कुर्वन् सम्यगध्यगीष्ट आचार्यः । अद्यापि श्रीवत्साङ्काचार्यवर्याः सर्वदा भणन्ति यत्पठनकाल एव आचार्यस्य वैदुष्यं पर्यस्फुटत् ।

ततः तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठे शिक्षाशास्त्र्युपाधिं समवाप्नोत् । तत्र विख्याताः शिक्षाविदः प्रो . आर्.एन्. अरलिकट्टिवर्याः, प्रो . पेरि सुब्बरायन् वर्याः , श्रीनागमुनिरेड्डिवर्यादीनां सान्निध्यं प्राप्तमाचार्येण । 29.07.1981 तमे दिनाङ्के काञ्चीपुरस्थ-श्रीदण्डपाणिप्राच्योन्नतपाठशालायायां TGT (संस्कृतम्)पदे नियुक्तोऽभूत् ।

28.10.1983 तमे दिनाङ्के तमिलनाडुदेशे नावल्पाक्कम् इति विख्यातस्य श्रोत्रियग्रामस्य श्रीयज्ञवराहताताचार्य-कोमलवल्लीदम्पत्योः वसुमती नाम्नीं तृतीयां कन्याम् ऊढ्वा गार्हस्थ्यं प्राविक्षत्।

विद्यालये TGT पदे षड्वर्षाणि सेवां विधाय 15.07.1987 तमे दिनाङ्के राष्ट्रियसंस्कृतसंस्थानस्य श्रीसदाशिवपरिसरे सहायकाचार्यत्वेन नियुक्तिमलभत्। 'आत्मा वै पुत्रो जायते' इति शास्त्रवचनम् । 1987 तमे वत्सरे जगन्नथपुर्यां यदा आचार्यः नित्यकर्माङ्गतया श्रीवेदान्तदेशिकविरचितदयाशतकस्य पारायणं कुर्वन् आसीत्तदा 'पुत्रो जात ' इति वार्तां श्रुत्वा 'प्रजया हि मनुष्यः पूर्णः ' इति श्रुतिवचनमपि स्मृत्वा आत्मानं पूर्णं मत्वा आनन्दमवाप। भगवतः तिरुमलनाथस्य श्रीवेङ्कटेशस्यानुग्रहं मत्वा पुत्रस्य नामकरणमपि 'दयानाथ' इति कृत्वा हर्षमनवभूत्। आचार्यः सर्वदा माम् अवदत् – 'तव आगमनानन्तरमेव (गर्भे) मया अभीष्टः उद्योगः (संस्थाने) प्राप्तः, अतः त्वं गर्भश्रीमान् ' इति। समाजे दयानाथ इति आह्वयन्नपि सः गृहे तु 'कुट्टिप्पा' (छोटु इत्यर्थः हिन्द्याम्) इति नाम्ना व्याहरत्।





आचार्यः अपत्यत्वेन एकं बालकं द्वे कन्ये च प्रापत्। 1991 तमे वत्सरे 'अनुकम्पा' नाम्नीं ततः 1993 तमे वत्सरे 'अक्षया' नाम्नीं कनिष्ठपुत्रीं चालभत्। यदा कनिष्ठपुत्र्याः जन्म अभवत् तदा चिकित्सालये केचन उक्तवन्तः – अस्य (आचार्यस्य) द्वितीयं कन्यापत्यमभूत् अवश्यमेव एषः स्वपत्नीं त्यक्ष्यति इति वदन्तः आसन्। आचार्यः सहर्षम् अवदद्यद् – 'पुत्रो वा पुत्री वा, सर्वे भगवतः स्वरूपाः' इति। (तस्मिन् समये पुत्री जायते चेत् पतिः पत्नीं स्वगृहं नानयति स्म)

14.10.1997 तः 31.08.2005 पर्यन्तम् तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठे शिक्षाशास्त्रविभागे आसीदाचार्याणां सहाचार्यत्वेन आचार्यत्वेन च कार्यकालः । कार्यकालोऽयमाचार्याणां प्रोन्नतिपथे स्वर्णिमानि सोपानानि। विद्यापीठे प्रो . एस.बी. रघुनाथाचार्याः, प्रो. डी. प्रह्लादाचार्याः, प्रो. का.ई. गोविन्दन् इत्यादीनां यशस्विनां कुलपतीनां सह कार्यमकरोत् ।

01.09.2015 तमे दिनाङ्के पुनः संस्थाने स्वीयां सेवां प्राचार्यपदे दातुं समागात् । एतस्मिन् कार्यकाले एतस्य सेवाऽऽसीत् देहली-मुम्बई-शृङ्गगिरी-गुरुवायूरपरिसरे । सान्निध्यममुष्य संप्राप्य



धन्या अभवन् बहवश्छात्राः आचार्यानुरागिणश्च । आचार्याणां प्रो. राधावल्लभत्रिपाठिवर्याणां कौलपत्ये 30.09.2009 तमे दिनाङ्के संस्थानस्य कुलसचिवपदमलमकार्षीत् । तत्र सर्वोऽपि श्रेयः तदानीन्तकुलपतीनां प्रो . राधावल्लभत्रिपाठिवर्याणामेवेति सर्वदा निस्सङ्कोचं ब्रूते स्म ।

जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालये 28-04-2011 तः 27-04-2014 पर्यन्तं कुलपतिपदममण्डयत् । एतेषां कौलपत्यं विश्वविद्यालयस्य स्वर्णिमः कालः इति सर्वैः प्रशंसितः । कुलपतिपदमलङ्कुर्वन्नपि आचार्येण शास्त्रसेवा नैव त्यक्ता । आचार्यः प्रतिदिनं प्रातः व्याकरणं शिक्षाशास्त्रम् चाध्यजीगपत् ।

14.05.2014 तमे दिनाङ्के जम्मूस्थश्रीरणवीरपरिसरे प्राचार्यपदमलङ्कृतवान् । यदा कार्यभारं गृहीतवान् तदा आचार्यः सभायाम् अवदत् – 'छात्राः, अध्यापकाः, कार्यालयीयकर्मकराः यः कोऽपिवा भवतु सर्वेषां समस्यानां श्रवणार्थं यथामति परिष्करणार्थं च मदीय प्रकोष्ठस्य द्वारः सर्वदा उद्घाटित: भवति' इति । अहम् अचिन्तयं यद् – 'आचार्यस्य स्वरूपं मया अद्यावधि पितृत्वेन दृष्टः, अद्यारभ्य मया अधिकारिरूपेण द्रक्ष्यते' इति । परं मदीयं चिन्तनम् असत्यमभवत् । यतः आचार्याणां व्यवहारः परिसरे सर्वेषां प्रति पितृत्वेनैवासीत् । न कोऽपि भेदः मया अवलोकितः गृहे

यथा पुत्रेषु व्यवहरन्ति स्म तथैव सर्वेषां प्रति तस्य प्रीतिरासीत् । सर्वे चिन्तयन्ति यत् – 'आचार्यस्य मय्येव अधिका प्रीतिः वर्तते' इति । उदारचरितस्य आचार्यस्य तु 'वसुधैव कुटुम्बकमासीत्' ।

05.01.2017 तमे दिनाङ्के वार्तां श्रुतवान् यदाचार्यस्य शरीरस्वास्थ्यं सम्यङ्नासीत् अतः चिकित्सालये वर्तन्ते इति । अहं तु चिन्तितवान् – आचार्यः कदापि शीतज्वरार्थमपि चिकित्सालयं प्रति न गतवान् । तर्हि एवं कथमभवदिति । प्रो. वाई. एस. रमेशवर्येण सूचितोऽहं देहलीतः मुम्बईनगरं प्रति प्रस्थितवान् एवं विचिन्त्य 'आचार्यस्य महती समस्या किमपि न स्यात् अचिरादेव जम्मूनगरं प्रत्यागमिष्यन्तीति' । यदा एव 06.01.2017 तमे दिनाङ्के पितरं चिकित्सालये अद्राक्षं तेऽपृच्छन् – 'तव देहल्यां संस्थानीयकार्यमासीत् किल, अत्र किङ्करोषि' इति । मयोक्तं – 'भवतां दर्शनार्थमागतोऽहमिति' । झटिति अवदन् – किं रे, अहं तु श्वः जम्मूनगरम् अगमिष्यामि खलु, भवता वृथैव एतावान् प्रयासः विहितः' इति । 07.01.2017 तमे दिनाङ्के आसीत् मम पितामहीनां वार्षिकश्राद्धम् । तदर्थं जम्मूनगरे सर्वा अपि व्यवस्था कृत्वा गतवान् आचार्यः । अत एव आसीत् आचार्यस्य त्वरा जम्मू गन्तव्य एव इति । मयोक्तं – तात ! जम्मूनगरमेव गन्तव्यं किल, मिलित्वा गच्छाव' इति।

07.01.2017 तमे दिनाङ्के प्रभाते चिकित्सकः अवादीत् यत् - एतेषां शरीरस्य स्थितिः सम्यङ्न भासते इति । प्रातः 8:00 वादने दुःखदां वार्तां श्रुत्वा अशनिहतवृक्ष इवाभवमहम् । संस्कृतजगतः दीपस्य रश्मिरस्तङ्गता । परमवैष्णवाः आचार्याः श्रीमन्नारायणसायुज्यमवाप । इतः परं को वा मां प्रीत्या 'कुट्टिप्पा' इति आह्वयति । पितृत्वेन को वा माम् आदिशति । गृहे परिसरे च को वा मां प्रीत्या तर्जयति । मत्पितुः मन्दहासः कुत्र कदा वा अहं पश्यामि ।

***

# लीनोऽसि कुत्र प्रभो ....!

**डा. प्रियव्रतमिश्रः**

--सहायकाचार्यो व्याकरणविभागे

श्रीरामसुन्दरसंस्कृतविश्वविद्याप्रतिष्ठानम्, रमौली

दरभङ्गा- ८४७२०१ (बिहारम्)

M- 9939622062 Email- shabda.priyavrat@gmail.com

लिखेलिमं ननु किम्....... ? किमात्मगतमभिप्रैमि....... ? कुत आरभे........ ? सर्वं शून्यं भासते मे। वेपथुश्च शरीरे मे रोमहर्षश्च जायत इति स्थितिः मामकीना। किं सम्बोधयामि.....! मम गुरवः। ममाध्वदर्शकाः। मम हितैषिणः। किञ्च यदि गुरुः पितृत्वेनाभिधीयते सनातनसंस्कृतौ चेन्मे पितरः। एतदतिरिच्यापि यदि स्थानमस्ति चेत् तत्पदेन सम्बोधनीयास्ते। नास्ति मयि शब्दसञ्चयस्तान्व्याख्यातुम्। तेषां व्यक्तित्वं परिचाययितुम्। यद्यप्यस्ति परिचिचायिषा तथापि मे सामर्थ्याभावः। हे भगवन् ...! देहि मे सामर्थ्यम्। न विश्वसितुं प्रभवामि साम्प्रतमपि। चकासति ते स्मेराननं सततं मे अक्ष्णोः पुरस्तात्। प्रत्यहं सम्भावये तेषामागमनं नवदेहलीस्थं राष्ट्रियसंस्कृतसंस्थानं प्रति। यदा ते परीक्षाविभागं समेत्य हस्तमुन्नीय आरात् स्नेहासिक्तेन स्वरेण ब्रुवन्ति स्म प्रियव्रत...........! इति। भाति तेषां स्मितहासविलासितमाननं लालनं पालनं सर्वदैव सर्वथैव।

ऐदम्प्राथम्येन यदा २००३ तमे सम्वत्सरे उपशास्त्रिपदवीमवाप्य शास्त्रिकक्ष्यायां प्रविविक्षया सुदूरात् ओडिशाराज्यात् (सम्बलपुरमण्डलात्) समागमं तिरुपतिं प्रति तदा तत्रस्थं सर्वविधसौविध्यं वैभवं शिक्षणं दृष्ट्वा सन्तुष्टान्तरङ्गोऽभूवम्। तेषु दिवसेषु आचार्याः तत्रैव विद्यापीठे शिक्षाशास्त्रविभागे उपाचार्यरूपेण विराजमानाः छात्राणां मनस्सु राराज्यन्ते स्म। यद्यपि तदा शिक्षाविभागेन सह नासीन्मे कथञ्चिदपि संश्लेषस्तथापि एकदा सत्यवसरे तद्दिशमयासिषम्। तदा कश्चिदतिकेशी श्मश्रवावृतमुखेन समागात् स्वकीयेन द्विचक्रिकायानेन। पार्श्वस्थितं मत्सखायमप्राक्षं क एष इति। तदा ओष्ठयोरङ्गुलिमाच्छाद्य स अब्रवीत् ..एते भवन्ति

***R.Devanathan*** महोदयाः शिक्षाशास्त्रविभागे प्राध्यापकाः। नैकेषु शास्त्रेषु प्रवीणाः। वेदच्छन्दनिरुक्तव्याकरणवेदान्तादिषु शास्त्रेष्वेते पारदृश्वन इत्यवोचन्मन्मित्रम्। तस्य वाचं निशम्याश्चर्यचकितोऽहम्। यतो हि ततः पूर्वं तादृशस्य वैदुष्यस्य विषये न जातुचिदश्रौषं न वाऽऽवालोकयम्। तदा कुतूहलेनाप्राक्षमनृतमाह ननु ! तदा गम्भीरमुद्रयावादीत् सत्यं भोः! तादृशास्त इति। तदा आरभ्य न जाने मे मनसि किमप्यलौकेकी श्रद्धा जागृता तेषां विषये। ततोऽहमप्राक्षं **"R"** देवनाथन् इत्यत्र **"R"** इति पदेन किमभिधीयते ? तदा स उक्तवान् ***Rapid*** देवनाथन् इति। कृत्स्नमपि कार्यं जवेन कुर्वन्तीति कृत्वा तत्र तन्नाम्ना तेऽभिधीयन्ते स्म। वस्तुतः **"R"** इत्यस्य "रामानुज" इत्यर्थः कालान्तरे अवागमम्।

सिंहशावक इत्युदाहरणं तेषु स्पष्टतया अन्वेति स्म। तेषां गतिः मुखं गाम्भीर्यं सामर्थ्यं सकलमपि तत्त्वं तेषु सार्थकतां भजते स्म। ततः वर्षत्रयं तिरुपतिविद्यापीठेऽयापयम्। नैकधा तेषां वाग्वैखरीनिर्झरीमश्रौषम्। २००६ तमे संवत्सरे शास्त्रिपदवीमाप्नुवम्। ततः शिक्षाशास्त्रिप्रवेशपरीक्षायां शृङ्गेरीस्थराजीवगान्धीपरिसरे स्थानमध्यकार्षम्। यद्यपि तिरुपतिविद्यापीठेऽपि मदीया चितिस्समजायत (तेषु दिनेषु पृथक् प्रवेशपरीक्षा भवति स्म विद्यापीठेषु) तथापि न जाने दैवयोगात् अहं तिरुपतिं विहाय शृङ्गगिरिमव्रजम्। दैवयोगादिति कथने उभयथा मेऽभिप्रायः। एकस्तु भगवदिच्छया अपरस्तु गुरुचरणानां सान्निध्यम्। यतो हि तेषु दिनेषु गुरवः शृङ्गगिरिमयासिषुः प्राचार्यत्वेन। वीक्ष्य तान् तत्र पुलकितमनाऽभवम्। शिक्षाशास्त्रकक्षायां द्वित्रवारमध्यापयन्। तेषां वाणीं श्रोतुं न जाने चातकसमास्समेऽपि भवन्ति स्म। ततः अपरस्मिन्संवत्सरे पुनः आचार्यं पठितुं यद्यपि तिरुपतिस्थानकं गन्तव्यमासीत्, तथापि न वेद्मि मे मनः शृङ्गगिरिं त्यक्तुं नाङ्ग्यकार्षीत्। अतः २००७ तमे संवत्सरे राजीवगान्धीपरिसरे प्राविशमाचार्यकक्षायां महतोत्साहेन शास्त्रपिपठिषया। प्रत्यहं प्रभाते आचार्याणां दर्शनमात्मतोषाय भवति स्म। शृङ्गेरीपरिसरे इयं खलु रीतिर्यत् ९.४५ वादने प्रार्थना १० वादनात् कक्ष्याः। समेषामाचार्येषु तथा भक्तिरासीत् यदनुक्त्वापि सर्वे सदस्याः छात्राः अध्यापकाः इतरे कर्मचारिणः समये उपतिष्ठन्ते स्म। परिसरस्य परिवेशश्चिन्त्यतान्तावत् आश्रमवदासीत्। सर्वे अध्यापकाश्छात्राश्च अहमहमिकया स्वकर्त्तव्ये निरता आसन्। तत्र खलु परिसरे संस्कृतसप्ताहाद्युत्सवो महोत्सवत्वेन

परिपाल्यते स्म । तदानीं खलु परिसरे वाग्वर्धिनीपरिषत्, व्याख्यानमाला, शास्त्रार्थपरिषत् इत्याद्योऽनेकाः परिषदः चरितार्थतां गताः ।

मध्येकालम् आचार्या गुरुवायूरपरिसरं प्रति स्थानान्तरणमवाप्यायासिषुः प्राचार्यत्वेन । ततः वर्षं तत् क्रमेण व्ययापयम् ।अपरस्मिन् वर्षे आचार्याः पुनः शृङ्गगिरिमायन् । सौभाग्यात् तस्मिन् संवत्सरे आचार्या अब्रूवन् यदहमपि पाठयामि व्याकरणमिति। तत आचार्यद्वितीयवर्षीयानस्मान् वाक्यपदीयमपाठयन् ।आचार्याणां पाठनशैली किञ्चित् भिन्नैवासीत् । प्राचार्या आसन् अतः प्राशासनिककार्येण व्यापृतास्सन्तोऽपि शनिरविवासरयोरस्मान् पाठयन्ति स्म ।अधुनापि स्मरामि वाक्यपदीयस्याद्यां कारिकाम्-

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरमिति.........।**

आधुनिकोपकरणमुपयुज्य **(Projector)** कथंकारं शास्त्रं पाठनीयमित्यैदम्प्राथम्येन आचार्यान् दृष्ट्वा ज्ञातवान् । प्रतिपदं विगृह्य तस्य नानार्थान्प्रतिपाद्य प्रकृते कस्मिन्नर्थे पर्यवस्यति पदं तदिति विचार्य प्रस्तुतिर्नितरां हृदि चित्रवदुपतिष्ठति साम्प्रतमपि । सततं ते शास्त्राध्ययनाय प्रेरयन्ति स्म भारतीयपरम्परां च स्मारयन्ति स्म । तान् वीक्ष्य मनसि स्वत एव भावना जागर्त्ति स्म । दक्षिणाम्नायस्य शारदापीठस्य जगद्गुरुणां भारतीतीर्थपादानामत्यन्तं प्रेष्ठा आसनाचार्याः । तेषां पुरस्तात् वचनं नाम अत्यन्तश्रेयसे भवति । तानपि स्ववचोविन्यासेन सन्तोषयन्ति स्म । आचार्याणां विषये यदा खलु चिन्तयामि तदा मे मनसि स्फुरति उत्तररामचरितस्य पद्यमिदम्-

**“ लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति”**

नूनमाचार्या लोकोत्तरा एवासन् । कदा किं चिन्तयन्तीति कोऽपि ज्ञातुं न शक्नोति स्म । परिसरे वार्षिकोत्सवस्य समय आसीत् वार्षिकोत्सवे च जगद्गुरवः समायान्ति परिसरमिति प्रथा शृङ्गेरीपरिसरस्य । तस्मिन् संवत्सरे केनचिदतिथिनापि आगन्तव्यमासीत् । समारोहस्य प्रभाते एव समसूचयन् यद् शास्त्रीयवाक्यार्थः प्रस्तोतव्यो जगद्गुरुणां पुरस्तात् अतिथीनां पुरस्तात् । किंकर्त्तव्यविमूढोऽहं मनस्यचिन्तयं यत् “ वैयाकरणखसूचिः” इति वचनं नूनमत्र चरितार्थतां जिहीते ।ततः मनसि धैर्यं सम्पाद्य वाक्यार्थं प्रास्ताविषम् एकेन मित्रेण पूर्वपक्षित्वेन ।

तत आचार्यद्वितीयवर्षस्यान्तिमसमये काचित् दुर्घटना घटिता येन विचलितोऽहं खिन्नमनस्कः समभवम् । तदा आचार्या मामाहूयाबोधयन् यत् जीवने एवंविधाः घटनाः भवन्त्येव तेन न

विचलनीयं प्रत्युत स्वलक्ष्यपथि सर्वदा यत्नशीलेन भाव्यम् । त्वं हि साम्प्रतं संस्थानस्य सर्वेषु परिसरेषु अधिकानङ्कान्प्राप्य प्रथमे स्थानेऽसि, अस्मिन्वर्षेऽपि सम्यक्पठनीयं सम्यगङ्कान्च लभस्व त्वयि मे द्रढीयसी प्रतीतिर्विद्यत इति ।

आचार्याणां वाचं श्रुत्वा पुलकितमनाहं सर्वं कष्टं विस्मृत्य स्वकर्मणि निरतोऽभूवम् । **ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावतीति** भवभूतिवचनं पुनरत्र चरितार्थतां गतम् । तस्मिन् संवत्सरे संस्थाने सर्वाधिकान् अङ्कान् प्राप्य प्रथमस्थानमवाप्नुवम् ।तस्मिन्नेव वर्षे JRF उपाधिमपि प्रापम् । मनस्यासीत् यत् पारम्परिकव्याकरणस्य आधुनिकेन विज्ञानेन सह अनुसन्धानं विधेयमिति । अतः PhD निमित्तं IIT Bombay गन्तव्यमिति । तत्र JRF अपि व्याज आसीत् । परन्तु विधेर्विधानमन्यदेवासीत् आचार्याणां कृपाकटाक्ष मयि अपप्तत् । एकदा आहूय मामप्राक्षन् किं करिष्यत्यग्रे इति । तदा आत्मगतं कूलङ्कषमवोचम् । तदा आचार्या ब्रुवन्ति-

अद्यत्वे गुरुमुखात् शास्त्राध्येतारो न्यूना एव दृश्यन्ते। त्वं हि विधिवच्छास्त्रमध्यगीष्ठाः कुतो न शास्त्रे इतः प्रवृत्तिः ? कालान्तरे तु भवान् तस्यां दिशि शोधकार्यं कर्त्तुं प्रभवति । एहि शास्त्रे एव अनुसन्धानं विधेहि इति । तदा स्वमार्गदर्शने मां पर्यपालयन् । तेषां पर्यवेक्षकत्वे यद् किञ्चित् ज्ञातुमशकं तदेहि मे स्वरूपम् ।

वक्तव्यं बहु विद्यते । " गागर में सागर" इति आभाणकं मे मनसि स्फुरति सद्यः । तेषां गुरुगरिमाणं महिमानमुदीरितुं नाहं समर्थः। संस्कृतजगत् प्रति किमवदानं तेषामिति सम्पूर्णसंस्कृतसंसार एव तत्र साक्षीभूतः । आचार्याणां कर्त्तव्यनिष्ठा तेषां चरित्रं कार्यशैली वाग्मिता विषयेष्ववगतिः संस्कृतं प्रति प्रीतिः शिष्येषु वात्सल्यं कर्मचारिषु समभावः आर्त्तानां साहाय्यं नूनमाचार्यान् अजरममरमकरोत् । यदा खलु संस्कृतस्य अधुनातनैतिह्यं लिख्यते आचार्याणां नामधेयं सुवर्णाक्षरैः सर्वाग्रे स्थास्यतीति द्रढीयान् विश्वासः ।

**साङ्गं वेदमधीत्य शास्त्रनिचये निष्णातवाग्मी पुमान्**
**अर्वाचीनकलासु कौशलमहो! भूयो रतश्शुद्धधीः ।**
**लोकेऽजातरिपुर्विशालहृदयस्स्मेराननो राजते**
**त्वार्त्तत्राण ! गुरो ! विहाय विधुराँल्लीनोऽसि कुत्र प्रभो !**

॥ ॐ वक्रतुण्डाय नमः ॥

# भजेऽहं भजेऽहं सदा तेऽङ्घ्रिपद्मम्

**डा. विनायकरजतः**[1]

सन्ति बहवो मेऽनुभवाः आचार्यप्राप्तानुग्रहाश्च येषां सङ्ग्रहमात्रं ग्रन्थमेकम्प्रकाशयेत् । तेषु केचनात्र मया अमुष्मिन् लेखे उल्लिख्यते ।

## प्रथमं दर्शनम्

"विनायक ! हे३ विनायक ! आयाहि , धाव, अद्य RD वर्यः भाषते । त्वया अवश्यं श्रोतव्यम्" इति वदन् मे ज्येष्टः धवन्निव अग्रे अचलत् । तदाऽहं राष्ट्रियसंस्कृतविद्यापीठे प्राक्शास्त्रीकक्ष्यायामासम् । सर्वान् अध्यापकान् न जानामि स्म । अतः अप्राक्षं तं ज्येष्ठम् –

अहम् – कोऽयं RD ??

ज्येष्ठः – RD इत्यस्य Rapid Devanathan इत्यर्थः ।

अहम् – (सविस्मयम्) Rapid Devanathan??? कीदृशमेतन्नाम ?

ज्येष्ठः – त्वं स्वयमेव ज्ञास्यसि । आयाहि त्वरितम् ।

अहम् – क्व गन्तव्यम् ?

ज्येष्ठः – प्रकोष्ठसङ्ख्या 116 (सभाप्रकोष्ठः) । मा विलम्बस्व । स्थानं न प्राप्स्यसि उपवेष्टुं स्थातुं वा ।

वचनमिदं श्रुत्वा आश्चर्यमन्वभवम् । एवमपि स्याद्वा यत्कस्यचिद्भाषणं श्रोतुं स्थानं रक्षणीयं भवेत् ? एवं चिन्तयन्नेव अहमपि तेन सह आशु ११६ प्रकोष्ठं प्राप्नुवम् । वस्तुतः आसीन्महान् सम्मर्दः । तथापि सौभाग्यवशादासनमेकं प्राप्तम् । किञ्चिदपि यदि विलम्बोऽभविष्यत् उपवेष्टुं स्थातुं वा स्थलं नाभविष्यत् ।

RD वर्यः कस्मिन् विषये भाषते इति पार्श्वोपविष्टं ज्येष्टमप्राक्षम् । सोऽवदत् – " RD वर्यः स्वागतं करिष्यति कार्यक्रमपरिचयं च कारयिष्यति" । महान् मे विस्मयः । स्वागते परिचये च को विशेषः स्यात् यच्छ्रोतुं जनसमूह एवात्र एकत्रितः अस्ति इति । अस्तु पश्यामः इति विचिन्त्य मौनमाश्रितवान्

[1]Assistant Professor, Chinmaya Vishwavidyapeeth, University for Sanskrit & Indic Traditions, Kerala

। कार्यक्रमः प्रारब्धः । मङ्गलाचरणादिकं समाप्तम् । अथ स्वागतभाषणसमयः । सर्वत्र शान्तिः प्रसृता । ये केऽपि मन्दं भाषमाणाः आसन् तेऽपि मौनाः अभूवन् । तत मञ्चे उदस्थात् कश्चित् पुरुषः , पुरुषः इति कथनं न सङ्गच्छते "पुरुषसिंहः" इति वचनं वरम् । तथा आसीत् तस्य व्यक्तित्वम् । दीर्घाः सिंह इव श्मश्रवः । विस्तृतः ललाटः । ललाटे ऊर्ध्वतिलकम् । बद्धशिखः । जुब्बाधारी । अधः धौतवस्त्रम् । साक्षात् सिंह एव पुरत तिष्ठति इति भाति स्म । यद्यपि कृष्णवर्णीयः सः तथापि तस्मिन् विद्यमानः विश्वासः तत्तेजश्च तन्मुखं द्योतयति स्म । तन्मुखात् वाणी निःसृता । प्रतीक्षितः कालः सन्निहितः । स आदौ वेदमुपास्य तत हयग्रीववन्दनामकार्षीत् । तत आरब्धं सिंहस्य गर्जनम् । आह्!!!आह्!!!!! वचनानि न सन्ति तस्य गाम्भीर्यं वर्णयितुम् । सर्वेऽपि सन्देहाः दूरीकृताः अभूवन् तद्वचनैः । संस्कृतगिरा कश्चित् तथा वेगेन ओघपूर्णं भाषितुमर्हति इति ऊहितुमपि असमर्थः आसमहम् । तदपि स्पष्टम् । नासीदमूलं किञ्चित् । कस्मिन्नपि निमेषे ध्यानच्युतिः नासीन्मम । बहूनि दीर्घाणि वाक्यानि एकश्वासेनैवाब्रवीत् सः । यथासमयं स्ववक्तव्यं समापितवान् सः ।

तदा ज्ञानोदयः जातः, कुतः सः Rapid Devanathanइत्युच्यते इति । वस्तुतः तस्य नाम आसीत् – Dr. Ramanuja DEVANATHAN इति ।

## आचार्यानुग्रहः - १

यं प्रसङ्गमिदानीमुल्लिखामि सः प्रसङ्गः राष्ट्रियसंस्कृविद्यापीठे प्रवृत्तः । तदाहं प्राक्शास्त्रीकक्ष्यायामधीयानः आसम् । विद्यापीठे छात्राणाम् आङ्ग्लभाषणकौशलवर्धनाय Max Muller English Club इति काचित्परिषद्घटिता आसीत् । इयं परिषत् प्रतिशनिवासरं प्रातः १० वादनतः आरभ्यते स्म । अस्मिन् कार्यक्रमे दत्तविषयमधिकृत्य छात्राः आङ्ग्लभाषायाम् अभाषन्त । सभायाः अध्यक्षः निर्णायकश्च विद्यापीठस्यैव कश्चिदध्यापको भवति स्म । यः छात्रः भाषणे उत्तमान् अङ्कान् प्राप्नोति स्म स वर्षान्ते पुरस्क्रियते स्म ।

इत्थमेव एकस्मिन्नधिवेशने अध्यक्षत्वेन **आचार्याः रामानुजदेवनाथवर्याः** समाहूताः अभूवन् । सर्वेऽपि वयं छात्राः अतीव हृष्टाः आस्म । बहवः वयं भाषणस्य सिद्धतामारब्धवन्तः । मया चितः विषयः आसीत् – Bhaja Govindam in day to day life इति । बहून् विषयान् सङ्गृह्य उत्तमा सिद्धता कृता । अतिप्रतीक्षितः शनिवासरः आगतः । सर्वेऽपि छात्राः आचार्याणां पुरतः आत्मनः कौशलं प्रदर्शयितुम् उत्सुकाः आसन् । ममापि सा एव स्थितिः । परन्तु वाग्मिनः अध्यक्षस्य पुरतः

भाषणं विचिन्त्यैव हृदयं धगधगायते स्म । तथापि रामानुजदेवनाथवर्यस्य पुरतः भाषणं ज्ञानाय कल्पते इति विचिन्त्य सभाप्रकोष्ठमागतः ।

यथापूर्व सभा पूर्णा आसीत् । आचार्याः समागताः । भाषणानि आरब्धानि । सर्वैः यथा तथा मयापि विषयः प्रस्तुतः । सर्वेषां भाषणम् अत्युत्कृष्टमासीत् । कः पुरस्कारं लभेत इति वक्तुमशक्यमासीत् । प्रतीक्षितः अध्यक्षभाषणकालः समागतः ।

आसीदियं प्रतीतिः यत् अध्यक्षः स्वभाषणे यस्य वक्तुः भाषणविचारान् अधिकृत्य अधिकं विवृणुते सः अवश्यं पुरस्कारभाग् भवतीति । तथैवासीत् अस्माकं समेषां मनसि आचार्याणां देवनाथवर्याणां भाषणविषयेऽपि । आश्चर्यं नाम तैः सर्वेषामपि विषयः समानरूपेण उक्त्वा तद्विषयसम्बन्धिनः अन्येऽपि विचाराः बोधिताः । अस्मिन्नेव क्रमे ममापि नाम आसीत् । बालः आसम् , अतः मनसि निरीक्षा आसीत् यन्ममापि नाम सभायामुक्त्वा मामपि बोधयिष्यन्ति इति । तथा चिन्तनमेव मम मनसि महान्तं हर्षम् उत्पादयति स्म ।

परन्तु तथा न अभूत् । मम भाषणविषये तेषां केवलं वाक्यद्वयम् आसीत् – "विनायकेन स्वीकृतः विषयः अत्युत्तमः आसीत् , सम्यक् भाषितम् । तस्मै साधुवादाः"। ततः अन्येषां विचारान् उक्त्वा अध्यक्षभाषणेन सर्वान् अनुगृहीतवन्तः ।

मयि आकाशः पतित इव आसीत् । तस्मिन् दिने महान् मे खेदः यन्मम विषये बलं नासीदिति। अयोग्यवक्ताहम् । विषयरहितस्य मम भाषणस्य श्रवणेन आचार्याणां मनसि मद्विषये जुगुप्सा उत्पन्ना स्यादित्यादि विचाराः मनसि समागताः ।

वर्षान्ते निर्णयाः घोषिताः । किमभूत् इति ऊहितुं शक्नुवन्ति वा ???!!! यस्मिन् अधिवेशने आचार्याः अध्यक्षाः आसन् तस्मिन् अधिवेशने मम प्रथमं स्थानम् आसीत् । सर्वे अभिनन्दन्तः आसन् । कथयन्तश्च आसन् यद् आचार्याणां आध्यक्षे पुरस्कारः लब्धः इत्यस्यायमर्थः यत् तेभ्यः भाषणविषयः अतीवारोचिष्ट इति ।

मम मनसि यद्यपि महान् हर्षः तथापि आसीद्विचारः यत् तस्मिन् दिने अस्पृष्टोऽपि मे विषयः कथं प्रथमस्थानं प्राप्नोत् इति । तस्मिन् दिने उत्तरं न प्रापम् । परन्तु अग्रिमेषु वर्षेषु तेषां व्यवहारं शैलीं च दृष्ट्वा अवगतवान् यत् आचार्याः उत्तमस्य विषयस्य सङ्ग्रहं कृत्वा तत्र सभायामनुक्त्वा विशिष्टासु सभासु तस्य छात्रस्य नाम उक्त्वा तदुक्तं विषयं प्रशंसन्ति इति । अयं तेषां स्वभावः आसीत् विषयः

सर्वैः ज्ञातः भवेत्। केवलं भाषणस्पर्धायां तल्लुप्तं न स्यात्। अतः तत्र अध्यक्षभाषणे ते तं विषयम् अस्पृष्ट्वा अन्यत्र सर्वत्र तं विषयं प्रसारयन्ति स्म। आश्चर्यं नाम तत्र ते तस्यैव नाम गृहीत्वा विषयं प्रस्तुवन्ति स्म येन सः विषयः उक्तः आसीत्। तथा आसीत् व्यक्तित्वं मे गुरूणाम् **आचार्याणां रामानुजदेवनाथवर्याणाम्**।

## आचार्यानुग्रहः - २

आचार्याः रामानुजदेवनाथवर्याः शृङ्गेरीस्थराजीवगान्धीपरिसरे प्राचार्याः अभूवन्। राजीवगान्धीपारिसरस्य या अभिवृद्धिः अस्माभिः अद्यत्वे लक्ष्यते सा हि तेषामेव चिन्तनस्य श्रमस्य च फलम्। "शृङ्गेरीपरिसरः कदाचित् स्वतन्त्रः विश्वविद्यालयः भवेत्। तदर्थं यत्नः विधेयः" इति मनीषा तैः कदाचित् प्रकट्यते स्म। तस्मिन् मार्गे तेषां यत्नः अस्माभिः बहुधा साक्षादकारि। विद्मो वयं यत् पुरा नालन्दातक्षशिलादि-विश्वविद्यालयाः अभूवन् इति। तत्र जिज्ञासूनाम् अधिजिगांसूनां च कृते सर्वदा व्यवस्था कल्प्यते स्म। तत्र भेदस्य कल्पना नासीदेव। भारतीयो विदेशीयो वा, श्रीमान् दरिद्रो वा सर्वस्याप्यासीदवकाशः अध्ययनाय। तथैव परिकल्पना आसीद् आचार्याणां देवनाथवर्याणां राजीवगान्धीपरिसरविषये। अत्रापि बहवः जिज्ञासवः अधिजिगांसवः आगत्य पठेयुः ज्ञानं च प्राप्नुयुः इत्यासीत् मनीषा आचार्याणाम्। तैः , आगतेभ्यः व्यवस्था अपि कल्प्यते स्म। तथा आगतेषु अमेरिकातः आगतः डा वरुणखन्ना (सहायकाचार्यः,चिन्मयविश्वविद्यापीठम्), श्री स्वरूपवर्यः (न्यूयोर्क्-देशतः) अन्यतमौ। एतेषां वासव्यवस्था अपि आचार्यैः समकल्प्यत।

अस्मिन्नेव विषये अहमपि आचार्याणाम् अनुग्रहं प्राप्तवान् इति वक्तुं महान्तं मोदम् अनुभवामि। तथाहि –

यदाहं राष्ट्रियसंस्कृतविद्यापीठे शास्त्रितृतीयवर्षे आसं तदा आरोग्यसमस्याकारणतः गणिते अनुत्तीर्णः अभूवम्। पुनरुत्तीर्णतासम्पादनाय वर्षस्यैकस्य कालः अपेक्षित आसीत्। आरोग्यसमस्यया तस्मिन्नपि पर्याये अनुत्तीर्णः अहम्। सर्वोऽपि मार्गः पिहित इव भाति स्म। बेङ्गलूरुनगरं गत्वा विविधान् उद्योगान् कृतवान् , MBA प्रवेशपरिक्षार्थं मार्गदर्शनमपि प्राप्तुं प्रयत्नं कृतवान्। वैयाकरणस्य ममैतन्नारोचिष्ट तथापि गतिर्नासीद् इति अभात् अतः तस्मिन् मार्गे प्रवृत्तः। ततः कदाचिन्मद्गुरून् व्याकरणविदुषः डा चन्द्रशेखरभट्टवर्यान् (सहायकाचार्यः , राजीवगान्धीपरिसरः)

मेलितुं शृङ्गेरीं गतवान्। तत्र गुरुभ्यः मत्स्थितिं ज्ञापितवान्। तैः सर्वं श्रुत्वा कञ्चित्कालं विचिन्त्य अहं आदिष्टः शृङ्गेर्यागमनाय। विना विलम्बं शृङ्गेरीमागाम्। प्राप्ते तत्र गुरवः माम् उपादिक्षन् – "विनायकरजत ! त्वत्स्थितिं राजीवगान्धीपरिसरस्य प्राचार्येभ्यः आचार्येभ्यः रामानुजदेवनाथवर्येभ्यः निवेदयतु। ते परमकारुणिकाः सन्ति। तव परिस्थितिं विज्ञाय नूनं कञ्चिद्मार्गं सूचयिष्यन्ति। अनूत्तीर्णस्य मम मनसि आत्मविश्वासः सर्वथा क्षीणः आसीत् , हीनता अनुभूयते स्म। प्रायः लोके दृश्यते अनुत्तीर्णं न कोऽपि इच्छति , तस्मिन् स्नेहोऽपि अल्प एव भवति। माम् अनुत्तीर्णं ज्ञात्वा आचार्याः कदाचिद् मद्विषये चिन्तनं न कुर्युः इति भीतिरासीन्मनसि। तथापि प्रयत्नस्तु कर्तव्य एव आसीत्। अतः तान् मेलितुं परिसरं गतवान्। धैर्यं सम्पाद्य प्राचार्यप्रकोष्ठं प्रविष्टवान्। तेषां चरणौ अभिवाद्य स्थितः। कुतः आरम्भणीयमित्यासीत् प्रश्नः मनसि। अतः मौन एव स्थितः आसम्। मम स्थितिमवगत्य आचार्या एव – "भवान् तिरुपतौ राष्ट्रियसंस्कृतविद्यापीठे आसीत्खलु। स्मरामि भवन्तम्? (स्नेहपूर्वकमन्दहासेन) वदतु। किं वक्तुमिच्छति ?" ततोऽहं विस्तरेण मत्स्थितिं निवेदितवान्। तेऽपि सावधानं सर्वमपि श्रुत्वा – " हुं ! जानामि श्रुतः एषः विषयः। भवतः विषयेऽपि जानामि। भवान् सम्यगधीते। यद्यपि वर्षमध्ये विद्यापीठे प्रवेशः नानुमन्यते तथापि अहं कञ्चिन्मार्गं विचिन्त्य सूचयिष्यामि। तावद्भवान् व्याकरणकक्ष्यासु उपविश्य ज्ञानं प्राप्नोतु"। तेषामाशिषः प्राप्य ततः निवृत्तोऽहम्। दिनद्वयानन्तरं तान् पुनः मिलितवान्। तदा – "पश्यतु विनायक ! अहं कुलसचिवं परीक्षानियन्त्रकं च भवस्थितिं ज्ञापितवान्। एकः मार्गः तैः सूचितः अस्ति। नवम्बरमासात्पूर्वं यदि भवान् उत्तीर्णतां सम्पादयिष्यति तर्हि अत्रैव परिसरे आचार्यकक्ष्यायां प्रवेशं प्राप्तुमर्हति" इत्यवदन्। परन्तु तदसम्भवम् आसीत्। यतोहि तिरुपतौ परीक्षा दिसम्बरमासे आसीत्। तदपि उक्तवान्। तेषां मुखे खेदः लक्षितः। ततः तैः उक्तम् – "विनायक ! भवतः अध्ययनेच्छां वेद्मि। ज्ञानं भिन्नम् , उपाधिर्भिन्नः। भवान् ज्ञानमर्जयतु। अत्रैव परिसरे व्याकरणज्ञानं प्राप्नोतु। अत्र विद्वांसः गुरवः सन्ति। तेषां कक्ष्यासु उपवेष्टुम् अनुमतिम् अहं दापयिष्यामि। सधैर्यं ज्ञानं सम्पादयतु"। तथोक्त्वा अध्यापकेषु सूचना प्रदत्ता यदयं बालकः अभीष्टासु कक्ष्यासु उपवेक्ष्यति। परिसरछात्रेषु यः व्यवहारः स एव अनेनापि सहास्तु।

एष आसीन्ममानुभवः। छात्राणां जिज्ञासूनां च जिज्ञासाशमनाय सदा सिद्धाः आसन् आचार्याः रामानुजदेवनाथवर्याः इति सर्वे वयं जानीमः। सः साक्षात् शिष्यः भवतु मा वा , आचार्याः

अवश्यमेव प्रश्नस्य समाधानं कुर्वन्ति स्म। प्रश्नः साक्षात् तेषां पुरत एव भवेत् इति नासीत्। Twitter, Facebook, Whatsapp, message, email इति येन केनापि माध्यमेन प्रश्नः स्यान्नाम उत्तरम् अवश्यं यच्छन्ति स्म। किं बहुना यदि कश्चिदेषु माध्यमेषु तच्छिष्यान् पृच्छति , शिष्यश्च उत्तरदाने असमर्थः भवति तर्हि आचार्याः स्वयं तत्पक्षतः उत्तरं दत्त्वा तं शिष्यं रक्षन्ति स्म। सन्ति वक्तव्यं बहु परन्तु आस्तां तावत्। तथा आसन् मे गुरवः **आचार्याः रामानुजदेवनाथवर्याः**।

## आचार्यानुग्रहः - ३

राष्ट्रियसंस्कृतसंस्थानस्य राजीवगान्धीपरिसरस्य अभ्युत्थाने आचार्याः रामानुजदेवनाथवर्याः प्रधानकारणीभूताः। अद्यापि तेषां चिन्तनानि तत्रानुपाल्यन्ते। नास्ति सन्देहः यद् अद्यापि यदि राजीवगान्धीपरिसरः राष्ट्रे लब्धख्यातिर्वर्तते तर्हि तदमीषां श्रमेण , विद्वत्पूर्णचिन्तनेन उत्तमशासनेन एव। बहूनामस्ति जिज्ञासा यत् कथमाचार्याः राजीवगान्धीपरिसरस्य अभ्युत्थाने कारणीभूताः इति। अस्मिन् लेखे यथाज्ञानं बिन्दुशः तान् अंशान् उल्लिखामि।

### 1. आचार्याणां प्रार्थनायाम् उपस्थितिः

प्रतिनित्यं प्रातः काले पादोनदशवादने राजीवगान्धीपरिसरे प्रार्थना भवति। प्रार्थनायां समेऽपि अध्यापकाः छात्राश्च उपस्थिताः भवेयुरित्यस्ति सामान्यः नियमः। आचार्याः यदा तत्र परिसरे प्राचार्याः आसन् तदा प्रतिनित्यं समये तत्रोपस्थाय शृङ्गेरीश्रीचरणानां पादुकौ साष्टाङ्गं प्रणिपत्य अस्माभिः सह प्रार्थनां कुर्वन्ति स्म। सामान्यतः अत्र समेषां मनसि प्रश्नः स्यादेव यत् कोऽत्र विशेषः ? अन्यत्रापि प्राचार्याः प्रार्थनासु उपस्थिता भवन्त्येव खलु ? इति चेद् अस्त्यत्र विशेषः – आचार्याणां सम्प्रदायः विशिष्टः अस्ति। आचार्यैः प्रतिनित्यं कूपजलेन स्नात्वा घण्टात्रयं यावदनुष्ठानमाचर्यते स्म। अनुष्ठानोत्तरं भोजनं समाप्यैव ते परिसरमायान्ति स्म। प्रातः भोजनानन्तरं ते सायम् अनुष्ठानोत्तरमेव भुञ्जते स्म। समये विद्यालये उपस्थातुं ते प्रातः चतुर्वादने उत्थाय स्वनित्यकर्माणि कुर्वते स्म। पुनश्चात्रावधेयं यत् ते रात्रौ स्वकर्मवशात् एकादशवादनोत्तरमेव निद्रान्ति स्म। अधुना प्रायः प्रश्नाः शान्ताः स्युः यत् क्वास्ति वैशिष्ट्यम् आचार्याणां प्रार्थनायामुपस्थितौ। आचार्याणामयमभ्यासः अन्यान् अध्यपकान् छात्रान् च नित्यं प्रैरयत् समये विद्यालयागमनाय। "स्वयं करोतु कृत्वा प्रदर्शयतु" इत्यासीत् आचार्याणां सिद्धान्तः।

## 2. आचार्याणां कक्ष्यानिरीक्षणम्

ज्ञानप्रसारविषये छात्राणां बोधने च शैथिल्यम् आचार्याय न कदाप्यरोचिष्ट। अध्यापकाः छात्रा वा शिथिला कदापि न स्युः इत्यासीत् तेषां मतम्। अतः एकः विशिष्टः स्वभावः आसीदाचार्याणां यत्ते प्रतिकक्ष्यं गत्वा तत्र छात्रैः सह उपविश्य पाठं शृण्वन्ति स्म। तेषाम् अनेन स्वभावेन छात्राः अध्यापकाश्च सर्वदा अध्ययनाध्यापनविषये जागरूकाः अभूवन्। छात्राः सम्यग्विषयं श्रुण्वन्ति स्म , सम्यगधीत्य च आयान्ति स्म। तथैव अध्यापका अपि पाठनीयं विषयं सम्यगवलोक्य अवगत्य च आयान्ति स्म। तस्मात् कक्ष्या अतीव रोचिका अभूत्। कदाचिद् आचार्याः अध्यापकेषु प्रश्नान् अकुर्वन्। कदाचित् प्रश्नानामुत्तरमपि प्रादुः।

## 3. अध्यापकेषु शोधप्रवृत्तिवर्धनम्

अध्यापकाः सर्वदा शोधकार्ये लेखने च रताः स्युः इत्यैच्छन् आचार्याः। अतः स्वयमेव सन्देहान् प्राप्य अध्यपकेषु तदुत्तरं अपृच्छन्। अध्यापकाः तदुत्तरान्वेषणव्याजेन शोधकार्यरताः अभूवन्। एकमुदाहरणम् उल्लेखितुमिच्छामि – कदाचित् आचार्याः कञ्चिद्व्याकरणाध्यापकं समाहूय एकं सन्देहमुपास्थापयन्। स च सन्देहः आसीत् देव + आलयः इत्यत्र कः सन्धिः इति ? अध्यापकः आश्चर्यचकितोऽभूत्। कीदृशोऽयं प्रश्नः ? अत्र सवर्णदीर्घः इति प्राक्शास्त्रीछात्रः अपि अस्योत्तरं जानाति। सः अध्यापकः मन्दस्वरेणैवावदत् – "सवर्णदीर्घः खलु ?" इति। सम्यग्विचिन्त्य उच्यताम् इत्युक्त्वा आचार्यैः सः अध्यापकः प्रेषितः। सम्यग्विचारिते सति तेन अध्यापकेन ज्ञातं यत् देव + आलयः इत्यत्र ओमाङोश्च इति सूत्रेण पररूपसन्धिरपि प्राप्नोति इति। ततः अस्मिन् विषये बहवः लेखाः प्रकशिता अभूवन्।

बहवः प्रायः "शब्दान् जानीमहे" इति संस्कृतभारत्या प्रकाशितं विशिष्टं पुस्तकं दृष्टवन्तः पठितवन्तश्च स्युः। तत् पुस्तकम् आचार्याणामेव चिन्तनमभूत्। तस्य पुस्तकस्य पञ्च भागाः आचार्याणां मार्गदर्शने राजीवगान्धीपरिसरेण प्रकाशिताः।

## 4. छात्रपोषणम्

छात्राः परिसरप्राणभूताः इत्यासीदाचार्यमतम्। छात्रेषु गत्वा छात्रसमस्यायाः अवगमनाय नित्यं प्रयतन्ते स्म आचार्याः। छात्राः अपि सधैर्यम् आचार्येषु स्वसमस्यां निवेदयन्ति स्म। आचार्याः

शासने यथा दक्षाः आसन् तथैव अध्यापने अपि। यद्यपि महान्तः विद्वांसः आसन् तथापि ते शास्त्रिप्रथमवर्षे लघुसिद्धान्तकौमुदीम् अपाठयन्।

प्राचार्याणां प्रायः बहूनि कार्याणि भवन्ति। मास्तु भवतां मनसि सन्देहः यदाचार्याः पाठ्यक्रमं न पुरयन्ति स्म इति। आचार्यैः पाठ्यक्रमः सदा पूरितः छात्राः विषयं सम्यगवगतवन्तश्च। कथं मया ज्ञायते इति वा ? अहमपि आचार्याणां शिष्यः अस्मि। आचार्यद्वितीयवर्षे आचार्याः अस्मान् वाक्यपदीयम् अबोधयन्। संस्कृतक्षेत्रे एव अमी प्रथमाः स्युः ये हि आधुनिकतन्त्रमुपयुज्य वाक्यपदीयमबूबुधन्। शनिरविवासरयोः अस्माकं कक्ष्या भवति स्म। घण्टाद्वयं पाठयन्ति स्म। न केवलं व्याकरणं तद्दर्शनं वा अपि तु विज्ञानं , मनोविज्ञानम्, आयुर्वेदः इत्यनेके आधुनिकविषयाः अपि तैः बोध्यन्ते स्म।

भारतस्य विविधेषु भागेषु छात्राणाम् अभिवृद्ध्यर्थं स्पर्धाः सञ्चाल्यन्ते स्म। आचार्याणामागमनात् पूर्वं प्रायः छात्राः धनाभावात् क्वापि स्पर्धासु भागं न गृह्णन्ति स्म इति। परन्तु आचार्याः दृढं निर्णयं स्वीकुर्वन्तः छात्रान् स्पर्धासु भागग्रहणाय प्रेषितवन्तश्च। धनाभावे सति स्वकोशेनापि धनं दत्तं तैः। स्मर्यते कश्चित् प्रसङ्गः। कदाचित् कस्याश्चित् समस्यायाः परिहारप्राप्त्यर्थम् अहम् आचार्याणां गृहमगाम्। तत्र आचार्याः माम् दृष्ट्वा विस्मिता अभूवन्। कारणमासीत् यद् तस्मिन्नेव काले पुर्यां युवमहोत्सवस्पर्धाः आसन् , अहञ्चात्र आसम्। ते – "विनायक ! किं करोत्यत्र ? भवता युवमहोत्सवे भवितव्यमासित् खलु ?" मया उक्तम् – "आचार्याः ! युवमहोत्सवचयनप्रक्रियासन्दर्भे अहमन्यत्र स्पर्धासु आसम् , अतः अहं युवमहोत्सवार्थं न चितः" इति। आचर्याः कञ्चित्कालं विचिन्त्य – "एकं कार्यं करोतु। भवान् इतः मम कारयानेन बेंगलूरुनगरं गच्छतु। ततः व्योमयानेन पुरीं गच्छतु। तावता अहं भवन्नाम स्पर्धापट्टिकायां योजयितुं व्यवस्थां करोमि"। किं वक्तव्यमिति नावगतम् मया। ततः गमने अनिच्छां प्रकटितवान् ( NET परीक्षायाः सिद्धता करणीया आसीत्) यत्तैः अङ्गीकृतम्। छात्रस्य श्रेयः स्यात् येन केन वा प्रकारेण इत्यासीत् आचार्याणां चिन्तनम्।

5. आचार्यैः ज्ञानयज्ञसम्पादनार्थं बह्वीनां परिषदाम् आरम्भः कृतः। तद्यथा छात्राणां भाषणकौशलवर्धनाय – वागवर्धिनीपरिषत्। अध्यापकानां वाक्यार्थकौशलस्य ज्ञानं छात्रेषु भवतु इति – वाक्यार्थपरिषत्। बाह्याः विद्वांसः ज्ञानं परिसरे प्रसारयन्तु इति – शारदाविशिष्टव्याख्यानमाला।

इत्थं महानस्ति श्रमः आचार्याणां रामनुजदेवनाथवर्याणां राजीवगान्धिपरिसरस्य अभ्युत्थाने। बहवो विचारा मया अत्र नोल्लिखिता  बहवश्च अज्ञाताः सन्ति ।

धन्यमात्मानं मन्येऽहं यदाचार्याणां मार्गदर्शने शोधकार्यं अकरवम् । पुनश्च यदाहं शृङ्गगिरौ कार्यरतोऽभूवं तदा आचार्याः कदाचित् दूरवाणीं कृत्वा अपृच्छन् – "विनायक! जम्मूं आजिगमिषति किम्?" तद्वचनं श्रोत्मेव कर्णौ मे प्रतीक्षमाणौ आस्तामिव आसीत् तत्क्षणम् । प्रफुल्लोऽहं विना विलम्बम् ओमित्यवदम् । ततः जम्मूपरिसरे प्रतिनित्यमेकः अनुभवः वर्तते मे चित्तमञ्जूषायां यान् स्मारं स्मारं तेषां स्वप्नमार्गे आत्मानं व्यापारयामि । इदमवश्यं मया वक्तव्यं यदहमाचार्यस्य ज्येष्ठः पुत्रः इति आचार्याः सदा स्वगृहे अवदन् इति आचार्याणां पुत्रः दयानाथः ब्रूते स्म । किमस्मादधिकं भाग्यं स्यात् शिष्यस्य यस्य गुरुः तं पुत्रं मनुते ।      ब्रह्मणि लीनानामाचार्याणां **भजेऽहं भजेऽहं सदा अङ्घ्रिपद्मम्** ।

***

## ज्ञानमहिममण्डिताः शिक्षाशास्त्रिणः प्रो. रामानुजदेवनाथाः

**डा. परमेशकुमारशर्मा**
सहायकाचार्यः, शिक्षाशास्त्रविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम् , नईदिल्ली-16
Parmesh.kumarsharma87@gmail.com
8385945895, 9454323060

दर्शनमात्रेणैव साधुप्रवृत्तिपराः आचार्याः। तपस्यापराः शास्त्रोपासका नैष्ठिकाश्च आसन्। सर्वेषामपि चिरस्मरणीयास्सततं जीविष्यन्ति स्वीयकीर्तिमत्कार्यैः आत्मशिष्येषु।ते सर्वैः प्रशंसां प्राप्नुवन्ति स्म। ज्ञाने प्रशासने च सर्वथा गतिमन्तः आसन् महानुभावाः। आसन् अनेके गुणा आचार्ये तद्यथा छात्रप्रियः, ज्ञानप्रियः स्पष्टवक्ता, तपस्वी, नियमपरिपालकः कर्मनिष्ठः कवित्वं च। एते सर्वेऽपि गुणाः अवलोकिताः यथाकालं मेलनप्रसङ्गेषु मयापि।

मम प्रथममेलनम् सप्तोत्तरद्विसहस्रतमे वर्षे एकस्मिन् कार्यक्रमे सहजतया जातम्। तदाहं शिक्षाशास्त्रिच्छात्रः महोदयं दृष्ट्वा प्रभावितः ।तत्र कारणद्वयमासीत् एकं तेषामुद्बोधनम् अपरं प्रभावात्मकं व्यक्तित्वम्। तदा तु वार्तालापाय मेलनाय वा अवसरः नासीत्।किन्तु मनसि दृढीयान् विश्वासः आसीत् कालान्तरे अवश्यम् मेलिष्यामि चर्चां च विधास्यामि आचार्यैः सह। स अवसरः पुनः वर्षद्वयानन्तरं जयपुरे शिक्षाचार्यकक्षायामधीयानः आसं तदा प्राप्नुवम् तदा नैकट्येन मेलितुं वार्तां कर्तुम् अवसरः लब्धः। तत्रापि तेषां स्मृतिं दृष्ट्वा सुतरां प्रभावितस्तैरहं नामग्रहणपूर्वकं सम्पोषितः। तेन तु सुतरां प्रभावो जातः मम जीवने तेषाम्। स्मृतिः तेषाम् अतितरां तीक्ष्णासीत्। एकवारम् मिलितस्य नामग्रहणपूर्वम् उच्चारणम् अद्भुतम् प्रेरणाकरं च। जयपुरपरिसरे युवमहोत्सवः आसीत्तत्राहमपि वादविवादप्रतियोगितायां प्रतिभागी आसम्। तदा आचार्या कुलसचिवपदम् अलङ्कुर्वन्ति स्म। ते सर्वत्रापि प्रतियोगितासु छात्राणामुत्साहवर्धनार्थं भागं निर्वहन्ति स्म। भाष्यशलाकापरीक्षायाः सा घटना स्मर्यते पृच्छाकाले कस्यचित् विदुषः छात्रस्य नीरजभार्गवस्य च विवादः जातः। विवादं वर्धमानं दृष्ट्वा आचार्येण छात्रस्य पक्षः स्व्यक्रियत विद्वासं चापोष्यत। अनौपचारिकवर्गस्य समापनकार्यक्रमे जयपुरे तेषां भाषणं मुहुर्मुहुः स्मर्यते। तेषामुपनिषत्सम्बद्धं

भाषणं किमपि कर्तुं प्रेरयति स्म। तेषाम् ऋचापठनस्य अनुकरणं कुर्वन्नहं IIT रुडकीमध्ये शुनःशेपकथाम् अपाठयं तद्द्वारा अतितरां सुखं प्राप्नुवम्। बहुषु क्रियासुताननुकर्तुं प्रयते स्म किन्तु ते तु ज्ञानसागररूपेण प्रथिताः आसन्। तदृशाः पुरुषाः विरलतयैवोत्पद्यन्ते अस्मिन् जगति । अतः ज्ञानपुरुषाः एवासन् इति चिन्तयामि। जयपुरस्थतिरुपतिवैंकटेशमन्दिरे एव ते अस्मद्गुरुचरणानामाश्रमे दर्शनायायान्ति स्म। तत्रैवाहं वासं करोमि स्म। अतः तत्रापि मेलनावसरं प्राप्नुवम्। विशिष्य तानि दिनानि स्मर्यन्ते यदा उद्योगाय प्रथमनियुक्तये अहं भाषाव्युत्पत्तिनिमित्तं देहलीम् आयातः। तस्याः योजनायाः मुख्यमार्गदर्शकास्ते एव आसन्। महोदया एव अस्माकं साक्षात्काराय संस्कृतभारतीप्रमुखैः सह आगतास्संस्कृतभारतीकार्यालयम्। तेषां ज्ञानपीठप्रकाशेन तत्रापि अहं परिपोषितः अभवम्, प्रथमतया नियुक्तिं सम्प्राप्य तत्राहमत्यन्तं प्रसन्नोऽभवम्। तन्मार्गदर्शनेन बहुविधज्ञानं प्राप्तवन्तः योजनायाः समेऽपि छात्राः । पाठनकाले यदा समस्या भवति स्म तदा वयं सर्वेऽपि आचार्याः तानेव पृच्छामः स्म। मध्ये मध्ये महोदया अस्मान् उद्बोधयितुमपि आयान्ति स्म कार्यविवरणमपि पश्यन्ति स्म।

शोधविषयचयनकाले मद्गुरूणां प्रो. बाई. एस. रमेशवर्याणां मित्रकल्पानां महोदयानां परामर्शानन्तरं मद्विषयः अन्तिमपरिणातिं प्राप्नोत् यतः पूर्वविषयः भाषासम्बद्धः चिन्तितः आसीदिति। तेषु दिनेषु एव महोदयानां कारकपाठस्य सान्द्रमुद्रणं जातम्। तदस्माभिः सर्वैः प्रशिक्षार्थिभिः दृष्टं श्रुतं च आसीत्। यथा शिक्षाशास्त्रस्य ज्ञाता आसन् तथैव व्याकरणदर्शनवेदानामपि। एतत्सर्वमेकत्र विरलतया प्राप्यते इह लोके। तेषाम् अष्टानां भाषाणां पूर्णज्ञानमेतत्सुतरां योग्यमिति।

हिमाचलस्थगरलीपरिसरे सर्वैस्सह मेलनप्रकारमिदानीमपि स्मरामि। यदा महोदयाः युवमहोत्सवे अत्यन्तं व्यस्तास्सन्तोऽपि गरलीम् आयाताः। यत्र तत्र सर्वत्र गत्वा सर्वेषां मार्गदर्शनमकुर्वन्। महोदयास्तत्र सर्वान् अप्रेरयन्। यदा महोदयाः कुलपतिरूपेण रामानन्दसंस्कृतविश्वविद्यालये प्रतिष्ठितास्तदा पुनः अपि मेलनं जयपुरे जातम्।




जयपुरे पाठ्यक्रमसंशोधनकार्यशालायां तेषां मार्गदर्शनं पाठ्यक्रमस्य प्रतिपदं दर्शनं तैः विहितम्। तदद्भुतमासीत् एकमपि अक्षरं महोदयाः नात्यजन्। तेषां कर्मनिष्ठता द्योतयति यत् वास्तविकरूपेण कर्मयोगिन आसन् महोदयाः। तस्मात्प्रमाणपत्रं सम्प्राप्य सुतरां प्रभावितोऽभवम्।



जयपुरस्थविश्वविद्यालये अस्माकं पुनरेकवारं व्याकरणविषयस्य साक्षात्कारं स्व्यकुर्वन् तदा पुनः तस्य दर्शनमभूत्।

मित्रपरायणतापि तस्य अवसरेऽस्मिन् स्मरणीया। महोदयाः मद्गुरूणां प्रो. रमेशवर्याणां शल्यचिकित्साप्रसङ्गं श्रुत्वा एस एम एसचिकित्सालये समायाताः। पूर्णस्वास्थ्यविषये सन्तुष्टा यावत्पर्यन्तं नाभवन् तावत्पर्यन्तं ततः न गताः एव। अगरत्तलापरिसरे संस्थानेन आयोजिताभिविन्यासकार्यक्रमे तेषां पाठनम् अस्माभिः सह दिनचरीपालनमद्भुतमासीत्। शाब्दबोधनं सुतरां प्रेरकतया अपाठयत्। प्रश्नानामुत्तरकथनसामर्थ्यं नितरामासीत् महोदयानाम्। सर्वान् अपि इच्छन्ति स्म नासीत्तेषां कुत्रापि पक्षपातः। विविधसाक्षात्कारेषु सर्वदा कार्ययुक्ताः भवन्ति स्म। मम भाग्येन आचार्या विद्यापीठे अपि साक्षात्कारे आसन् सुतरां गभीरान् विषयान् अपृच्छन्, विषयवैशाद्येन मौनमपि अकारयन्। सस्कृतसेवायै अवसरदापने भूमिकायाम् आसन् इति अनुभवामि। मम प्रथमनियुक्तौ चिरनियुक्तौ च तेषां कृपाप्रसादेनैव अनुभवामि इत्यतः तदवलम्बितमार्गे चलितुं सर्वदा प्रेरयन्ति महोदयाः।

स्मरामि सुसम्यक् तत्प्रथमदिनाङ्कं यदहं गुरुभिः प्रो. सुदेशकुमारशर्मभिः तत्सेवायां बलसाडे नियोजितः। प्रातः तैः सह जलमानेतुम् अवसरः प्राप्तः। तदाहं मन्मित्रम् प्रेमसिंहः तैः सह अगच्छाव। मार्गः कण्टकाकीर्णः आसीत् पादरक्षां विनैव महोदयाः पद्भ्यां जलाय अगच्छन् बहुधा निवेदिताः, अहं जलं नयामि किन्तु तैः अस्मभ्यं जलं नैव प्रदत्तमेव। अस्माकं पादयोः अपि बहूनि कण्कटानि लग्नानि। अस्मद्धैर्यं विच्छिन्नं परन्तु न महोदयानाम्। दृढनिश्चयः आसीत्। सम्यक् स्मरामि हस्तः कम्पते स्म कूपजलानयने, किन्तु न अस्मभ्यं प्राददात्। अनन्तरमहं सर्वाश्रमे भ्रमणं परिचयं चाकारयम्। तदनु अल्पाहारे केवलं दुग्धमेव स्वीकुर्वन्ति स्म, तद्दत्तवान्। मञ्चस्यापि तत्प्रसंगं सम्यक् स्मरामि यदा सुदेशगुरुभिः शान्तिपाठः मध्ये एव कारितः। आचार्याणां विषये उक्तं चासीत् यत् महोदयः ज्ञानवान् भक्तिमान् कर्मनिष्ठः अस्ति तत्रापि क्षमावान् अस्ति इति।

एतदन्तिमदर्शनावसरः प्राप्तः महोदयेन सह स्थातुम्। ततः दिनचतुष्टयपरं तेषां दिङ्गमनं श्रुत्वा महद्दुःखं जातम्। सर्वगुणसमवायाः आसन् आचार्यास्तेषां ज्ञानस्य व्यक्तित्वस्य पूर्तिं कोऽपि कर्तुं न शक्नोतीति तु निश्चप्रचम्। संस्कृतस्य समवायस्य महती क्षतिः जातास्ति। संस्कृतजगति चिरं जीविष्यति तस्य सेवापरायणता छात्रप्रीतिः मृदुभाषित्वं कविताकमनीयता स । न तु कस्यचिदपि

निन्दायां रमते स्म न तु प्रसंशायाम्। साधुतायाः सर्वाणि लक्षणानि जीवन्ति स्म। तादृशपुरुषस्य दिङ्गमनेन महती क्षतिः अस्मत्समाजस्य। तस्य नामस्मरणमात्रेण नेत्राणि सजलानि भवन्ति क्वचिच्चिन्तने मया दोषः विहितः चेद्भगवान् मां रक्षेत्। मया न कापि अतिशयोक्तिः कृता न च गुणवर्णनता इति शम्।

***

# आचार्यः सः नो महान्

**डा. नितिनकुमारजैनः**
संविदाध्यापकः (शिक्षा)
राष्ट्रियसंस्कृतसंस्थानम्, भोपालपरिसरः।

आचार्यपरम्परायां मत्कृते प्राप्ताचार्येषु आचार्याः प्रो. आर. देवनाथमहावर्याः अनन्यतमाः आसन्, इदं मे परं सौभाग्यमेव। अप्रत्यक्षत एव तैः शिक्षितोऽहं , गुरुणां जीवनस्य मौलिकतयैव अभिप्रेरितोऽहम्। संस्थानस्य 'योऽनुचानः सः नो महान् ' इत्यस्य मूलध्येयस्य प्रतिमानम् आचार्याः सन्त्येव मम दृढश्रद्धेति। ऋषिषु महर्षिः , आचार्येषु प्राचार्यः, शासकेषु प्रशासकः, गुरुषु गुरुतमः, आदर्शभूतश्च प्रो. आर. देवनाथमहावर्यः सर्वदा सर्वथा स्मृतिपथे अवस्थितः टंकोत्कीर्ण इव वर्तते। बौद्धिकतायाः गौरीशङ्कर इव गुरुणां व्यक्तित्वं असाधारणमेव। गुरुणां वाणी अद्वितीया , विचाराः अभिनवाः, परं जीवनमूल्यानि शाश्वतानीति।

मया यदनुभूतम् , तदनुकथ्यते यत् भारतीयपाश्चात्यमनीषायाः तलस्पर्शी अध्येता , कुशलविश्लेषकः, अगणितगुणानाम् आगारश्च मे गुरुः आसीत्। महार्णवकल्लोलवत् स्पष्टाभिप्रेरणाभिव्यक्तिः, चिन्तनशिक्षण-प्रशिक्षणानुसन्धानपरियोजनाः प्रति दिशाबोध-निर्देशश्च स्वतः गुरुणां व्यक्तित्वे समुच्छलन्ति। विराटव्यक्तित्वे अनेकविधविद्यानां स्थानं प्रतीयते। मुहुर्मुहुः स्मृतिपथे मे गुरुणा बाह्याभ्यन्तरं व्यक्तित्वं स्पष्टतया प्रतिभाति।

दुर्भाग्यं मे अल्प एव सम्पर्कः , संवादो वा घटितः। वस्तुतः गुरुणां प्रत्यक्षशिष्यत्वं मया नावाप्तम्, मया प्रत्यक्षतः कार्यमेकम् अपि तेषां निर्देशने अकृतमिति। प्रत्यक्षतः अधिकायाः अन्तःक्रियायाः अपि अभाव एव मया अनुभूतः , तथापि गुरुणां चरित्रस्य प्रभावः मया साक्षात् अनुभूतः। यस्मिन् कस्मिन् प्रसङ्गे गुरुणां मङ्गलसानिध्ये यदधिगतम् , पुण्यस्मरणोपक्रमे सादरं स्मर्यन्ते।

मया प्रथमप्रसङ्गः जयपुरे जयपुरपरिसरेण 2014 तमस्य वर्षस्य मार्चमासे आयोजितायां राष्ट्रियसङ्गोष्ठ्यां प्राप्तः। तत्र चेतनाविषयमाश्रित्य विमर्शः प्रकल्पितः। चेतनासन्दर्भे भारतीयपाश्चात्यविचाराणां सविश्लेषणं संश्लेषणमतिप्रभावि आसीत्। साश्चर्यं प्रथमतया प्रतीतं यत्

भारतीयसम्प्रत्ययानाम् आधुनिकसन्दर्भेषु एतादृशी संयोजना अपि भवितुमर्हति। एतस्मिन् व्याख्याने गुरुणां वाचः प्रभाव अप्रतिम एव। मया तद्व्याख्यानं सञ्चयीकृतम् , येन यदा कदा श्रोतुमर्हः अहं स्याम्। अद्यापि संज्ञानविषयकसन्दर्भेभ्यः मया एतत्व्याख्यानं पुनः मया सावधानं श्रूयते। प्रारम्भे 'हयग्रीवस्तोत्रम्' आचारितम्, एतदपि मया प्रथमवारं श्रुतं गुरुमुखात्। पुनः वेदभाष्यसम्मितव्याख्यानमिदं माम् अधिकम् अशिक्षयत्। निष्कर्षतः प्रथमशिक्षेयं प्राप्ता भारतीयानां पाश्चात्यानाञ्च विचाराः परस्परं सम्बद्धाः सन्ति। अस्माभिः अन्तःप्रज्ञायाः अनुसन्धानेन चान्तर्निहितसम्बन्धानाम् अन्वेषणं कर्तव्यमिति।

द्वितीयप्रसङ्गः भोपालपरिसरे शिक्षाशास्त्रविभागेन आयोजितायां राष्ट्रियसंगोष्ठ्यां भारतीयमनोविज्ञानविषयमाश्रित्य। 2015 तमे वर्षे आयोजितेअस्मिन् कार्यक्रमे आचार्याः समामन्त्रिताः। तदा यथा जीवनचर्या अवलोकिता , सा अभिप्रेरणात्मिकी आसीत्। आचार्याणां गुफामन्दिरे आवासः कल्पितः , तत्र प्रेक्षितसाधुत्वम् अधुनापि प्रत्यक्षम्। व्याख्यानं तु अतिप्रभावपूर्णमेव आसीत्, यथा जयपुरे मया अनुभूतम्। व्याख्यानानन्तरं गुफामन्दिरतः विमानपत्तनं प्रति अत्यल्पयात्रायां मया गुरुन् प्रति निवेदितम् , भाषणमतिरिच्य भवतां चिन्तनं किञ्चित् लिखितं प्रकाशितञ्चापि स्यात्, अनेन अधिकलाभः सर्वेभ्यः स्यात्। अतिसारल्येन गुरुभिः अभिव्यक्तं यत् लेखनात् स्वाध्यायस्य , अध्यापनस्य च एव मम प्राथमिकता वर्तते। प्रतिदिनं शास्त्राणामभ्यासः,अनुशीलनमेव निरन्तरमभीष्टम्। ते प्राहुः तस्मिन् संवादे अध्यापनाध्ययनमेव अस्माकं मूलकार्यम्। अनेन संवादेन शिक्षेयं प्राप्ता अधिकाधिकप्राशासनिकव्यस्ततायाः कालेऽपि'स्वाध्यायः परमो धर्मः' इत्येव।

तृतीयप्रसङ्गः 2015 तमे वर्षे अगरतलायां पञ्चदिवसात्मकअभिविन्यासकार्यक्रमः। मुख्यतः शाब्दबोधप्रकरणमाश्रित्य विशिष्टव्याख्यानम्। इह आचार्यैः सह वैयक्तिकसंवादः अविस्मरणीयः, प्रेरणादायकश्च। अग्रिमाध्ययनाय स्वाध्यायाय यत्किञ्चित् मार्गदर्शनम् अधिगतम् , तदद्यापि उपकारि सार्थकमिति।

चतुर्थप्रसङ्गः अनुसन्धानोपक्रमे मया प्राप्तः। मे दिशानिर्देशने कानिचन अनुसन्धानानि प्रवृत्तानि। मुख्यतः मूल्यप्राथमिकतापरासंज्ञानयोः अनुसन्धानोपकरणद्वयं अस्माभिः निर्मितम्। प्राकृतोपकरणयोः विषयवस्तुवैधतानिर्धारणाय मया गुरवः निवेदिताः। गुरुणां स्वीकृतिः मम कृते

अप्रत्याशिता। इतोऽपि अतिशीघ्रप्रत्युत्तरम् अप्रत्याशितम् आसीत्। गुरुणां साशीर्वादं प्रतिक्रियाप्रत्यक्षम् अभिप्रेरणा एव आसीत्। पुनः गुरुणां वात्सल्यम् , आशीर्वादः, अभिप्रेरणासम्प्राप्तिः अकथनीया। शब्दानाम् असमर्थता एव प्रतिभात्यत्र।

चतुर्थप्रसङ्गः अगरतलायां पञ्चदिवसात्मकाभिविन्यासकार्यक्रमः आयोजितः। मुख्यतः शाब्दबोधप्रकरणमाश्रित्य विशिष्टव्याख्यानम्। इह आचार्यैः सह वैयक्तिकसंवादः अविस्मरणीयः , प्रेरणादायकश्च। अग्रिमाध्ययनाय स्वाध्यायाय यत्किञ्चित् मार्गदर्शनम् अधिगतम् , तदद्यापि उपकारि सार्थकमिति।

महन्निष्पत्तिरियं गुरुरेकः मौलिकरूपेण अभिप्रेरकः भवति। तस्य मौलिकचिन्तनेन , नैष्ठिकचरित्रेण च वयं निर्दिष्टाः भवन्ति। गुरुणा जीवनम् आदर्शजीवनं भवति अस्मद्भ्यः। एकमेकं कार्यं शास्तुः शिष्यस्य दिशानिर्देशनमेव। संस्कृतं भाषमाणाः अधिकाः जनाः समुपलभ्यन्ते , संस्कृतं जीवमानाः अत्यल्पाः एव। सामाजिकदृष्ट्या संस्कृतसंस्थानस्य यत्परिवेशः , संस्थाने यदानुकूल्यं रचितम्, संस्थानस्य या वर्तमानभाविपरिकल्पना उपस्थापिता , तत्र आचार्याणां दृष्टिः विशिष्टा। तैः द्योतितमार्गे नवाचारः , काचित् दृढसंकल्पेच्छा , काचित्चिन्तनसम्प्रेषणयोः विशिष्टस्थापना वा संस्कृतशिक्षाशास्त्रिभ्यः सर्वदा उपकारिणी एव भवतु। जीवने बहुवारंश्रुतं , परं सार्थकरूपेण प्रथमतया मया अनुभूतं यत्कस्यचित् दिवङ्गतस्य रिक्तस्थानम् अपूरणीयम् अस्ति। सर्वदा कामये गुरुणाम् आत्मनः शान्तये, सर्वदा शमिति।

***

# आचार्य रामानुज देवनाथन: एक संस्मरण

**शिवदत्त आर्य**

शिक्षाशास्त्र विभाग

श्री ला-ब-शा-रा-सं-विद्यापीठ, नई दिल्ली।

संस्कृत जगत् के मूर्धन्य विद्वान्, भारतीय संस्कृति के संरक्षणकर्ता, सामाजिक, शैक्षिक एवं प्रशासनिक कार्यों में दक्ष आचार्य रामानुज देवनाथ जी को कोटि कोटि प्रणाम करते हुए मैं आचार्य श्री से सम्बद्ध एक संस्मरण प्रस्तुत कर रहा हूं। वृत्ति प्राप्ति हेतु मेरा (रोजगार)साक्षात्कार दिल्ली स्थित संस्कृत विद्यापीठ में सुनिश्चित हुआ मैं थोड़ा घबराया हुआ था। परन्तु जब मैं साक्षात्कार समिति के समक्ष उपस्थित हुआ तब मैंने वहां महर्षि तुल्य आचार्य श्री को देखा इतने निकट से उनके सम्मुख होने का मेरा प्रथम अवसर था। तदनन्तर समिति के सदस्यों के प्रश्नोत्तर के पश्चात् उनके द्वारा शिक्षाशास्त्र एवं संस्कृत व्याकरण सम्बद्ध पूछे गए प्रश्नों का सही उत्तर देने हेतु जिस सरलता, शान्ति, कुशलता एवं मनोवैज्ञानिक सिद्धान्तों के अनुरूप उन्होंने मुझे प्रेरित किया जिसके फलस्वरूप मैं गन्तव्य तक पहुंचा जिसका मुझे सर्वदा स्मरण रहेगा।

आचार्य श्री के असमय पंच तत्व में विलीन होने से संस्कृत जगत् को अपूरणीय क्षति हुई है तथा युवाओं को एक सकारात्मक एवं सर्वकल्याणपरक मार्गदर्शक के मार्गदर्शन से वंचित होना पड़ा है जिसका अनुभव मैं स्वयं कर रहा हूं। आचार्य श्री का जीवन वृत्त यह दर्शाता कि संस्कृत जगत् एवं संस्कृत विद्या से सम्बद्ध विद्यार्थियों की उन्नति के लिए उन्होंने अथक प्रयास किया जिसके फलस्वरूप संस्कृत क्षेत्र की शिक्षण अधिगम प्रणाली तथा प्रशासनिक कार्य प्रणाली में व्यापक सुधार हुआ। आचार्य श्री से प्राप्त ज्ञान से ओत प्रोत विभिन्न विद्यार्थीगण तथा उनकी- जो) प्रशासनिक कुशलता के सौहार्दपूर्ण वातावरण में कार्य करने वाले कुछ भाग्यशाली लोगों से मैं उनके जीवन के बारे में विस्तारपूर्वक जान पाया। निष्कर्षतः ( आचार्य श्री के सम्पर्क में रहे आचार्य श्री जैसे विभिन्न शास्त्रें में दक्ष , अनेक भाषाओं में निपुण , संवेदनशील, कर्तव्यपरायण, मानवीय मूल्यों से युक्त ऐसे आदरणीय , पूज्यनीय एवं ओजपूर्ण व्यक्तित्व के चरणों में मेरा दण्डवत् प्रणाम।

# व्यक्तित्व के गुणों के धनी आचार्य रामानुज देवनाथन्

**डा. प्रेमसिंह सिकरवार**
सहायकाचार्य, शिक्षाशास्त्र विभाग,
श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठ,
नई दिल्ली -110016 Email-premsikarwar23@gmail.com

हमारा यह भारतवर्ष ऋषिओं, मुनियों और महर्षियों की पुण्य भूमि रहा है। आदि काल से ही यहां ऋषि परम्परा को अपनाया जा रहा है। इसी परम्परा को आगे बढाने में अपना योगदान देने वाले आचार्य और देवत्व गुणों के प्रतिबिम्व स्वरूप इस संसार में कुछ ही ऐसे व्यक्तित्व के धनी महान् पुरुष हुए हैं। जिनका ज्ञान , चरित्र और व्यक्तित्व का समंजन षिक्षा जगत् में अविस्मरणीय रहता है। एक भी इस प्रकार व्यक्तित्व का विलक्षण गुण नहीं है जो उनमें विद्यमान न हो। न केवल पाष्चात्य व्यक्तित्व के गुण ही नहीं अपि तु भारतीय परम्परागत व्यक्तित्व के गुण आचार्य प्रोफेसर रामानुज देवनाथन् जी में विद्यमान नहीं हो। आचार्य के दर्षनमात्र से ही सभी का मन आनन्दित हो उठता था और सभी की आन्तरिकी स्थिति भी दृढ होती थी। यह मेरा है या पराया है इस प्रकार भावना से परे थे। सभी के प्रति उनका स्नेहपूर्ण व्यवहार था। कुछ उन्हें गुरु के रूप में , अन्य मार्गदर्षक के रुप में, कुछ मित्र के रूप में, कुछ ऋषि के रूप में, अभिभावक के रूप में, प्रेरक के रूप में, प्रशासक के रूप में , पिता के रूप में उनके स्वरूप को और व्यक्तित्व को स्वीकार करते हैं। आचार्य सभी के प्रेरणा के स्रोत थे। उनकी अध्यापनशैली एवं बोध कराने का सामर्थ्य अत्यन्त प्रषंसनीय है। वे अपने षिष्यों , छात्रों, अध्यापकों और कर्मचारियों को उनके कौषल के आधार पर आगे बढने के लिए प्रेरणादायक थे तथा उन्हें कार्यकुशल बनाने में सहयोग करते थे। इस लेख में व्यक्तित्व के गुणों के धनी आचार्य रामानुज देवनाथन् जी के वैशिष्ट्य का प्रतिपादन करने का प्रयास है।

1. **आचार्य का परिचयः-**

आचार्य रामानुज देवनाथन् महोदय का जन्म 02 अप्रैल सन् 1959 तमिलनाडु प्रान्त के कोडुलोरे जनपद के तिरुवहीन्द्रपुर गांव में हुआ। इनके पिता का नाम श्री एस. रामानुजाचार्य और माता का नाम श्रीमती कनकवल्ली था। इन महोदय के गुरु आचार्य वासुदेव श्रीवत्साचार्य थे। ये अनेक भाषाओं के ज्ञाता , वक्ता और भाषाविषेषज्ञ थे। जैसे-संस्कृत , तमिल, हिन्दी, अंग्रेजी, तेलगु, कन्नड, मलयालम्, उडिया आदि। इन्हांने अनेक उपाधियां प्राप्त की। जिनमें षिक्षाषास्त्र में स्नातक , व्याकरणविषारद, व्याकरणषिरोमणि, व्याकरणषास्त्र में विद्यावारिधि , शिक्षाशास्त्री, शिक्षाचार्य, दर्शनशास्त्र में आचार्य, धर्मशास्त्र में आचार्य और कृष्णयजुर्वेद की तैतरीयशाखा का गहन अध्ययन किया।

आचार्य रामानुज देवनाथन् ने षिक्षा के क्षेत्र में किये गये सेवाकार्य के लिए अनेक पुरस्कारों से पुरस्कृत किया गया। जैसे-

1. विजयश्री
2. संस्कृतश्री
3. शास्त्रवारिधि
4. शास्त्रविद्यामणि
5. श्रेष्ठ शिक्षक सम्मान
6. श्रेष्ठ पीपीटी प्रस्तुत सम्मान
7. सप्तऋषि सम्मान
8. विद्यापण्डित सम्मान
9. महर्षि हारीतऋषि सम्मान 2013 तमे वर्षे महाराणा मेवाड फाउण्डेषन के 32 वें वार्षिक सम्मान समारोह में दिया गया।

ये आचार्य न केवल शिक्षण कार्य में अपि तु प्रशासन के क्षेत्र में भी अग्रणी और पूजनीय रहे हैं। अपनी कार्य कुशलता से शिक्षक पद से लेकर कुलपति पद पर उन्नत होकर सुषाभित रहे हैं और अपने जीवन के 33 वर्ष विभिन्न पदों पर कार्य करते रहे।

1. कुशल शिक्षक के रूप में - 06 वर्ष

2. कुशल प्राध्यापक के रूप में -10 वर्ष
3. कुशल आचार्य के रूप में - 05 वर्ष
4. कुशल प्राचार्य के रूप में - 07 वर्ष
5. कुशल कुलसचिव के रूप में - 02 वर्ष
6. कुशल कुलपति के रूप में - 03 वर्ष

इनके के अतिरिक्त भारत में अनेक संस्कृत विश्वविद्यालय की प्रबन्धन समितियों में सलाहकार के रूप में , प्रबन्धन कर्ता के रूप में, अध्यक्ष के रूप में और सदस्य के रूप में सुशोभित रहे हैं।

2. **आचार्य का व्यक्तित्व**:-

आचार्य जी का व्यवहार सदैव बच्चों के प्रति , अध्यापकों के प्रति , कर्मचारियों के प्रति समान ही स्नेहपूर्ण कहीं पिता की तरह, बडे भाई की तरह, मित्र की तरह और कहीं दादाजी की तरह देखा जा सकता था। छोटे बच्चों को गोद में खिलाना उन्हें अतीव आन्नद की अनुभूति कराता था। उनके द्वारा सदैव संस्था हित एवं छात्र कल्याण में कार्य करना उनके व्यक्तित्व को सूर्य और चन्द्रमा की तरह अटलता को प्रदर्षित करता है। संस्कृत एवं संस्कृति के लिए यह सूक्ति को चरितार्थ करते हैं -'' मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ''। अर्थात् ये महान् व्यक्तित्व के धनी मन से , वचन से, और कर्म से महात्मा की तरह वास्तविक और स्वाभाविक व्यवहार करते थे। इनका व्यक्तित्व सभी के लिए प्रेरणादायक था। इनके दर्शनमात्र से ही सभी को एक असाधारण अनुभूति प्राप्त होती थी। उनके द्वारा किसी भी विषय के बारे में एकवार यदि कक्षा में या कहीं भी प्रस्तुत कर दिया तो उस विषय की पुनरावृत्ति वे नहीं करते थे। इस प्रकार के व्यक्तित्व को जानकर सभी लोग आकर्षित हुए विना नहीं रह सकते थे। उनके ऋषियों और महर्षियों की तरह तप साधना में लीन रहना , स्वयं अपना भोजन पकाना, केवल कुए के जल का प्रयोग करना आदि नियम आधुनिक विष्व में प्राचीन भारत के ऋषियों की परम्परा का संरक्षण का संकेत देते हैं। उनकी स्मरणषक्ति भी अत्यन्त गौरवपूर्ण थी। एक बार किसी व्यक्ति या छात्र से मिलने पर दूसरी बार कहीं भी पुनः मिलने पर उसे नाम से सम्बोधित करना। वे किसी भी व्यक्ति के प्रति यह मेरा नहीं है भाव नहीं रखते थे सबको अपना मानकर प्रेरित और पोषित करते थे। वे सत्यनिष्ठ धर्मपरायण छात्रहितैषी और ईष्वरानुरागी थे। हमेशा

निस्वार्थ भाव से सेवा करने में उन्हें आनन्द की अनुभूति होती थी किसी कार्य के करने पर मुझे क्या लाभ होगा इस प्रवृत्ति से सदैव परे रहते थे।

3. **प्राचीन ग्रन्थों में व्यक्तित्व के गुण:-**

प्राचीन भारतीय ग्रन्थों में व्यक्तित्व के गुणों में से आचार्य के गुणों में उत्तम स्वास्थ्य , शारीरिक संघटना, वेषभूषा, वाणी आदि शारीरिक गुण तथा मैत्री का भाव , परोपकार की भावना , समाजसेवा, बुद्धि और उत्तमचरित्र आदि मनोवैज्ञानिक गुण भी सम्मिलित थे। जैसा कि पंचतन्त्र में प्राप्त होता है। -

''आकारैरिगिंतैर्गत्या चेष्टया भाषणेन च।

नेत्रवक्त्रविकारैश्च ज्ञायन्ते अन्तर्गतं मनः।।'' इति।

चारों वर्णों में प्रत्येक वर्ण में आध्यात्मिक प्रवृत्ति उपयुक्त षिक्षा दीक्षा नैतिकादर्शों का वर्णन दिखाई देता है। जैसा कि मनुस्मृति उनके कार्यविभाजन के बारे में प्राप्त होता है -

''अध्यापनमध्ययनं यजनं याजनं तथा।

दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत्।।1

अध्यापनादि कर्मों का सृष्टिप्रकरण में सृष्टिविषेषता नाम को उनकी विधि के रूप में छह कमों का वर्णन किया गया है। ये अध्यापनादि छह कर्म ब्राह्मणों के लिए कल्पित हैं।

**त्रिगुणानामाधारेण व्यक्तित्वम्-**

भारतीय षिक्षा मनोविज्ञान में मानवों की प्रकृत्ति के अनुरूप व्यक्तित्व को तीन प्रकार का बताया है। जैसे -सात्विक व्यक्तित्व , राजसिक व्यक्तित्व, और तामसिक व्यक्तित्व। सभी लोगों में तीनों गुणों की समानता नहीं होती है। इस तीन गुणों की प्रधानता वाले संसार में कुछ लोग सत्व गुणों की प्रधानता वाले, कुछ रजोगुण की प्रधानता वाले और कुछ तमोगुण की प्रधानता वाले लोग होते हैं। तीनों गुणों की मात्रा के आधार पर व्यक्तित्व का पता चलाता है। इन गुणों के लक्षण तो भिन्न भिन्न होते है परन्तु ये अलग अलग निवास नहीं करते हैं। ये एक ही व्यक्ति में एकत्रित होकर रहते हैं। रजोगुण और तमोगुण की न्यूनता होने पर सत्वगुण होता है , उसी प्रकार सत्वगुण और तमोगुण की न्यूनता होने पर रजोगुण तथा सत्वगुण और रजोगुण की न्यूनता होने पर तमोगुण की

प्रधानता मात्रा के आधार पर इनका ज्ञान सम्भव है। इसका विस्तृत वर्णन भगवद्गीता में प्राप्त होता है। जैसे-

''दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते।।2

अर्थात् व्यक्ति जब अपनी सम्पूर्णकामनाओं का त्याग करता है तथा अपने आनन्द में सन्तुष्ट रहता है या दुःखों में दुखी नहीं होता है या राग से और भय से विमुक्त होता है वह ही स्थितप्रज्ञ अर्थात् परिपक्व व्यक्तित्व को धारण करता है। इसका स्पष्ट उदाहरण वाल्मीकि रामायण में श्रीराम के व्यक्तित्व में दिखाई देता है। जैसे-

''धर्मज्ञः सत्यसन्धष्च प्रजानां च हिते रतः।
यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान्।।3

श्रीराम के परिपक्व व्यक्तित्व के स्वरूप का पता तब चलता है जब पूरे अयोध्या नगर में श्रीराम के राज्याभिषेक की तैयारी चल रही है और उस समय उनके पास वनगमन की सूचना आती है। उस सूचना को सुनकर भी श्रीराम विचलित नहीं होते है और साम्यावस्था का परिचय देते हैं। जैसे-

न वनं गन्तुकामस्य त्यजतश्च वसुन्धराम्।
सर्वलोकातिगस्येव लक्ष्यते चितविक्रिया।।4
सर्वो ह्यभिजनः श्रीमान् श्रीमतः सत्यवादिनः।
नालक्षयत रामस्य किंचिदाकारमानने।।5

## 4. प्राचीनग्रन्थों के आधार पर आचार्य का व्यक्तित्व -

उपर प्रतिपादित आचार्य के अध्यापन-अध्ययनादि व्यक्तित्व के बोध कराने वाले छह कर्म परम्परा के अनसार आचार्य रामानुज देवनाथन् में ये छह गुण प्राचीनकाल में जिस रूप में विद्यमान थे उसी रूप में सुषोभित थे। विभिन्न वर्णो के अनुसार जो जो कर्म प्रतिपादित हैं उन सभी कर्मों का भी शिक्षाधिगम की प्रक्रिया की पालना में यथावसर अवलोकन करने का सुअवसर प्राप्त करते थे। न केवल वर्णों के अनुरूप उनमें सद्भाव था अपितु आयुर्वेद में प्रतिपादित गुणों वात पित्त और कफादि गुणों के समवाय के स्प में दिखाई देते हैं। इसमें कोई सन्देह नहीं है। वे अत्यन्त मेधावी

कुशल नेतृत्व ओजस्वी वक्ता बुद्धिषाली स्पष्टवक्ता तेजस्वी दृढषास्त्र मतियुक्त चिरमित्र धनी सात्त्विक व्यक्तित्व सभी गुणों के अग्रणी और धैर्यवान् आचार्य थे।

**5.उपसंहारः-**

उपसंहार के रूप में कह सकते हैं कि आचार्य के आदर्ष व्यक्तित्व भावनात्मक दृढता सामाजिक समायोजन समरसता सात्त्विकता समंजनता बोधपरायणता सत्यनिष्ठता और पक्षपातरहित व्यवहार सभी के प्रति समभाव उत्तमविचार स्वार्थरहित और संस्कृत एवं संस्कृति के प्रति परायणता की भावना आचार्य रामानुजदेवनाथन् को चिरस्मरणीय आदरणीय अनुकरणीय बनाती है ये सभी गुण जो देवताओं में विद्यमान रहते हैं उन्हें देवों की श्रेणी में ले जाते हैं। वे न केवल मानवमात्र के लिए अपितु देवाताओं के लिए भी अनुकरणीय हैं। ये नियमों की प्रतिमूर्ति संस्कृत जगत में और सम्पूर्ण विश्व में सात्त्विक लोगों के हृदय में प्रका शित होते रहे और हमें अपने दैवीय स्वरूप से आगे बढने के लिए प्रेरित करते रहें।

सन्दर्भ-

1.मनुस्मृतिः - 1/88 2.श्रीमद्भगवद्गीता - 2/56 3.वाल्मीकिरामायणम्, बालकाण्डः, प्रथमसर्गः- 12 4.वाल्मीकिरामायणम्, अयोध्याकाण्डः, सप्तदशसर्गः- 25 5.वाल्मीकिरामायणम्, अयोध्याकाण्डः, सप्तदशसर्गः- 26

**सन्दर्भग्रन्थसूची-**

1.अत्रिदेव, सुश्रुतसंहिताः पंचम संस्करण, मोतीलाल बनारसीदास प्रकाशन, दिल्ली, 1975

2.जायसवाल, सीताराम, भारतीय मनोविज्ञान और शिक्षाः तृतीयसंस्करण , आर्य बुक डिपो प्रकाशन, नई दिल्ली, 2004

3.मिश्रः लोकमान्य, आधुनिकं मनोविज्ञानम्ः प्रथमसंस्करणम्, मृगाक्षी प्रकाशनम्, लखनउ, 2013

4.गुप्ता, एस. पी., उच्चतर शिक्षा मनोविज्ञान, शारदा पुस्तक भवन, इलाहाबाद, 2004

5.पद्ममित्रश्रीनिवासः, बी., शिक्षायाः मनोवैज्ञानिकाधाराः, जगदीषपुस्तकालय, जयपुर, 2012

6.भट्टाचार्यः, दिनेशचन्द्रः, प्राचीनभारतीयमनोविज्ञानम्, कलकत्ता, 1972

7.सरस्वती, परमहंसजगदीष्वरानन्दः, वाल्मीकिरामायण, विजयकुमार गोविन्दराम हासानन्द प्रकाशन, दिल्ली, 2000

8.शर्मा हरिदत्त, संस्कृतसूक्तिसमुच्चयः गद्यखण्डः, दिल्ली संस्कृत अकादमी, दिल्ली, 2005
9.शास्त्री, राकेश, मनुस्मृतिः प्रथमसंस्करण, विद्यानिधि प्रकाषन, दिल्ली, 2005
10.नागमुनिरेड्डी पि., शिक्षामनोविज्ञानम्, रा. संस्कृतविद्यापीठम्, तिरुपतिः, 2008

***

# पुण्यश्लोकः आचार्यः रामानुजदेवनाथः

**डा. देवदत्तसरोदे**
सहायकाचार्यः, शिक्षाशास्त्रविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि)
क. जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई

**वज्रादपि कठोराणि, मृदूनि कुसुमादपि।**
**लोकोत्तराणां चेतांसि, को हि विज्ञातुमर्हति।।**

संस्कृतशास्त्ररक्षायै सङ्कल्पसिद्धये वज्रादपि कठोरं स्वान्तं विधाय स्वीयमायासमविगणय्य नैरन्तर्येण अहर्निशं घटमाना: आचार्या: रामानुजदेवनाथा: , बहुश्रुता:, अजातशत्रव:, छात्रवत्सला:, भाषाप्रान्तक्षेत्रवर्ग-भेदातीता:, समदर्शिनश्चासन्निति कथने नास्त्यतिशयोक्ति:। निरुक्ते आचार्यस्य यन्निर्वचनं विहितं **आचार्य: कस्मा त्? आचारं ग्राहयति , आचिनोति अर्थम् , आचिनोति बुद्धिमिति वा** इति तन्निर्वचनस्य मूर्तिमन्त: आचार्या: देवनाथवर्या:।

प्राचीनसंस्कृतवाङ्मयानुशीलनेन सुतरामेतत्प्रतिपद्यते यत् पुरा आचार्यस्य आसीत् कश्चन महिमा, तस्य सदाचारतपोमयं जीवनं कस्मै न स्पृहयति ? किञ्च एवम्भूतेन जीवनेन ऐहिकामुष्मिकफ़लावाप्तिरपि भवति।

**आचार्यः आचारं ग्राहयति** - आचार्यः सदाचारी , धार्मिकः, नैतिकः, तपस्वी सन् आत्मनः अन्तेवासिनः आचारं ग्राहयति। वस्तुतः आचारस्तु आचरणेनैव ग्राह्यते , न तु उपदेशेन। ज्ञानस्य परिसमाप्ति आचारे भवति :, सदाचारमन्तरेण जीवनंवैयर्थ्यमापद्यते , जगत व्यवस्थायै : अत एव मनुनापि उक्तम् :सदाचार :मूलाधार **आचारः परमो धर्मः** इति। आचार्यदेवनाथमहोदयानां जीवनं तपोपूतं सदाचारमयमासीत्। शास्त्रानुकूलजीवनाय तेषाम् आचरण मेव नि:शब्दोपदेश: अवर्तत। सामाजिकजीवने समाजे आदर्शमुपस्थापयितुं तीक्ष्णव्रतानि धारयन्तो न जातु कदाचित् असद्वर्त्मनि ते प्रवृत्ता:।

**आचार्यः आचिनोति अर्थम्** –आचार्यः बहुश्रुतः स्यात् नानाविद्यासु , कलासु, शिल्पेषु निपुणः भवेत्। लोके सर्वविधज्ञानविज्ञानस्य शिक्षणं शब्दैः भवति। शब्दस्यैव विवर्तभूतं जगत्, शब्दमूलमिदं सर्वम् । शब्दाः तेषामर्थाश्च परस्पर सम्बद्धाः भवन्ति। शब्दैरेव नानाविद्याः विज्ञानं कलाः शिल्पं ज्ञायन्ते। शब्दविद् आचार्यः अनेकाः विद्याः शिल्पानि च शिक्षयति। आचार्यदेवनाथवर्याः नानाशास्त्रचणाः, विचक्षणाः, बहुशास्त्रविदः बहुभाषाविदः, नैककलाकोविदाः, अध्यापनपटवः आसन्, प्राचीनाधुनिकशास्त्रेषु अव्याहता गतिस्तेषाम्।

**आचार्यः आचिनोति बुद्धिम्** - आचार्यः अन्तेवासिनि अन्तर्निहिताः सुप्ताःआध्यात्मिकशक्तीः मानसिकशक्तीःच, जागरयति। आचार्यः बुद्धेः विकासं करोति , मानसिकशक्तिं वर्धयति बुद्धिं सर्जनकार्येषु विद्यासु च नियोजयति। सन्मार्गे प्रेरयति। अनेन अन्तेवासिनः बौद्धिकमानसिकान्तःसुप्तशक्तीनाम् विकासः सम्पद्यते। आचार्याणां देवनाथमहोदयानां सानिध्यं ये प्राप्तवन्तस्ते सुतरां जानन्ति , कथं तेषां कृपाकटाक्षेण , उपदेशेन, मार्गदर्शनेन च कियत्सामर्थ्यं कियत्साफ़ल्यं तैस्समुपार्जितम् इति , ते छात्राणां सामर्थ्यं , प्रतिभां, बुद्धिशक्तिं सम्यग् जानन्ति स्म तदनुगुणं समुचितं मार्गदर्शनं कुर्वन्ति स्म , बहवः सामान्या जना एतेषां दाक्षिण्येन उन्नतं पदमलमकार्षुः।

उपर्युक्ताचार्यगुणकीर्तनेन सुतरामेद् ज्ञायते , यत् कविर्दण्डी कविर्दण्डी कविर्दण्डीइति यदेतद् उक्तिर्लोके प्रथि ता, तद्वद् आचार्यो देवनाथन् आचार्यो देवनाथन् आचार्यो देवनाथन् इति कथने नास्ति मनागपि संशीतिलेशः।

**आचार्याणाम् अन्तिमं संस्मरणम्** – ३१ दिसम्बर २०१६ तः २ जनवरी २०१७ यावत् वलसाडनगरे शान्तिमन्दिरे **भारतीयवाङ्मये भक्तिस्वरूपविमर्शः** इति विषयमधिकृत्य त्रिदिवसीयाराष्ट्रियसंगोष्ठी आयोजिता आसीत् , तत्र आचार्याः निमन्त्रिताः आसन्। तान् सपर्यापुरस्सरं मुम्बईविमानपत्तनतः आनेतुमहमादिष्टः, अतः अहं वलसाडतः मुम्बईविमानपत्तनं प्राप्य तेषां स्वागतीकर्तुंनानाविधानि फ़लानि नारिकेलफ़लानि (जलम्) आदाय प्रतीक्षमाणोऽभूवम्। सायं षड्वादने जम्मुपरिसरतः आचार्याः विमानयानेनतत्र सम्प्राप्ताः , तत्रैव जयपुरपरिसरतश्च आचार्याः Y.S. रमेशमहोदया अपि आगताः। ततः **इनोवा**यानेन वलसाडस्थं शान्तिमन्दिरं प्रति वयं सम्भूय प्रस्थिताः, मध्येमार्गम् आचार्यान् सविनयं कानिचन फ़लानि किञ्चित्जलं स्वीकर्तुं विनिवेदितवान् , परं तेषां ती क्ष्णं व्रतम् आसीत् **'मास्तु अधुना मुखप्रक्षालनम् आचमनादिकं शुचिनावारिणा**

**विधाय ततः परं स्वीकरोमि इति ते अवोचन्** ', रात्रौ दशवादने एकस्मिन् स्थाने वयं स्थिताः तत्र आचार्याः जलादिकमादाय मुखप्रक्षालनम् आचमनादिकं विधाय क्षुधार्ताः सन्तोऽपि अनग्निसंयोगभूतम् अपक्वमन्नं दधि भुक्तवन्तः , मन्ये आयुर्वेददृष्ट्या विरुद्धाहारो विद्यते, यतो हि **नक्तं दधि न अश्नीयात्** इति उच्यते दधि कफं वर्धयति विशिष्य रात्रौ न भोक्तव्यम्, इतः आरभ्य एव आचार्याणाम् अनारोग्यं शनैश्छनैः वर्धितम्, ततो निर्गताः वयं रात्रौ सार्ध एकादशवादने शान्तिमन्दिरं सम्प्राप्ताः। आचार्याः श्रान्ताः आसन् , रात्रौ विश्रम्य अन्येद्युः महति प्रत्यूषे उत्थाय नित्यनैमित्तिकं विधातुं कूपजलमाहर्तुं कूपदेशम् अगमन् , तत्रैव दैवमाह्निकं निर्वर्त्यकल्पितावासस्थाने समागताः। राष्ट्रियसङ्गोष्ठ्यां तेषां भक्तिविषयम् अधिकृत्य प्रबोधनम् अद्वितीयमवर्तत गोष्ठीं समाप्य ते आचार्याः रमेशवर्याः, आचार्याः सुदेशकुमारशर्ममहोदयाश्च , **NAAC** कार्यं सम्पादयितुं जनवरीमासस्य ४ दिनाङ्के २०१७ तमे ईस्वीयाब्दे मुम्बईपरिसरेविद्यापीठे समागताः , तदा अहम् आचार्यान् आगामिनि दिने ५ दिनाङ्के २०१७ तमे ईस्वीयाब्दे शास्त्रशिक्षणमधिकृत्य विशिष्यशाब्दबोधविषये विशिष्टं व्याख्यानं विधातुं विनम्रभावेन प्रार्थितवान् , आचार्या अपि सामोदमङ्गीकृतवन्तः। अहम् आचार्याणां सम्माननिमित्तं प्रावारादिकम् (राङ्कवम्) अपि च कार्यक्रमनिमित्तम् अन्यसम्भारादिकं सङ्गृह्य कार्यक्रमस्य यथाविधि सन्नाहं विधाय निरगमम्। आचार्यदेवनाथमहोदयानां कृते कूपजलमपेक्षितं भवति इति हेतोः बालाजीमन्दिरे वासव्यवस्था कल्पिता। अपरस्मिन् दिने यथापूर्वं महता उत्साहेन व्याख्यानकार्यक्रमे व्यापृतोऽभूवम्, कार्यक्रमस्य काले समासन्ने, सूचना आगता यद् आचार्याणाम् अनारोग्यं विद्यते इति कारणात् वैद्यस्य परामर्शम् औषधादिकं गृहीत्वा विलम्बेन व्याख्याननिमित्तमागमिष्यन्ति इति। महति विलम्बे सञ्जाते पुनः सूचना समागता यत्, आचार्याणाम् अनारोग्यमत्यन्तं वर्धितम् अतः ते आगन्तुं न प्रभवन्ति कार्यक्रमं निरस्तीकुर्वन्तु इति। परिसरप्राचार्या; प्राध्यापकाः इतरे कर्मचारिणः व्याकुलमनस्काः सेवासुश्रूषाकर्मणि संलग्नाः, विद्यापीठस्य निकटस्थे चिकित्सालये सघनकक्षेचिकित्सानिमित्तं क्षिप्रं सन्निवेषिता आचार्याः, वस्तुत; रात्रौ असकृत् वान्तयः सञ्जाताः शरीरे निर्बलता ज्वरश्च वर्धितः, परं सुकुमारचित्ताः धैर्येण तितिक्षां कुर्वाणाः , रात्रौ कमपि स्वीयं कष्टं न सूचितवन्तः , महता कष्टेन कथं कथमपि रात्रिं व्यरंसीषुः। यथा यथा भानुः उदयाचलम् आरूढ; तथा तथा अनारोग्यं ज्वरश्च वर्धितः, मनसि अकल्पितं किञ्चिदनिष्टमनतिदूरे आयति एव स्थितमिव प्रत्यभात् ततः भीत्या अति भूमिं गतो मे रणरणकः , किं वा भविष्यति इति अनल्पकल्पनादोलादोलायमानं मे स्वान्तमधिकमेव

विषण्णमभूत्, द्रुतमहं चिकित्सालये समुपगम्य सेवासुश्रूषादिकर्मसु संलग्नोऽभूवम्, पृच्छापरवशेन मुख्यचिकित्सके पृष्टे सति स एवमाह आचार्याणां शरीरे विषाणूनां संक्रमणं बहुत्र संञ्जातमस्ति , अत: जीवितस्य आशा क्षणे क्षणे क्षीणायमाणा विद्यते पुनरपि वयं प्रयतिष्यामहे , अत: परं सर्वं दैवायत्तम्, २४ होरासु यदि संक्रमणं नियन्त्रितं चेत् असव: रक्षिता: भविष्यन्ति अन्यथा नेति। क्षणे क्षणे तत्र भयमिश्रितम् औत्सुक्यम् एधमानमासीत्, प्रतिहोरं वैद्या आरोग्यवृत्तं प्रकटयन्ति स्म तदा कदाचित् आनुकूल्यं क्वचित् अनभीष्टं तद्भवति स्म , एवमादिनम् उत्कण्ठया एव दिवसो यात: , परं स्वास्थ्यं न संवर्धितं अनारोग्यमेव वर्धित म् उत्तरोत्तरं स्थिति: विषमपदमवाप्नोत्। एतादृशीं भयङ्करीं स्थितिमाकलय्य आचार्याणां जेष्ठपुत्र: डा.दयानाथ: आकारित:, ६ दिनाङ्के २०१७ डा . दयानाथ: मध्याह्ने समागत:, तावता आचार्याणाम् आरोग्यं स्थिरपदमाबध्नाति स्म, आचार्या: सर्वै: समं भाषन्ते स्म, तत: परमारोग्यं तु नष्टमिव जातं यन्त्रारूढा तेषां जीवनप्रणाली स्थिताभवत् , कालरात्रिः शनैश्छनै: समुपस्थिता न केनापि कल्पितं यत्हृष्टा: पुष्टा: स्वस्था: इव दृश्यमाना आचार्या: एवमल्पीयसि काले कालकवलीभूता ; भविष्यन्ति इति जनवरीमासस्य ७ दिनाङ्के ६.००वादने आदौ वृक्कौ निश्शक्तौ जातौ तत: भौतिकदेहं परित्यज्य दिवमुपगता: गुरव:। परमार्थत: केनापि न तर्कितमासीत्यद् अकस्माद् अयमशनिपातो भविष्यति इति, यैषा संस्कृतजगत: महती हानिर्न केनापि पूरयितुं शक्या, यत आचार्यदेवनाथमहोदयानाम् उत्कृष्टं दिव्यजीवनं समेषां कृते महत्प्रेरणास्थानं विद्यते, वस्तुत: आचार्याणां तपोमयेन जीवनेन विद्यया च लोकहितमजायत, अत एव मनसि सहसा स्फुरति **हा हन्त हन्त गत: शास्त्रमार्तण्ड: अस्ताचलम्................**

***

# आदर्श अध्यापक के गुणों को परिपूर्ण आचार्य रामानुज देवनाथन जी

**डॉ. श्रीगोविन्द पाण्डेय**

सहायकाचार्य, शिक्षाशास्त्र विभाग,

राष्ट्रिय संस्कृत संस्थान

(मानित विश्वविद्यालय) भोपाल परिसर

श्लिष्टा क्रिया कस्याचिदात्मसंस्था संक्रान्तिरन्यस्य विशेषयुक्ता।
यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव।।

महाकवि कलिदास के इस श्लोक का आशय शिक्षकों को विषय ज्ञान के साथ-साथ सम्प्रेषण कौशल में दक्षता होने पर ही यथार्थ शिक्षक का स्थान समाज में प्रतिष्ठित होता है। इस आशय को आचार्य देवनाथन जी ने पूर्ण रूप से सार्थक किया। उनके पारिवारिक परिवेश एवं संस्कृति से उनके नैष्ठिक विचार एवं आदर्श परिपालन परम्परागतरीत्या वेदाध्ययन करके वैदिक विषयों को आधुनिक सन्दर्भ में समन्वय करना एवं शास्त्रीय विचारों को तर्कसंगत ढंग से उपस्थापन करना वैचारिक मतभेदों को समन्वित करना , प्राचीन अर्वाचीन दृष्ट्या शिक्षाशास्त्र के विषयों का विश्लेषण करना, चाहें वह कक्षा अध्यापन में , वैयक्तिक अध्यापन में, सभा, संगोष्ठी, कार्यशाला या कोई विद्वत् मंच, उन सभी संदर्भों में आपने अपना परिचय एक उत्तम एवं आदर्श शिक्षक के रूप में दिया है जिसकी चर्चा सर्वत्र संस्कृत जगत में होती रही है।

भाषाओं पर आपकी पकड इतनी अच्छी थी कि संस्कृत विद्वान एवं तमिल मातृभाषी होते हुए अंग्रेजी भाषा में पीछे नहीं थे। साथ ही अन्य भाषाएं हिन्दी , तेलगू, कन्नड, मलयालम, उडिया में भी आपका प्रवेश कम नहीं था , हिन्दी तो इतनी अच्छी बोलते थे कि शायद हिन्दी भाषी भी उतनी भाषा शुद्धता पर ध्यान देते हों। हर भाषा के साहित्य एवं संस्कृति में भी एक समान विचार से जिज्ञासा प्रकट करना बहुत बडी बात है। यह भी एक कारण है कि आपकी पहचान पूरे भारत में हुई।

शिष्य वात्सल्य के बारे में विशेष रूप से पुरी , तिरुपति, दिल्ली, मुम्बई, शृङ्गेरी, गुरुवायूर, जम्मू इत्यादि स्थानों पर जो व्यवहार दर्शाया है वह प्रशंसनीय एवं प्रेरणादायक है जैसे किसी विषय का छात्र हो , चाहे वह अपरिचित ही क्यों न हो , यदि कुछ भी निवेदन किया है तो अवश्य ही

सहयोग करते थे। भले ही इस सहयोग में आपको कोई परेशानी ही झेलनी पड़े तो उसकी परवाह नहीं करते थे।

आपने कुशल समायोजक , संयोजक, व्यस्थापक, प्रशासक, निर्णायक, प्रोत्साहक, सहायक, संरक्षक के रूप में विभिन्न सन्दर्भों में काम किया। इसके अलावा विभिन्न संस्कृत विश्वविद्यालयों के शैक्षिक समिति , शैक्षणिक परिषद्, चयन समिति, प्रबन्धन समिति एवं मन्त्रालय के प्रतिष्ठित समितियों में सदस्य के रूप में आपने दायित्वों का निर्वहण भी किया।

मेरा आपके साथ पारिवारिक सम्बन्ध रहा कयोंकि आपके साथ यह उक्ति चरितार्थ होती है—

अक्षरस्यापि चैक पदार्थस्य पदस्य वा।
दातारं विस्मरन् पापी किं पुनर्धर्मदेशिनम्॥ हरिवंशपुराणम्

सन् १९८०-८१ में आपने तिरुपति में शिक्षाशास्त्र विभाग के दौरान अध्यापित गुरुओं का सम्मान अन्य गुरुओं के समान किया है जिसका उदाहरण हमारे पूज्य पिताजी आचार्य स्व. चन्द्रशेखर पाण्डेय जी , आचार्य हरिहर झा जी , आचार्य स्व. श्रीधर वशिष्ठ जी एवं आचार्य स्व. आर.एन. अरलिकट्टी जी जो उन दिनों आपको पढ़ाये थे उन सभी के प्रति जो मैंने देखा और समझा वह गुरु भक्ति और श्रद्धा कम ही लोगों में देखने को मिलती है। वह श्रद्धा-भक्ति भी गुर्वाज्ञाकरणं हि सर्वगुणेभ्योऽतिरिच्यते के भाव में आपने निभायी जिसे सभी लोग जानते हैं। सन् १९९४-९५ शिक्षाशास्त्र विभाग पुरी में हमारे ज्येष्ठ भ्राता प्रो. लक्ष्मीनिवास पाण्डेय के साथ आपकी अभिन्न मित्रता भी देखी। परिसर में छात्रों की प्रश्नोत्तरी प्रतियोगिता चल रही थी जिसका निर्वहण आप दोनों लोग बड़े ही उत्साह से सुन्दर तरीके से आपसी सहमति से छात्रों के समक्ष कर रहे थे। उन दिनों वहाँ पर आचार्य हरिहर झा जी प्राचार्य एवं आचार्य ए.पी. सच्चिदानन्द जी शिक्षाशास्त्र विभागाध्यक्ष थे। उन्हीं दिनों हमारे भाई साहब की स्कूटर चोरी हो गई थी तो आपने अपना स्कूटर भाई साहब को देकर अपने स्वयं बिना वाहन के चलते थे। समय-समय पर आपका सहयोग विभिन्न सन्दर्भों में हमने देखा। इस प्रकार उनका सहयोगात्मक व्यवहार ऐसे कई संस्मरणों से जुड़ी हैं।

सन् १९९६ में मैं आपके पास पुरी में अपने शोधकार्य की प्रश्नावली पर चर्चा करने गया था। प्रश्नावली निर्माण से लेकर शोध प्रबन्ध के समर्पण तक आपका पूर्ण मार्गदर्शन एवं सहयोग

मिला। जबकि मेरे मार्गदर्शक स्व. प्रो. पेरी सुब्बारायन जी थे वे भी बहुत उदारवादी थे। उन्होंने मार्गदर्शक के रूप में भी आचार्य देवनाथन जी का नाम प्रस्तावित किया था लेकिन आपने कहीं पर अपना नाम रखने से इनकार कर दिया। इस प्रकार आपने कई शोध छात्रों की मदद निस्वार्थ रूप में किया। तत्पश्चात् १९९९ में मैं तिरुपति के केन्द्रीय विद्यालय में कार्यरत था उस दौरान भी आपका सहयोग मिलता रहा। तिरुपति विद्यापीठ के कार्यशालाओं एवं संगोष्ठियों में भाग लेने के लिए तथा अन्य शैक्षणिक क्रियाकलापों में आपका प्रोत्साहन मिलता रहा। इसके अलावा संस्थान के पुरी , जम्मू, अगरतला आदि में आपका मार्गदर्शन मिलता रहा। थोड़े समय के लिए जब संस्थान के मुख्यालय में था तब भी प्रशिक्षण आदि के सम्बन्ध में मार्गदर्शन मिलता रहा।

आप के गुणों के बारे में महाभारत के श्लोक में वर्णन है —

अष्टौ गुणा: पुरुषं दीपयन्ति प्रज्ञा च कौल्यं च दम: श्रुतं च।
पराक्रमरथाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च॥

अर्थात् वे आठ गुण बुद्धि , कुलीनता, आत्मसंयम, विद्या, पराक्रम मितभाषिता, यथाशक्ति दान, कृतज्ञता आप में विद्यमान थे , जिससे आपका व्यक्तित्व प्रकाशित रहा है। आप जैसे गुणवान् व्यक्ति का यश फैलता रहे यही कामना करते हुए भगवान् महाकाल से आपकी आत्मा की शान्ति के लिए प्रार्थना करता हूँ।

***

## चिरस्स्मरणीयाः वन्दनीयाश्च गुरवः

**डा. राधागोविन्दत्रिपाठी**

सहाचार्यः, शिक्षाशास्त्रविभागः

रा.सं. विद्यापीठम्, तिरुपतिः

**गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।**
**गुरुस्साक्षात् परंब्रह्म तस्मै श्री गुरवे नमः ॥**

संस्कृतशास्त्रसंरक्षणचिन्तकाः, नित्यशास्त्रसेवकाः , सदाचारनिपुणाः , गुणीगणवन्द्याः , सामाजिकज्ञानकुशलाः, छात्रवत्सश्च आचार्यरामानुजदेवनाथमहाभागाः समग्रसंस्कृतभारतभूखण्डे सर्वेषु संस्कृतजनेषु सुपरिचिताः समादरणीयाश्च भवन्ति । आचार्याणां परलोकगमनेन संस्कृतभारतभूखण्डाय महती अपूरणीया हानिर्जाता । जानवरी मासस्य सप्तमदिनाङ्के प्रातः पूजायामहम् आसम्, तदानीं डा. ज्ञानरञ्जनपण्डा-महोदयेन गृहमागत्य आचार्याणां निधनवार्ता श्राविता, तदानीम् अहं स्तब्धः जातः । झटिति मया उक्तम् अज्ञात्वा तथा न कथनीयम् इति। यदि वा आचार्याणामनारोग्यं मुम्बईनगरे जातमिति मया पञ्चमदिनाङ्के डा. मदनकुमारमहोदयात् वार्ता श्रुता, अनारोग्यं तथा गहनमासीत् इति नैव ज्ञातम् । तदनु आचार्याणां पुत्रस्य कृते दूरवाणीं कृत्वा ज्ञातं यत् गुरवः अस्मान् सर्वान् त्यक्त्वा परलोकं गताः इति । गुरुचरणानां निधनवार्तां श्रुत्वा मया अनिर्वचनीयं दुःखं प्राप्तम् । यावत् जीवामि गुरुणां सेवां करोमि इति मया कश्चन दृढः संकल्पः कृतः आसीत् । परन्तु स च सङ्कल्पः न पूरितः। सपदि एनां दुःखपूर्णवार्तां डा. पवनकुमाराय, डा. सनत्कुमाररथमहोदयाय च संसूच्य अहं चेन्नई नगरस्य मडिप्पाक्कं प्रान्ते आचार्याणां भगिन्याः गृहं धावितः । तत्र गत्वा मया दृष्टं यत् सर्वेषु शोकस्य छाया प्रसारिता आसीत्। रात्रौ एकादशवादने गुरुणां पार्थिवशरीरेण समं मुम्बईनगरात् प्रो. सुदेशशर्मा-महोदयाः, प्रो. वाई. एस्. रमेशमहोदयाश्च समागताः। ततः पूर्वं जम्मूनगरात् प्रो. प्रभातकुमारमहापात्रमहोदयाः, डा. मदनकुमारमहोदयः किञ्च अगरतलातः डा. पनवकुमारमहोदयः, कोलकातानगरात् डा. सनत्कुमाररथमहोदयाश्च समागताः आसन् । चेन्नई विमानपत्तनतः पार्थिवशरीरमानीय गुरुणां गृहे स्थापितम् । तत्र पार्थिवशरीरं दृष्ट्वा मनः पूर्णतया विगलितम् । तत्र दिनद्वयं स्थित्वा अन्त्येष्टिं विधाय पुनः वयं सर्वे प्रत्यागताः। परन्तु विचलिते मनसि किमपि कार्यं कर्तुमुत्साहः नासीत्। वैयक्तिकविकासाय सर्वदा मया अभिप्रेरणा

गुरुभ्यः प्राप्यते। इदानीं सा अभिप्रेरणा सूर्यस्यास्तमनेन समं सुप्ता। येषामाचार्याणां जन्म केवलं संस्कृतलोकस्य कृते आसीत्, तैः आचार्यैः सार्द्धं मम 1999 संवत्सरे सितम्बरमासे प्रथमसम्बन्धः अभवत्।

1998-99 शैक्षिकसत्रे यदा अहं शृङ्गगिरौ शिक्षाशास्त्री-कक्ष्यायाम् आसम्, तदानीं प्रो. सुकान्तकुमारसेनापतिमहोदयैः, प्रो. सूर्यमणिरथमहोदयैश्च सह मम परिचयः जातः। तत्र प्रशिक्षणं समाप्य तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठे शिक्षाचार्यकक्षायां प्रविष्टः। तदारभ्य आचार्यैः सह मम सम्बन्धः। परन्तु शिक्षाचार्यकक्ष्यायामध्ययनसमये आचार्याणामध्यापनशैलीं, संस्कृतसेवां, कार्यकरणशैलीं च दृष्ट्वा मम आकर्षणं दृढं जातम्। परन्तु विद्यावारिधिकक्ष्यायां प्रवेशसमये कस्य मार्गदर्शने अनुसन्धानं करणीयम् इति मम शङ्का आगता। शङ्कायाः परिहाराय मया गुरुकल्पैः आचार्यसुकान्तकुमारसेनापतिमहोदयैः सह सम्पर्कः कृतः। तदनु तैः आदिष्टः, यत् त्वया अनुसन्धानं आचार्यरामानुजदेवनाथमहाभागानां मार्गदर्शने करणीमिति। तदानीं यत् मार्गदर्शनं तैः गुरुकल्पैः आचार्यसुकान्तकुमारसेनापतिमहोदयैः कृतं, तेषां मार्गदर्शनस्य फलस्वरूपं संस्कृतशिक्षाजगति लब्धप्रतिष्ठितानां छात्रवत्सलानां गुरुचरणानां सान्निध्यं मया लब्धम्। गुरुभिः सह मम वैयक्तिकसम्बन्धः अनया लेखन्या प्रतिपादयितुं नैव शक्यते। तथैव गुरुणां परिवारेण सह मम द्रढीयान् सम्बन्धः लेखन्या प्रकाशयितुं नैव शक्यते। विद्यावारिधिकक्ष्यायां प्रवेशात् परं गुरुणामनुकम्पा मया लब्धा। ततः परं गुरुणां सविधे स्थित्वा अधमर्णोऽयं किञ्चित् ज्ञानं प्राप्तवान्। अस्माकं प्रातस्स्मरणीयाः सुगृहीतनामधेयाः परमपूज्याः गुरुचरणाः सर्वदा चिरस्स्मरणीयाः वन्दनीयाश्च।

तेषां पाठनशैली, व्यक्तित्वं, चिन्तनं, सेवाभावना, मार्गदर्शनं, विचारधारा, आदर्शश्च, सर्वान् प्रभावयन्ति। गुरुचरणानां पाठनशैली सुतरां सरला, बोधगम्या, अनुपमा च। प्रत्यहं तेषां प्रवचनं श्रोतुं छात्राः उत्कण्ठिताः भवन्ति स्म। तेषां सान्निध्यं सम्प्राप्य मया कञ्चित् कालं यावत् अध्ययनं कृतम्। मम जीवनस्यामूल्यः समयः तेषां चरणयोः आसीत् इत्यतः अधमस्यास्य जीवनं सफलं जातमित्यत्र प्रकाशयामि। तेषां निर्देशने यत्किमपि लब्धं तत्तु साम्प्रतमपि मम पथप्रदर्शनं करोति। गुरुचरणानां प्रत्येकं वाक्यं अतीवगहनजीवनमूल्याधारितं भवति। ते यथा वदन्ति तथैवाचरन्ति।

तेषामाचरणं सर्वदास्मभ्यं प्रेरणादायकं वर्तते। वस्तुतः तेषां यथा चिन्तनं, तथैव समाचरणमपि सर्वैः अस्माभिः अनुभूतम् अवलोकितञ्च।

शास्त्रमप्यनुमोदयति वचनमिदम्। यथा –

**शास्त्राण्यधीत्यापि भवन्ति मूर्खाः यस्तु क्रियावान् पुरुषः स विद्वान्।**

**सुचिन्तितं चौषधमातुराणां न नाममात्रेण करोत्यरोगम्॥** इति।

वयं जानीमः यत् शास्त्रमपि ज्ञानमाचरणयोः सर्वदा आचरणस्यैव प्राधान्यमिति सूचयति। अत एव "ज्ञानं भारः क्रियां विना " इदमप्युद्घोषितमस्ति। गुरुचरणाः ज्ञानक्रिययोर्मध्ये क्रियायाः सर्वाधिकं महत्वमिति स्वजीवने प्रदर्शयन्तः सन्देशं प्रयच्छन्ति स्म। गुरुचरणानां सम्पूर्णजीवनस्य पर्यालोचनं क्रियते चेत् इदं ज्ञायते यत् "निष्ठापूर्वकं कर्माचरणमिति" तेषां जीवनस्य परं धेयमासीत्।

सर्वकारीयोद्योगव्यवस्थायां कार्यं कुर्वन्तः निरन्तरं संस्कृतशास्त्राणां संरक्षणं कथं कर्तव्यम् ? संस्कृतप्रचाराय सर्वकारीयप्रयत्नः कथं भवेत् ? संस्कृतं पठितुमागतानां छात्राणां कल्याणं कथं भवेत् ? प्रशासनं छात्रेषु समानभावनां कथं प्रदर्शयेत् ? संस्कृतशास्त्रमध्ययनात्परं छात्राणां कृते उदरपोषणव्यवस्था कथं भवितुमर्हति ? च इत्यादिविषयेषु सततचिन्तनं कुर्वन्ति स्म। समयस्य मूल्यं तेषु गुरुषु सुतरां द्रष्टुं शक्यते। कार्यालयसमये अध्यापनं कर्यालयकार्यं च श्रद्धया कुर्वन्ति स्म। गृहे अपि गृहकार्यं त्यक्त्वा शास्त्रपरिरक्षणसम्बद्धकार्यं कार्यालयकार्यं च कुर्वन्ति स्म। प्रशासने तादृशाः विरलाः भवन्ति, ये निरन्तरं कर्मचारीणाम्, अध्यापकानां, छात्राणां च कल्याणं कुर्वन्ति स्म। क्वचित् काऽपि समस्या आगच्छति चेत्, समस्यायाः परिहारं सपदि एव कुर्वन्ति स्म। दूरवाण्या, ई-मेल् द्वारा शङ्का उपस्थाप्यते चेत् तत्क्षणात् शङ्कायाः परिहारं कुर्वन्ति स्म।

गुरुचरणाः यस्मिन् कस्मिन् सन्दर्भे यस्यां कस्यामपि भाषायां यदा भाषणं कुर्वन्ति तदा तेषां जिह्वायां सरस्वतीदेवी साक्षात् नृत्यति इति संस्कृतलोकः एव अत्र प्रमाणम्।

गुरुचरणाः स्वकर्तव्यपरिपालने सर्वथा सर्वदा दत्तावधानाः सन्तः स्वप्रतिष्ठाकारणादेव विविधाभिः संस्थाभिः सम्मानं प्राप्तवन्तः विद्यन्ते। कर्तव्यपरिपालनप्रसङ्गे तेषाम् एकं वचनं सर्वदा स्मर्यते यत् – "सर्वकारात् रूप्यकमेकं यदि स्वीक्रियते, तस्य समरूपं कार्यं करणीयं, यतः सर्वकारीयधनेन वयं जीवामः, परिवारं पोषयामश्चेति "। गुरुभिः सह स्थित्वा मया बहुविधशिक्षणं प्राप्तम्। तेषां जीवनं एकमादर्शमयजीवनम्। शिष्याणां विकासाय स्वयम् अर्जितावकाशं स्वीकृत्य

अनुसन्धाने मार्गनिर्देशनं कुर्वन्ति। अध्ययनाय तेषामभिप्रेरणा अद्यापि अधमेन स्मर्यते यत्, "अध्ययनं एव तव कार्यम् उदरपोषणं मदीयमिति", वचनमिदं यदा स्मरामि तदानीं बहुखेदमनुभवामि यत् तादृशशिष्यवत्सलानां हितकांक्षीणां परलोकगमनं कथं अकाले जातम् इति।
तादृशमहनीयचरितानां संस्मरणं नित्यमेव कल्याणाय।

ते गुरवः नित्यस्स्मरणीयाः वन्दनीयाश्च। तेषां चरणकमलयोः प्रणिपत्य आत्मनः सार्थकतां प्रकाशयामि। सकालेऽपि अहं प्रकाशयितुमिच्छामि यत् – "I am greatly indebted to my parents for living to my teacher for living well'' इति। तेषां गुरुणां आत्मनः शान्त्यर्थं भगवतः श्रीनिवासस्य पादपद्मयोः प्रार्थयामि। श्रीनिवासस्य अनुग्रहः गुरुणां परिवारस्योपरि सदा भवतु इति मदीयं निवेदनम्। भगवान् श्रीनिवासः परिवाराय परिपूर्णमारोग्यमायुष्यमैश्वर्यञ्च अनुगृह्णात्विति इति तमेव सर्वशक्तं भगवन्तं श्रीपद्मावतीसमेतश्रीनिवासं प्रार्थये।

***

# व्याकरणविभागः

ॐ श्रीमते रामानुजदेवनाथाय नमः

# वैयाकरणमतानुसारं पदशास्त्रीयशाब्दबोधसिद्धान्तसमीक्षणम्

**डा. कोडुकुलवेङ्कटसोमयाजुलुः आचार्यः**
व्याकरणविभागः रा. सं. सं. ( मा.वि.)
श्रीसदाशिवपरिसरः, पुरीः,
उडीशाः पिन – ७५२००१

वैयाकरणमतानुसारं पदशास्त्रीयशाब्दबोधसिद्धान्तसमीक्षणाख्यं प्रस्तुतशोधपत्रं साङ्गो - पाङ्गमहं यथाशक्ति यथामति निबध्नामि। तथाहि – पदसमूहो वाक्यमर्थसमाप्तौ [1] इति न्यायभाष्य - कारवचनप्रमाणानुसारं वाक्यस्थपदानां समुदायो वाक्यमिति तु निश्चप्रचम्। वाक्यार्थबोधं प्रति पदार्थबोधस्य कारणत्वादवयवपदार्थज्ञानमन्तरा सम्पूर्णवाक्यार्थविषयकशाब्दबोधस्यासम्भवा - त्तादृशवाक्यार्थविषयकशाब्दबोधजननाय पदार्थज्ञानमत्यन्तमावश्यकम्। तादृशपदार्थज्ञानसहचरित - सम्पूर्णमाहवाक्यार्थविषयशाब्दबुद्धित्वावच्छिन्नं प्रति वृत्तिज्ञानं कारणं भवति। अयमत्र पूर्वपक्षः- पदसमूहरूपवाक्यात्मकशब्दस्य प्रमाजनकत्वे [2] सर्वैः शब्देः सर्वेषां श्रोतॄणां सर्वशब्द - विषयकशाब्दबोधापत्तिरिति। अत्रेदं समाधानम् – आप्तोपदिष्टस्य शब्दस्य प्रमाजनकत्वे सर्वेषां श्रोतॄणां सर्वशब्दविषयकशाब्दबोधपत्तिवारतद्विषयकशाब्दबुद्धित्वावच्छिन्नं [3]प्रत्यन्वयव्यतिरेकाभ्यां[4] वृत्तिप्रयोज्ये स्थितेः कारणत्वमङ्गीकरणीयम्। दाहं प्रति वह्निरिव शाब्दबोधं प्र ति वृत्तिज्ञानं न स्वरूपेण हेतुः। तथा सति व्युत्पन्नानामव्युत्पन्नानां सर्वेषामप्यवच्छेदकावच्छेदेन शाब्दबोधप्रसङ्गदिति ज्ञाताया स्तस्याः वृत्तेः कारणत्वं स्वीक्रियते। एवञ्च तद्धर्मावच्छिन्न - विषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञकारणं भवति। अत्र वृत्तिपदेन शक्तिलक्षणाव्यञ्जना शक्त्याद्या गृह्यन्ते। एवं तर्हि अयं घट इत्यादौ घटत्वावविच्छिन्नघटकविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति घटपदं घटत्वविशिष्टघटे शक्तमित्या - कारकशक्तिज्ञानस्य कारणत्वसिद्धावपि गङ्गायां घोषः इत्यादौ गङ्गापद स्य शक्यार्थस्य प्रवाहस्य घोषेऽन्वयानुपपत्या तत्र शक्तिविषयकशाब्दबोधो न स्यात्। एवं **मञ्चाः हसन्ति** इत्यत्र

व्यञ्जनातिरिक्तलक्षणास्थले शक्तिव्यञ्जनाख्यवृत्तिद्वयज्ञानाभावेन तत्रापि शक्तिलक्षणा न्यतर-विषयकशाब्दबोधो न स्यात्। अतस्त द्वत्पूर्वोक्तदोषचयवारणरूपा तद्धर्मावच्छिन्नविषयकशक्ति -लक्षणाव्यञ्जनान्यतमविषयकवृत्तिरूपा। तत्रच्छक्तिलक्षणाव्यञ्जनान्यतमविषयकशाब्दबोधं प्रति कारणं भवतीत्याकारकत त्तदृत्तिविषयकशाब्दबोधः स्वीकार्यः। अयमत्र पुनः पूर्वपक्षः- तद्विषयक -शाब्दबुद्धित्वावच्छिन्नत्वं प्रति तद्विषयकशक्तिज्ञानं कारणमित्येतावानेव कार्यकारणभावः स्वीक्रियताम्। किमर्थं पूर्वोक्तकार्यकारणभावघटकविशेषणविशेष्याख्या नम्। अंशद्व ये तद्धर्माव -च्छिन्नेति विशेषणपर्यन्तानुधावनेन। अथवा पूर्वोक्तकार्यकारणाभावघटकविशेष्यांशे तद्धर्माव -च्छिन्नेति विशेषणमनिवेश्य तद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्विषयकशक्तिज्ञानं कारणमित्याकारककार्यकारणभावः कल्प्यताम्। किं वा तद्धर्मावच्छिन्नेत्यादिकार्यकारणभावे विशेषणदले तद्धर्मावच्छिन्नेति विशेषणमनिवेश्यतद्विषयकशाब्दबुद्धितावावच्छिन्नं प्रति तद्धर्माव -च्छिन्नविषयकशक्तिलक्षणाव्यञ्जनान्यतमवृत्तिज्ञानं कारणमित्याकारककार्यकारणभाव स्तावत् स्वीक्रियतामिति। अत्रेदं समाधानम्-तद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्माव -च्छिन्नशक्तिलक्षणाव्यञ्जनान्यतरविषयकवृत्तिज्ञानं कारणमित्याकारककार्यकारणभावघटक -विशेष्यांशे तद्धर्मावच्छिन्नेति दलानुपादाने अयं घट इत्यादौ घटत्वाच्छिन्नघटविषयक -शक्त्याख्यवृत्तिनिरूपितघटविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति पटविषयकशक्तिज्ञानस्य कारणत्वापत्त्या अयं घटः इत्याकारकवाक्यात् पटविषयकशाब्दबोधपत्तिः प्रसज्येत। अतस्तद्वारणाय तद्धर्मावच्छिन्नेत्यादिकार्यकारणभावघटकविशेष्यांशेपि तद्धर्मावच्छिन्नेति विशेषणमुपादेयम्। दत्ते च तादृग्विशेषणे अयं घट इत्यादौ घटत्वावच्छिन्नघटविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति घटत्वावच्छिन्नघटविषयकशक्त्याख्यवृत्तिविषयकशाक्तिज्ञानस्यैव कारणत्वसिद्ध्यापटत्वस्य घटत्वानतिरिक्ततया अयं घटः इत्यादौ घटत्वावच्छिन्नघटविषयकशाब्दबोधं प्रति पटत्वाव -च्छिन्नपटविषयकशक्तिज्ञानस्य कारणत्वासम्भवेनायं घट इत्याकारकवाक्यात्पटत्वावच्छिन्नपट -विषयकशाब्दबोधो वार्यते। एवं पूर्वोक्तकार्यकारणभावघटकविशेषणांशे तद्धावच्छिन्नेति विशेषणदानेन पटत्वावच्छिन्नपटविषयकशाब्दबोधं प्रति घटत्वावच्छिन्नघटविषयकशक्त्याख्य -वृत्तिज्ञानस्य कारणत्वासम्भवेन अयं पट इत्याकारकवाक्यात् पटत्वावच्छिन्नपचविषयक -शाब्दबोधस्थले घटत्वावच्छिन्नघटविषयकशाब्दबोधो वार्यते। निष्कर्षे तु **अयं घटः, अयं पटः**

इत्यादौ सकलदोषवारणाय तत्रद्धर्मावच्छिन्नतत्पदार्थविषयकतच्छाब्दबुद्धित्वावच्छिन्नं प्रति तत्रद्धर्मावच्छिन्नतत्रत्पदार्थनिष्टविषयतानिरूपितविषयत्वनिष्ठनिरूपकताकतत्रत्पदार्थविषयकशक्तिल क्षणाव्यञ्जनान्यतमवृत्तिज्ञानं कारणमित्याकारककार्यकारणभावस्वीकारेण पूर्वोक्तसकलदोषवारण - मवच्छेदकावच्छेदेन सम्पद्यते। एतादृशनिष्कृष्टकार्यकारणभावपरिष्कारस्वीकारादेव अयं गुडः इत्यादौ गुडत्वप्रकारकगुडविशष्यक शाब्दबोध एव जायते, न तु मधुरत्वप्रकारकगुडविशेष्यक - शाब्दबोधः इत्यैतत्सिद्धान्तसमर्थकं **नहि गुड इत्युक्ते मधुरतं प्रकारतया गम्यते** [5] इति समर्थसूत्रस्थं भाष्यं सङ्गच्छते। गुडादिशब्देन गुडत्वजात्यवच्छिन्नो गुडपदवाच्य इत्येवो बोधो जातिप्रकारको फलति। गुड इत्यत्र मधुरत्वं तु गुडो मधुरः ऐक्षवत्वात् इत्यन्प्रमानान्तरगम्यम्। तथा च वैयाकरणानां चरमसिद्धान्तानुसारं अयं घटः, अयं नीलघटः, अयं पटः अयं घट इत्यादौ शाब्दबोधप्रकारश्चेत्थं भवति। तथाहि – अयं घटः इत्यत्र जातिव्यक्त्योस्समवाय सम्बन्धस्यैव न्यायदर्शने निर्धारितवाद्यं घट इत्याकारकवाक्यात् समवायसम्बन्धावाच्छिन्नघटत्वेतरजात्यनवच्छिन्नघटत्वावच्छिन्नघटत्वपर्या - प्त्यधिकरणतावच्छेदकधर्मावच्छिन्नो घट इति शाब्दबोधो जायते। अयं नीलघटः इत्यत्र नीलत्वस्याभेदसम्बन्धेन घटत्वावच्छिन्ने घटेऽन्वयात् समवायसम्बन्धावच्छिन्नाभेदसम्बन्धाव - च्छिन्ननीलत्वेतरधर्मानवच्छिन्ननीलत्वावच्छिन्नघटत्वेतरजत्यनवच्छिन्नघटत्वपर्याप्त्यधिकरणता - वच्छेदकधर्मावच्छिन्ननीलत्वघटत्वाभेदत्वैततत्रितयधर्मावच्छिन्ननीलत्वघटत्वोभयधर्मावच्छिन्न - जातित्वप्रकारकनीलाभिन्नघटविशेष्यको घटः इथ्याकारकशाब्दबोधः फलति। अयं पटः इत्यत्रापि समवायसम्बन्धावच्छिन्नपटत्वेतरधर्मानवच्छिन्नघटत्वपटत्वाख्यव्यासज्यवृत्तिधर्मानवच्छिन्नपटत्व - पर्याप्त्याधिकरणातावच्छेदकधर्मावच्छिन्नपटत्वरूपजातित्वावच्छिन्नपटत्वावच्छिन्नः पटः इत्याकारकशाब्दबोधः फलति। भूतले न घट इत्यात्राधेयतासम्बन्धेनाधेयपदार्थस्य निरूपितत्व - सम्बन्धेनाधिकरणताश्रये भूतले तादृशाधिकरणस्य भूतलस्य नञर्थेऽभावे स्वरूपसम्बन्धेन, तथा घटत्वभूतलयोस्तत्रदधिकरणयोः समवायसम्बन्धेनान्वयात् **भूतले न घटः** इत्याकारकवाक्यात् संयोगसम्बन्धावच्छिन्नाधेयतासम्बन्धावच्छिन्नघटत्वावच्छिन्नघटनिष्ठाधेयतानिरूपितभूतलनिष्ठा- धिकरणातानिरुपकस्वरूपसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताव- च्छेदकावच्छिन्नप्रतियोगितानिरूपकोऽभाव इति शाब्दबोधः फलति। एवं यजेत स्वर्गकाम इत्यादौ यजधात्वर्थयागस्यानुकूलत्वसम्बन्धेन धात्वर्थव्यापारेन्वयादेकत्वविशिष्टचैत्रकर्तृकयागकरणकस्वर्ग -

साधनानुकूलव्यापार इति शाब्दबोधो जायते। स्पष्टं चैतत् [6] वैयाकरणसिद्धान्तलघुमञ्जूषायां [7] परमलघुम्ञ्जूषायाञ्च॥

**प्राचीननैयायिकमतरीत्या धात्वाख्यातार्थविषयकशाब्दबोधवर्णनम्, वैयैकरणमतानुसारं तन्निराकरणञ्च**

**चैत्रस्तण्डुलं पचति , चैत्रेण पच्यते तण्डुलः** इत्यादिप्रयोगेषु वर्तमानादिकालः, एकत्वादिसङ्ख्या, कर्तृकर्मरूपोधर्मी, विक्लित्यादिफलम्, तदनुकूलफूत्कारादिशारीख्यापारः, तदनुकूलो यत्न इति पदार्थजातं सर्वमपि भासत इत्यत्र न कस्यापि विप्रतिपत्तिः। परन्तु तत्र कस्यार्थस्य को वाचक इत्यत्रेव सर्वेदार्शनिकाः विवदन्ते॥

अत्र प्राचीननैयायिकाः चैत्रस्तण्डुलं पचति इत्यादौ व्यापारमात्रं धात्वर्थः। फलन्नैव धात्वर्थः,किन्तु तत्फलं कर्मप्रत्ययार्थः, आख्यातार्थस्तु कालस्सङ्ख्या च। तथा च चैत्रस्तण्डुलं पचतीत्यादौ पाकानुकूलव्यापारानुकूलकृत्याश्रयाभिन्नश्चैत्तः इति शाब्दबोधो भवति। पच्यते तण्डुलश्चैत्रेण इत्यादौ तण्डुलाभिन्नकर्मकपाकानुकूलधात्वर्थविक्लित्तिजनरव्यापाराश्रयाभिन्नश्चैतः इति शाब्दबोधः फलति। अतः चैत्रस्तण्डलं पचति, पच्यते तण्डुलः चैत्रेण इत्यादो फलं न धात्वर्तो न वा आख्यातार्थः। किन्तु तत्र कर्तृप्रत्ययसमभिव्याहारे व्यापारस्सर्वोऽप्याख्यातार्थ एव न धात्वर्थः। एवं कर्मप्रत्याहारसमभिव्याहारस्थलेऽपि व्यापारमात्रं धात्वर्थ एव, न तु फलं धात्वर्थः इति विवदन्ते॥

**प्राचीननैयायिकमतनिराकरणपूर्वकं वैयाकरणमतरीत्या धात्वाख्यातार्थविषयकशाब्दबोधसमीक्षणम्**

वस्तुतस्तु चैत्रस्तण्डुलं पचति इत्यादौ व्यापारमात्रस्य धात्वर्थत्वे तथा तत्र फलस्य धात्ववाच्यत्वे पचतीत्यादौ सर्वोऽपि व्यापारो धात्वर्थ एव स्यात्। तथा सति नैयायिकानां स्वार्थफलव्यधिकरणव्यापारवाचित्वरूपसकर्मकत्वोच्छेदापत्तिः। अथ च प्राचीननैयायिकमतानुसारं व्यापारमात्रस्य धात्वर्थत्वे फलांशस्य धात्ववाच्यते **पच्यते ओदनः** स्वयमेव इति वत् ज्ञायते घटः स्वयमेव इति प्रयोगापत्तिः। एवं चैत्रस्तण्डुलं पचति इत्यादौ धातूनां व्यापारमात्रवाचकत्वे फलावाचकत्वे च त्यजिगम्योः पर्यायित्वापत्या **चैत्रो ग्रामं त्यज्यतीत्यर्थेचैत्रो ग्रामं गच्छति** इति प्रयोगापत्तिः। एवमेव चैत्रो ग्रामं गच्छति इत्यत्र चैत्रो ग्रामं त्यज्यति इति प्रयोगापत्तिः। अतोऽत्र

प्राचीननैयायिकमतस्य प्रदर्शितरीत्यावच्छेदकावच्छेदेन दोषग्रस्तत्वात् पूर्वोक्तप्राचीननैयायिक - मतमयुक्तम्। प्रपञ्चितञ्चैतत्[8] तत्त्वदर्शिन्याम्॥

## नव्यनैयायिकमतानुसारं धात्वाख्यातार्थविषयकशाब्दबोधनिरूपणम्

नव्यनैयायिकास्तु **चैत्रस्तण्डुलं पचति** इत्यादौ कर्तरिलकारस्थले फलानुकूलो व्यापारोधात्वर्थः तदनुकूलाकृतिराख्यातार्थः तस्याश्चान्याविशेषणीभूतप्रथमान्तार्थेऽन्वयः। स च **चैत्रस्तण्डुलं पचति** इत्यादौ कर्तरिलकारे चैत्रादिः। पच्य ते तण्डुलं चै त्रेण इत्यादौ कर्मणि लकारे तण्डुलादिश्च। तथा च कर्तरिलकारे चैत्रस्तण्डुलं पचति इत्यत्र विक्लित्त्यनुकूलव्यापारानु - कूलकृत्याश्रयाभिन्नश्चेत् इति शाब्दबोधो जायते। कर्मणि लकारे पच्यते तण्डुलश्चैत्रेणं इत्यादौ तावत् कृतिस्तृतीयार्थः। तस्यां कृतौ प्रकृत्यर्थस्य समवेतत्वसम्बन्धेनान्वयः। तादृशकृतिनिष्ठजन्यताया जन्यत्वसम्बन्देन धात्वर्थव्यापारेऽन्वयः। तस्य च धात्वर्थव्यापारस्य जन्यत्वस्मबन्धेनैव फलेऽन्वयः। तस्य च फलस्य निरूपितत्वसम्बन्धेनाख्यातार्थाश्रयत्वेऽन्वयः। आख्यातार्थाश्रयत्वस्याभेदसम्बन्धेन प्रथमान्तार्थेऽन्वयः। तथा च **चैत्रस्तण्डुलं पचति** इत्यादौ कर्तरि लकारस्थले नैयायिकमतानुसारं चैत्रसमवेतकृतिजन्यविक्लित्त्यनुकूलव्यापारजन्यविक्लित्तिरूपफलनिरूपिताश्रयत्ववाँस्तण्डुलः इति शाब्दबोधः फलति। भावे लकारे तु तिङ्प्रत्ययस्साधुत्वार्थकः। तथा च **चैत्रेण सुप्यते** इत्यादावेकत्वविशिष्टचैत्रकर्तृकस्स्वापः इति शाब्दबोधो भवति। एवञ्च **चैत्रस्तण्डुलं पचति** इत्यादौ कर्तरि लकारस्थले कृतिरेव वाच्यो न व्यापारः। फूत्कारादिव्यापाराणां तत्तद्रूपेणैव वाच्ये नैकेषां फूत्कारत्वादिशक्यतावच्छेदकानां कल्पने गौरवाल्लाधवात् कृतित्वमेव शक्यतावच्छेदकं भवति। पचतीत्यादौकर्तुराख्यातवाच्यत्वे कर्ता शक्यस्तस्मिन् विद्यमाना कृतिश्शक्यतावच्छेदिका। तस्यां विद्यमानं कृतित्वं शक्यताविच्छेदकं भवति। अस्मन्मतरीत्या कृतेरेव वाच्यत्वे कृतिश्शक्यार्थः। तस्यां कृतौ विद्यमानं कृतित्वं शक्यतावच्छेदकम्। तथा च वैयाकरणानाम्मते यच्छक्यतावच्छेदकंकृतित्वं तदस्मन्नैयायिकमते शक्यतानच्छेदकमेव भवतीत्यवच्छेदकलाघवमपि वर्तते इति कृत्वा चैत्रस्तण्डुलं पचति इत्यादौ कृतिरेव वाच्या, न तु व्यापारः। अतो व्यापारो धात्वर्थ इति वैयाकरणमतमनुचितम्। रथो गच्छति इत्यादौ कृतित्वस्य चेतनरूपत्वेऽपि लक्षणया तत्र व्यापारत्वप्रकारकबोधे न दोष इति वदन्ति। अयमत्र नव्यनैयायिकमतनिष्कर्षः – चैत्रस्तण्डुलं पचति इत्यादौ फलम्, तदनुकूलफूत्कारादिशरी रव्यापाराश्च धात्वर्थः। लकाराणां कृतावेव शक्तिलाघवात् न

तु कर्तरि। कृतिमतः कर्तृत्वेन तत्र कर्तरि शक्तौ गौरवात्। प्रथमान्तपदेनैव तल्लाभाच्च। आख्यातार्थे धात्वर्थो विशेषणम्, प्रकृत्यर्थप्रत्ययार्थयोस्सहार्थत्वे प्रत्ययार्थस्यैव प्राधान्यात् प्रथमान्तार्थे आख्यातार्थो विशेषणम्। अनुकूलत्वमाश्रयत्वञ्चसंसर्गः। तथा च चैत्रस्तण्डुलं पचतीत्यादौ विक्लित्त्यनुकूलफूत्कारादिव्यापारानुकूलकृत्याश्रयाभिन्नश्चैत्र इति शाब्दबोधः फलति। रतो गच्छतीत्यादौ रथस्याचेतनत्वाद्यत्नशून्यत्वेन व्यापारे आश्रये वा लक्षणा स्वीकारे न दोषः इति॥

**वैयाकरणभूषणसार-परमलघुमञ्जूषाग्रन्थद्वयदिशा नव्यनैयायिकमतनिराकरणम्** –

वस्तुतस्तु पूर्वोक्तनव्यैयायिकमतमयुक्तम्। यतो हि व्यापारो भावनोत्पादना क्रियेतेयादीनि पदानि, एवं पचति पाकानुकूलो व्यापारः, पाकानुकूला भावना, तादृश्युत्पादना, तादृशी क्रिया एवं गच्छतीत्यस्य गमनानुकूलो व्यापारो गमनानुकूला भावना, तादृश्युत्पादना, तादृशी क्रियेत्यादि - विवरणस्फोरकाणि। तत्र विवरणे व्यापारस्य, भावनादेश्च भानाद्विवरणविव्रियमाणयोस्समाना - र्थकत्वनियमाद्विव्रियमाणेऽपि व्यापारस्य भानमावश्यकम्। अन्यथा विवरणस्य वृद्धोक्तं शक्तिग्राहकत्वं भज्येत। एवञ्च निरुक्तविवरणबलाद्व्यापारस्य, कृत्यादेश्चावश्यं पचतीत्यादौ व्यापारत्वलाभात् कृतिरेव वाच्या, न व्यापार इति नैयायिकोक्तं नादरणीयमेव। कृतेर्वाच्यत्वे वैयाकरणानां विप्रतिपत्तिर्नास्ति। किन्तु तन्मात्रवाचित्वे एव विप्रतिपत्तिः। रथो गच्छति इत्यादावचेतने रथेऽपि शक्यार्थस्य गमनानुकूलव्यापारस्य निसर्गतो वाच्यत्वेन शक्यार्थव्यापारमपहाय लाक्षणिकव्यापारार्थकत्वप्रतिपादनद्वारा लक्षणया व्यापारत्वप्रकारकशाब्दबोधवर्णनं नैयायिकानां सुतरामनुचितम्। तत्रापि शक्यतावच्छेदकलक्ष्यतावच्छेदकयोर्गौ रवस्य समत्वात्। शक्यतावच्छेदक - लक्ष्यतावच्छेदकयोर्वैषम्ये बीजाभावात्। न च पचतीत्यस्य पाकं करोतीति यत्नार्थककरोतिना - ख्यातार्थविवरणात् यत्न एव धात्वर्थो, न व्यापार इति वाच्यम्। रथो गच्छतीत्यादावचेतने रथादौ यत्नस्य बाधितत्वेन कृञो न यत्नमात्रार्थकत्वम्। रथो गमनं करोतीति विवरणदर्शनादपि तत्र व्यापारस्य धातुवाच्यत्वमनुचितम्। अपि च नैयायिकवासनया चैत्रस्तमण्डुलं पचतीत्यादौ कृतेर्धात्वर्थत्वानङ्गीकारे, तथा प्रथमान्तमुख्यविशेष्यकशाब्दबोध स्वीकारे नैयायिकानां **पश्य मृगो धावति** इत्यत्र भाष्यसिद्धपदैकवाक्याता न सिद्ध्येत्। तथा हि कर्तरि लकारस्थले कृतेरेव वाच्यत्वमङ्गीकृत्य प्रथमान्तार्थविशेष्यकशाब्दबोधस्वीकारे **पश्यमृगो धावति** इत्यत्र धावनक्रियायाः आश्रयत्वसम्बन्धेन मृगेऽन्वयः। दर्शनानुकूलक्रियायाः आश्रयत्वसम्बन्धेन

युष्मदर्थेऽन्वयः तथा च धावनक्रियाश्रयाभिन्नो मृगः, दर्शनानुकूलक्रियाश्रयाभिन्नस्त्वमिति बोधस्स्वीकार्यः। तथा च धावनदर्शनक्रिययोः परस्परान्वयालाभेन धावनानुकूल -क्रियाजन्यदर्शना-नुकूलयुष्मत्कर्तृकोव्यापारः इति भाष्यसम्मतपदैकवाक्यता न सिद्ध्येत्। प्रकृत्यर्थमुख्यविशेष्यक -बोधवादिमते तु मृगस्य कर्तृत्वसम्बन्धेन दर्शनक्रियायामन्वयः। तस्य कर्मत्वसम्बन्धेन दर्शनक्रियायामन्वयः। दर्शनक्रियायाः कर्तृत्वसम्बन्धेन युष्मदर्थेऽन्वयः। तथा च पश्यमृगो धावति इत्येत्रैकत्वविशिष्टमृगभिन्नाश्रयिका या वर्तमाना धावनक्रिया तत्कर्मकं यदिष्टसाधनीभूतं दर्शनं तदनुकूला त्वत्कर्तृका क्रियेति रीत्या वैयाकरणमते पश्य मृगो धावतीत्यत्र भाष्यसिद्धपदैकवाक्यता सिद्ध्यति। किञ्च प्रथमान्तार्थमुख्यविशेष्यकबोधवादिनैयायिकमते **पश्य मृगो धावति** इत्यत्र विशेषस्य मृगादेः कारकत्वेन गुणभूतायामपि दर्शनक्रियायामन्वयस्यवाच्यतया दृशिफलाश्रयत्वेन तस्य कर्मत्वात् ततः प्रथमाबाधनेन द्वितीयापत्तिदोषः आपद्येत। नन्वेवं मृगपदस्य द्वितीयान्तत्वे धावुधातोर्विहितस्य लटः स्थाने प्रसक्तं तिडं, बाधित्वा लटः शतृशानचावप्रथमासमानाधिकरणे इति सूत्रेण शतृप्रसङ्ग इति चेदेवं शतुरापत्रावपि मृगपदोत्तरं द्वितीयापत्तौ **पश्य मृगो धावति** इति वाक्यस्यैवासम्भवापत्तेः। ननु पश्य ! मृगो धावतीत्यत्र यत्रच्छब्दयोरध्याहारेण यो धावति मृगस्तं पश्येत्यर्थाश्रयणान्न द्वितीयापत्तिरिति चेन्न। एवन्तर्हि **मृगो धावति तं पश्यं** इति वाक्यद्वयापत्रेः। यदभिप्रायेणायं प्रयोगस्तदपि न सिद्ध्यति। अन्यथा धावन्तं मृगं पश्य इत्येव प्रयोक्ता प्रयुञ्जात्। पश्य मृगो धावति इत्यत्र तमिति पदाध्याहारमाध्यमेन वाक्यभेदेनान्वयोऽपि **न हि शाब्दमशाब्देनान्वेति** इति न्यायविरोधान्न सिद्धति। अथ च पचतीत्यत्र लाघवाल्लकाराणां कृतावेव शक्तिस्वीकारे युष्मदस्मदोर्लकारेण सामानाधिकरण्याभावात् पुरुषव्यवस्था न सिद्ध्येत्। एवं **पचन्तं चैत्रं पश्य, पचते देवदत्ताय देहि** इत्यादौ शतृशानजादीनामपि तिबादिवल्लादेशाविशेषण तेभ्यः कृतिमात्रबोधापत्तेश्च। न चेष्टापत्तिः। आश्रयाश्रयिभावेन कर्मणि, सम्प्रदाने च कृतिरन्वयादिति वाच्यम्। तथा सति समानाधिकरणनामार्थयोरभेदान्वयस्साक्षादव्युत्पन्नः इति व्युत्पत्तिभङ्गापत्तेः। ननु नामार्थयोरभेदान्वयानुरोधाच्छतृशानजादीनां कर्तरिशक्तिरिति चेन्न। पचतिकल्पमं देवदत्तः, पचतिरूपं देवदत्तः इत्याद्यनुरोधेन तिङ्श्चापि कतुरिव वाच्यत्वैचित्यात्। किञ्च पचतीत्यादौ नैयायिकैः कृत्रिमात्रस्यैव वाच्यत्वाङ्गीकारे रथो गच्छतीत्यादौ आश्रये लक्षणायाः स्वीकारे गौरवापत्तिः तथा अभिहितत्वानभिहितत्वव्यवस्थोच्छेदापत्तिश्च। किञ्च पचतीत्यादौ व्यापारसामान्यस्य

धातुवाच्यत्वात् कारके इति सूत्रस्थात् **स्थालीस्थे यत्ने पचिनाकश्यमाने स्थाली स्वतन्त्रां** इति भाष्यप्रयोगप्रामाण्यानुरोधाञ्च सर्वस्यापि व्यापारस्य कर्तरि, कर्मणि लकारे वा धात्वर्थमेवोचितं परमप्रामाणिकञ्चेति वैयाकरणमूर्धन्यानां भट्टोजीदीक्षितकौण्डभट्टहरदीक्षितनागेशादीनां निगूढाशयः। स्पष्टञ्चेदं[9] तत्त्वदर्शिन्याम्, परमलघुमञ्जूषा[10]ग्रन्थे चेत्यलम्पल्लवितेन॥

**प्राभाकरमीमांसकमतानुसारं कृतिरूपभावनायाः व्यापाररूपभावनाया वा व्च्यत्वमेव नास्ति, फलमात्रस्यैव धात्वर्थत्वमिति प्राचीनप्राभाकरमीमांसकमतनिराकरणम्**

जामिनीयाः मीमांसकाः द्विविधाः। तेषाम्मध्ये गुरुमतसम्प्रदायवादिनः केचन। कुमारिलभट्टसम्प्रदायप्रवर्तकाः भाट्टसम्प्रदाय प्रचारकभाट्टमीमांसकाश्चापरे। प्रभाकरमतानुयायि प्रचारितं प्रसारितञ्च प्राभाकरमतमथवा गुरुमतमिति वा जैमिनीय दर्शने व्यपदिश्यते। एवं स्थिते चैत्रस्तण्डुलं पचतीत्यादौ कर्तरिलकारस्थले अथवा पच्यते तण्डुलश्चैत्रेण इत्यादौ कर्मणिलकारस्थले वा फलमेव धात्वर्थः, कृतिरूपा व्यापाररूपा वा यत्किञ्चिद्रूपा वा भावना प्रकृतिभागस्य प्रत्ययभागस्य वा वाच्यैव न बवतीति प्राभाकरमीमांसकाः प्रौढ्या विवदन्ते। तेषाम्मते कार्याभिधायिलिङ्गादीनामेव कार्यविशे,णीभूता कृतिरूपा भावनावाच्या। प्रकृत्य र्थफलेनाक्षेपेण संस्गमर्याद्यावातत्प्रतीतिसम्भवात्। एवञ्च प्राभाकरमीमांसकमतानुसारं फलमेव धात्वर्थः कृतिरूपा फूत्कारादिशारीख्यापाररुपा यत्किञ्चितद्रूपापि भावना पचतीत्यादौ प्रकृतिभागस्य धातोः प्रत्ययभागस्यवा वाच्यैव न भवति। आख्यातार्थस्तुकालस्सङ्ख्या च भवतः। इदमेव प्राभाकरमतम्। तन्न युक्तम्। पचतीत्यादौ लडाद्यन्तस्थले प्रकृतिभागे प्रत्ययभागे वा यत्किञ्चिद्रूपभावनायाः अवाच्यत्वे क्रियाजन्यफलाश्रयत्वरुपकर्मत्वं दुर्वतम्। तथा च कर्मणा सहितत्वरूपसकर्मकत्वानापत्तिः। ननु धात्वर्थफलाश्रयत्वं कर्मत्वमित्येव तल्लक्षणमिति कर्मलक्षणपरिष्कारेण न दोष इति चेन्न। तथा सति **घटं भावयति** इति सकर्मकधातुस्थल इव घटो भवतीत्यत्रापि उत्पत्तिरूपफलस्य सत्त्वेन द्वितीयापत्तिः। न च **घटो भवति** इत्यत्राकडाराधिकारनियमानसारं परया कर्तृसंज्ञया कर्मसंज्ञायाः बाधान्न द्वितीयेति वाच्यम्। स्वतन्त्रः कर्ता इत्यनुशास्ने प्रकृतधात्वर्थप्रधानीभूतव्यापाराश्रयस्यैव कर्तृत्वविधानात् घटो भवति इत्यत्र घटस्यातथात्वान्न कर्तृत्वम्। कृत्याश्रयत्वं कारकचक्रप्रयोक्तृत्वञ्च कर्तृत्वेन नाश्रयणीयम्। तयोः प्राणीधर्मतयाऽप्राणिनि घटे तद्भावात्। ननु धात्वर्थानुकूलव्यापाराश्रयत्वं कर्तृत्वमिति कर्तृत्वलक्षणं

परिष्क्रियताम्। धातोरर्थफलम्। तदनुकूलस्यावाच्यस्यापि व्यापारस्य वस्तुतो यःआश्रयस्तस्य कर्तृत्वं स्वीक्रिते। तच्चाचेतने घटादौ सम्भवतीति घटो भवतीत्यत्र न दोष इति चेन्न। तथा सति सर्वकारकनिष्ठव्यापाराणां धात्वर्थफलानुकूलतया तदश्रयत्वात् सर्वे समपि कारकाणामेकस्मिन्नेव प्रयोगे पर्तृत्वापत्तेः। वैयाकरणानाम्मते तु यन्निष्ठो व्यापारो धातुना अभिधीयते तदेव कारकं कर्तृसंज्ञकम्। नहि सर्वकारकनिष्ठव्यापाराः युगपद्धात्वर्थतया विवक्ष्यन्ते। अपि च प्राभाकरमतवासनया व्यापारस्य अवाच्यत्वे धातूनां सकर्मकत्वाकर्मकत्वविभागस्योच्छेदापत्तिः। यतो हि प्राभाकरमते व्यापारस्य वाच्यत्वाभावेन तद्घटितसकर्मकलक्षणानाक्रान्ततया पचादिधातूनां सकर्मकत्वानापत्रेः। ननु सकर्मकधातून् सर्वानप्यवच्छेदकाव -च्छेदेनैकस्मिन् गणे निवेश्यैतदन्यतम्तवं सकर्मकत्वमिति सकर्मकत्वलक्षण स्वीकारेण न पूर्वोक्त दोषावकाश इति चेन्न। वहधातोः **नदी वहति** इत्येर्थेऽकर्मकत्वस्य **भारं वहति** इत्येर्थे सकर्मकत्वस्य च दर्शनात्। धातोः फलमात्रार्थकत्वे कृञ्धातोर्यत्नार्थकत्वेन स्वार्थफलव्यधिकरणव्यापारवाचित्वरूपं सकर्मकत्वं यथा यततेर्न भवति तथा यत्नार्थकतायां करोतेरपि न स्यात्। तथा च सर्वेषां धातूनामकर्मकत्वापत्तिः प्राभाकरमते दुर्वारा। अतः प्राभाकरमतवासनया पचतीत्यादौ शाब्दबोधवर्णनमनुचितम्।।

**फलमेवधात्वर्थस्सर्वोऽपि व्यापार आख्यातार्थ एव न धात्वार्थ इति प्राचीनमीमांसकमतानुसारं शाब्दबोधवर्णनम् प्राचीनमीमांसकमतनिराकरणञ्च**

कर्तृप्रत्ययसमभिव्यवहारे चैत्रस्तमण्डलं पचति इत्यादौ तथा कर्मप्रत्ययसमभिव्यवहारे चैत्रेण पच्यते तण्डलः इत्यादौ तथा भावप्रत्ययसमभिव्यवहारे चैत्रेण सुप्यते इत्यादौ च सर्वत्र फलमेव धात्वर्थः तदनुकूलः फुत्कारादिशारीख्यापारस्तदनुकूलो यत्नश्च सर्वोऽपि व्यापारत्वेनाख्यातार्थः। अत एव फलापेक्षया व्यापारस्य प्राधान्यं सिद्ध्यति। अन्यथा तस्य प्राधान्यं न स्यात्। तथा चेत् वैयाकरणानां प्रकृतिप्रत्ययौ सहैवार्थं ब्रुतस्तयोः प्रत्ययार्थः प्रधानमिति न्यायविरोधापत्तेः। किञ्च पचतीत्यादावाख्यातश्रवणे भावनायाः प्रतीत्या **पाकः** इत्यादावाख्यातस्याश्रवणे भावनायाः अप्रतीत्या च तस्याः आख्यातवाच्यत्वलाभेन तस्याः धातुवाच्यत्वस्वीकारे अन्वयव्यतिरेकाभ्यां शब्दादर्थावगतिरिति न्यायमूलकस्य तदागमे हि तद्दृश्यते इति न्यायविरोधापत्तेः। स्वयुक्ताख्यातार्थ -व्यापारव्यधिकरणफलवाचित्वं सकर्मकत्वं स्वयुक्ताख्यातार्थव्यापाराश्रयत्वञ्च कर्तृत्वमिति कार्यकारणभाव-स्वीकारेणास्माकं मीमांसकानामपि धातूनां सकर्मकत्वाकर्मत्वविभागोच्छेदापत्तिर्ण

भवति। अतो व्यापारः सर्वोऽपि धात्वर्थ एवेति वैयाकरणमतं सुतरामनुचितम्। अस्माकं प्राचीन मीमांसकानां मतानुसारं चैत्रस्तण्डुलं पचति इत्यादौ कर्तरिलकारस्थले एकत्रविशिष्टचैत्रकर्तृकपाककरणिका भावनेति शाब्दबोधो जायते। कर्मप्रत्ययसमभिव्याहारे पच्यते तण्डुलश्चैत्रेण इत्यादौ चैत्रकर्तृका तण्डुलकर्मिका पाककरणिका भावनेति शाब्दबोधः फलति। भावलकारस्थले चैत्रेण सुप्यते इत्यादावेकत्वविशिष्ट चैत्रकर्तृकस्वापानुकूला भावनेति शाब्दबोधः पर्यवसति। एवं यजेत स्वर्गकाम इत्यादौ यजधात्वर्थस्य यागस्य स्वविषयकज्ञानविशेषजन्यानुमितिप्रयोज्यत्वसम्बन्धेनाख्यातार्थभावनायामन्वयादेकत्वविशिष्ट-चैत्रकर्तृकयागकरणिका भावनेति शाब्दबोधो भवति। न कलञ्जं भक्षयेत् इत्यादौ तु कलञ्जभक्ष ण-मदनिष्टसाधनायमस्मात् कलञ्जभक्षणानुकूलव्यापाराभावानुकूलव्यापारजन्यनिवृत्तिकरणिका भावनेति शाब्दबोधो जायते। अपि च भालप्रधानमाख्यातमिति निरुक्तवाक्यस्थाख्यातशब्दस्य क्रियावचकतिङ्येवशक्तेस्सत्त्वात् तथा पचतीत्यत्राख्यातार्थव्यापारवाचकतिप्रत्ययेन करोतीति विवरणाञ्च फलमेव धात्वर्थः व्यापाररूपः कृतिरूपश्च सर्वोऽपिव्यापारस्तावदाख्यातार्थ एवेति प्राचीनमीमांसकाः प्रौढ्या विवदन्ते। तन्न युक्तम्। ज्ञातोर्व्यापारावाचकत्वे पचतीत्यादौ विक्लित्यादि फलमेव पाकपदार्थस्स्यात्। तथाचेत् चैत्रः पचतीत्यत्र फलमात्रस्यैव धात्वर्थत्वात् पाकारम्भदशायां फलस्य भविष्यत्वात् पाको भविष्यतीति प्रयोगापत्तिः। तथा पाकारम्भदशायां फूत्कारादिव्यापाराणां विद्यमानत्वेन पाको भवतीति प्रयोगापत्तिश्च। किञ्च किञ्च चैत्रस्तण्डुलं पचतीत्यत्र फलमात्रस्यैव धात्वर्थत्वे धातोः व्यापारावाचकत्वे पाकानुकूलव्यापारो मष्टः। फलमुत्पन्नम्। तदा फलस्य वर्तमानत्वात् पाको विद्यते इति प्रयोगापत्तिः। **पाकोऽभूत्** इति प्रयोगानापत्तिश्च। एवं फलमात्रस्य धात्वर्थत्वे चैत्रो ग्रामं गच्छतीत्यत्र गमेस्संयोगमात्रमर्थः। तदा गमनस्यापि संयोगरूपत्वेन ग्रामस्संयोगवानितिवदबाधितार्थबोधकत्वेन ग्रामो गमनवानिति प्रयोगापत्तिः। किञ्च गमेस्संयोगमात्रार्थकत्वे ततो भावल्युडन्तस्यापि संयोगमात्रार्थकत्वेन गमनसंयोगयोरुभयोरपिपर्यायवाचित्वेन संयोगस्य गमनजन्यत्वाभावात्गमनजन्यसंयोगाश्रयो ग्राम इति प्रयोगानापत्तेः। अपि च चैत्रस्य पाकः इति भावघञन्तस्थले भावार्थकघञादीनामपि व्यापारवाचकत्वस्वीकारे **कर्तरिकृत्** इति सूत्रेणैव चैत्रस्य पाकः इत्यादौ भावार्थवाचकपचादिधातोरपि व्यापारार्थकघमादिविधानसम्भवात् भावार्थकप्रत्ययविदायकानां भावे

इत्यादिसूत्राणां वैयर्थ्यापत्तिः। अतो भावार्थकघञादिप्रत्ययानां व्यापारार्थकत्वकल्पनमयुक्तम्। ननु पचतीत्यत्राख्यातस्य तिङकरोतीति विवरणदर्शनात् करोतेश्च यत्नार्थकत्वेन फलमेव धात्वर्थस्सर्वोऽपि यापार आख्यातार्थ एवेति चेन्न। पूर्वोक्तबहुदोषग्रस्तत्वात् करोतीति धात्वर्थविवरणमेव भवतीति कृत्वा पचादिधातूनां व्यापारवाचिच्वमेवोचितम्। अन्यथा पक्वान् इत्यादौ धात्वर्थस्यक्तवतुप्रत्ययार्थेऽन्वय एव न स्यात्। किञ्च भावनायास्तिङर्थत्वे फलमात्रस्य धात्वर्थत्वेन घटं भावयति इत्येत्रेवोत्पत्तिरूपफलाश्रयत्वेन घटो भवति इत्यत्रापि घटशब्दात् कर्मणि द्वितीया इति सूत्रेण द्वितीयापत्तिः। किञ्च प्राचीनमीमांसकमतानुसारं सर्वस्यापि व्यापारस्याख्यातवाच्यत्वस्वीकारे प्राचीनमीमांसकानां लः कर्मणि च भावे चाकर्मकेभ्यः इत्यादिसूत्रविरोधापत्तेः। न हि तेन व्यापारस्य प्रत्ययार्थता लभ्यते। किञ्च पचतीत्यादौ फूत्कारादेः प्रत्ययार्थत्वे चैत्रो गच्छतीत्यत्र पचतीति बोधवारणाय तद्बोधे गमिधातुसमभिव्याहारः कारणमित्याद्यन्तकार्यकारणभावकल्पने मीमांसकानामतीव गौरवम्। किञ्च फलमात्रस्य धात्वर्थत्वे मीमांसकमते धातूनां सकर्मकत्वकर्मकत्वविभागस्योच्छेदापत्रेः। एवं धातोर्व्यापारर्थकत्वप्रतिपादकस्य **सत्त्वप्रधानानि नामानि** इति यास्कवचनविरोधापत्रेः। किञ्च चैत्रः पचति इत्यादौ सर्वस्यापि व्यापारस्य प्रत्ययार्थत्वे गुरुः शिष्याभ्यां पाचयति इत्यादौ हेतुमति च इति सूत्रबलात् प्रयोजकव्यापारस्य णिजर्थत्वे स्थिते प्रयोज्यव्यापार आख्यातार्थो वाच्यः। एवञ्च सङ्ख्यायाः स्ववाचकाख्यातार्थव्यापारेऽन्वयिन्येवान्वयाच्छिष्याभ्यामिति द्विवचनानापत्तिः। पाचयतीत्येक-वचनानापत्तिश्च। गुरोः अनभिधानेन गुरुशब्दात् प्रथमाया अनापत्तिः, तस्मात् तृतीयायाः आपत्तेश्च। अतोऽत्र फलमेव धात्वर्थस्सर्वोऽपि व्यापार आख्यातार्थ एवेति प्राचीनमीमांसकमतमनुचितमेव निष्कर्षे तु फलस्येव सर्वविधव्यापारस्यापि धात्वर्थमेव युक्तमिति वैयाकरणानामाशयः॥

**खण्डदेवादिनव्यमीमांसकमतानुसारं धात्वाख्यातार्थविषयकशाब्दबोधवर्णनम्**

अत्र खण्डदेवादयो नव्यमीमांसकास्तु चैत्रस्तण्डुलं पचति इत्यादौ फलं, तदनुकूलफूत्कारादिशरीरव्यापारश्चेत्येतदुभयं धात्वर्थः कृताराख्यातार्थः। धात्वर्थस्य स्वविषयकज्ञानविशेषजन्यानुमितिप्रयोज्यत्वसम्बन्धेनाख्यातार्थकृतिरूपभावनायामन्वयः। तथा च चैत्रस्तण्डुलं पचतीत्यादावेकत्वविशिष्टचैत्रकर्तृकविक्लित्यनुकूलस्वविषयकज्ञानविशेषजन्यानु -

मिति-प्रयोज्यपाकानुकूलफूत्कारादिशारीरव्यापारप्रयोज्यपाकानुकूलकृत्याश्रयाभिन्ना भावनेति शाब्दबोधः फलति। एवं विधिस्थले यजेत स्वर्गकाम इत्यत्र यजधातोर्यागोऽर्थः। प्रवर्तकेच्छा लिङर्थः। लिङः लिङ्त्वाख्यातत्वनामकौ द्वावंशौ भक्तः। तयोर्मध्ये लिङ्त्वांशेन शाब्दीभावना आख्यातत्वीशेनार्थीभावना च व्यपदिश्यते। तथा च यजेत स्वर्गकामः इत्यत्र यजधातोर्यागोऽर्थः। प्रवर्तकेच्छा तु लिङर्थः। आख्यातस्य कृतिरर्थः। यजधात्वर्थयागस्य करणसम्बन्धेन लिङ्त्वांशेनाभिधीयमानशाब्दीभावनायामन्वयलिङर्थेच्छायाः स्वविषयकज्ञानविशेषजन्यानुमिति -जन्यस्वनिरूपितकारणतावच्छेदकीभूतसम्बन्धनाशकालीनाभावप्रतियोग्यभावप्रतियोगिताव-च्छेदकत्वसम्बन्धेनाख्यातार्थकृतावन्वयः। तथा च यजेत स्वर्गकाम इत्याकारकविधिवाक्यस्थले एकत्वविशिष्टचैत्रकर्तृकयागकरणिकस्वीययागप्रवृत्तिजनकस्वविषयकयागीयेष्टसाधनत्वबोधकज्ञान-विशेषजन्यमितिजन्यस्वनिरूपितकारणतावच्छेदकीभूतसम्बन्धनाशकत्वाभावप्रतियोग्यभावप्रति-योगित्वविशिष्टयागीयकृतिरूपाभावने शाब्दबोधः फलति। एवमेव निषेधस्थले न कलञ्जं भक्षयेत् इत्यत्र निवर्तकत्वं लिङर्थः। भक्षधात्वर्थस्य भक्षणस्य लिङर्थनिष्ठाख्यातत्वांशवाच्य नञर्थविवर्तनायां करणत्वसम्बन्धेनान्वयः। लिङर्थनिष्ठाख्यतत्वांशप्रचोदितनिवर्तनायास्स्वज्ञानविशेषजन्यानुमिति सम्पादितप्रवृत्तिसामग्र्यभावकालीनाभावीयप्रतियोगित्वसम्बन्धः आख्यातार्थकृतावन्वयः। तथा च न कलञ्जभक्षयेत् इत्याकार कनिषेधस्थले चैत्रकर्तृकानिष्टसाधनत्वप्रकारककलञ्जभक्षणनिवृत्ति रिति भावनेति शाब्दबोधः फलति। एवं निषेधोत्रविधिस्थले यथान् दीक्षितस्यान्नमश्नीयात् इत्यादौ चैत्रकर्तृकयागीयवपाहोमपूर्वकदीक्षितान्नभोजनानुकूलव्यापाराभावानुकूलव्यापारं प्रति वपाहोमोत्तर-दीक्षितान्नभोजकप्रवृत्यनुकूलभावनेति शाब्दबोधः । एवं विध्युत्तरनिषेधस्थले अतिरात्रे षोडशिनं गृहणाति, नातिरात्रे षोडशिनं गृह्णाति इत्यादौ अतिरात्रे इति सप्तमीनिर्देशात् यदा हवनीये जुहोति इति वदतिरात्रस्याधिकरणत्वमवगम्यते। परन्त्वाहवनीयदेशादेरिव मुख्यस्यातिरात्रस्यादिकरणत्वासम्भवा -दासप्तम्याः उपकारकत्वे लक्षणामाश्रित्य षोडशिग्रहणेनातिरात्रोपकारं भावयेदिति वाक्यार्थ -स्स्वीकार्यः। तथा चायमात्रानुमानप्रयोगः अतिरात्रयागः इष्टसाधनम्, अयमत्रप्रवर्ततामित्याकारका -प्तेच्छाविषयत्वात् इत्येकमनुमानम्। ततः षोडशिग्रहणमतिरात्रानुपकारकम्, अयमस्मान्निवर्तता -मित्याकारकाप्तेच्छाविषयप्रवर्तनाविषयकव्यापाराभावानुकूलव्यापारजन्यनिवर्तनाविषयत्वात् इति द्वितीयमनुमान्। तथा च अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृह्णातीत्याकारकवाक्य -

चयाच्चैत्रकर्तृकातिरात्रयागविषयकषोडशिग्रहणाभावानुकूलव्यापारानुकूलनिवर्तनाकरणिका भावनेति शाब्दबोधो जायते इति सङ्गच्छते॥

प्राचीनवैयाकरणमतानुसारं धात्वाख्यातार्थविषयकशाब्दबोधवर्णनम्, नागेशादिन व्य-वैयाकरणमतानुसारं तन्निराकरणपूर्वकं धात्वाख्यातार्थविषयकशाब्दबोधवर्णनम् चैत्रस्तण्डुलं पचति, पच्यते तण्डुलश्चैत्रेण, चैत्रस्यपाकः इत्यादौ फलव्यापारौ, कर्तृकर्मादिरुपोधर्मी, सङ्ख्या, कालश्चेत्येते पदार्थाः भासन्ते इत्यस्मिन् विषये कस्यापि दार्शनिकस्य न काऽपि विप्रतिपत्तिः। परन्तु कास्यार्थस्य को वाचकः इत्यत्र विषये एव शाब्दिकाः नैयायिकमीमांसकादयो दार्शनिकश्च स्वस्वशास्त्रीयवासनया स्वस्वशास्त्रीयसिद्धान्तसमन्वयाय परस्परं कलहायमानः सन्तो बहुधा विप्रतिपाद्यन्ते। एवं क्रमे प्राचीननव्यवैयाकरणाः अपि स्वस्वव्याकरणशास्त्रीयसिद्धान्तसमन्वयावसरे क्वचिदंशेषु स्थलविशेषु वा भिन्नमनसस्सन्तस्स्वपक्षसमर्थनाय प्रायतन्त। तस्मिन् क्रमे धात्वाख्यातार्थविषयक - शाब्दबोधनिर्णयावसरे प्राचीनवैयाकरणास्स्वमतवासनया कर्तृकर्मभावप्रत्ययसमभिव्याहारस्थले धात्वाख्यातार्थ-पदार्थद्वयघटकधात्वर्थमित्थं निर्णयाम्बभूवुः। तथाहि –

**प्राचीनवैयाकरणमतानुसारं धात्वर्थनिरूपणम् नव्यवैयाकरणमतरित्या तन्निराकरणम्**

कर्तृप्रत्ययसमभिव्याहारे चैत्रस्तण्डुलं पचति इत्यादौ पचादिधातोः फलव्यापारार्थयोः पृथगेव शक्तेस्स्वीकार्यत्वेन तत्र पचादिधातोः फलम्, व्यापारश्चेत्येतदुभयं धात्वर्थः। न तु धातोः फलावच्छिन्नव्यापारे शक्तिः. यदि धातोः फलावाच्छिन्नव्यापारे एव शक्तिं स्वीकृत्य पचादिधातोः फलविशिष्टव्यापार एव प्रौढ्या धात्वर्थत्वस्वीकारे नव्यवैयाकरणानां **पदार्थः पदार्थेनैव अन्वेति, न तु पदार्थैकदेशेन** इति न्यायविरोधोपरिहार्य एव स्यात्। अपि च कर्तृप्रत्ययसमभिव्याहारे पचतीत्यादावबुधबोधनाय सामान्यव्युत्पन्नानां वैयाकरणानां स्पष्टप्रतिपत्त्यर्थ्यञ्च पचादिधातूनां फलव्यापारयोः पृथक्छक्तिकल्पनाद्वारा तेषां धातूनां फलव्यापारोभयार्थवाचकत्वमेव न्याय्यम्। अतः पूर्वोक्तदिशा कर्तृप्रत्ययसमभिव्याहारे चैत्रस्तण्डुलं पचतीत्यादौ फलं तदनुकूलव्यापारश्चैतदुभयं धात्वर्थः, कर्तृकर्मसङ्ख्याकालाः तिङर्थाः इति प्राचीनवैयाकरणास्सर्वेऽप्यवच्छेदकावच्छेदेन प्रौढ्या विवदन्ते। वस्तुतस्तु पचादिधातूनां कर्तृप्रत्ययसमभिव्याहारे फलविशिष्टव्यापारे, कर्मप्रत्ययसमभिव्यवहारे चैत्रेण पच्यते तण्डुलः इत्यादौ व्यापारविशिष्टफले च धातूनां शक्तिर्न तु धातोः फलव्यापारयोः पृथक्च्छक्तिः। अतो धातोः फलव्यापारयोः पृथक्च्छक्तिरिति तु न युक्तम्। यदि

धातोः फलव्यापारयोः पृथ          क्च्छक्तिस्वीकारे पृथगुपस्थितयोः पदार्थयोरुद्देश्यविधेय - भावेनान्वयस्तन्त्रमिति कार्यकारणभावबलाद्धातोः फलव्यापारयोरुद्देश्यविधेयभावेन अन्वयापत्रेः। अपि च एकस्यैव धातोः फलव्यापारोभयार्थकत्वे गोरवाल्लाघवात्पचादिधातोः फलविशिष्ट - व्यापारवाचकत्वमेव युक्तम्। धातूनां फलव्यापारयोरुभयोः पृथ      क्च्छक्तिकल्पनाद्वारा कर्तृकर्मादि तत्रत्प्रत्ययसमभिव्याहारे यथाक्रमं तत्रत्कर्तृकर्मप्रत्ययसमभिव्याहारस्य कारणत्वकल्पने तथा एकस्यैव धातोरर्थद्वये शक्तिकल्पने, तथा कार्यकारणभावद्वयकल्पने चातिगौरवादधातोः फलव्यापारोभयार्थकत्वकल्पनापेक्षया लाघवादेकस्य धातोः फलविशिष्टव्यापारे तथा कर्मप्रत्यय - समभिव्याहारे व्यापारविशिष्टफले एव शक्तिं प्रकल्प्य कर्तृप्रत्ययसमभिव्याहारे पचतीत्यादौ फलविशिष्टव्यापारे तथा कर्मप्रत्ययसमभिव्याहारे पच्यते तण्डुलश्चैत्रेण इत्यादौ व्यापारविशिष्टफले एव शक्तिं प्रकल्प्य पचतीत्यादौ फलावच्छिन्नव्यापार एव धात्वर्थस्तथा कर्मप्रत्ययसमभिव्याहारे पच्यते तण्डुलः चैत्रेणेत्यादौ व्यापारविशिष्टफलमेव धात्वर्थ इति वैयाकरणस्य नागेशस्य निगूढाशयः। स्पष्टञ्चेदं[11] तत्त्वदर्शिनीसहित वैयाकरणभूषणसारे[12] परमलघुमञ्जूषायाञ्चेतिस्पष्टं सचेतसाम्॥

**समीक्षा**

एतावता प्रबन्धेन प्राचीननैयायिकप्राचीनमीमांसकादिदर्शनान्तरीयमतनिराकरणपूर्वकं वैयाकरणसिद्धन्तप्रबोधकं पदशास्त्रीयशाब्दबोधसिद्धान्तसमीक्षणाख्यमेतदनुसन्धानपत्रं गवेषकेण मया यथाशक्ति यथामति साङ्गेपाङ्गन्निरमायि। प्रस्तुतमदीयानुसन्धानपत्रस्य व्याकरणशास्त्र - प्रधानत्वाद्विद्ययाहं वैयाकरणः इति हेतोर्व्याकरणशास्त्रीयवासनावासितान्तःकरणस्सन् पदशास्त्रीय - शाब्दबोधसिद्धान्तसमीक्षणावसरे स्वीयपदशास्त्रीयसिद्धान्तप्रतिपादनाय यथावसरं यथासन्दर्भञ्च प्राचीननैयायिकनव्यनैयायिक प्राचीननवीनमीमांसकादिमतान्यवच्छेदकसामानाधिकरण्येन निराकृत्य यथावसरं प्राचीनवैयाकरणमतमपि सन्दूष्य पाणिनीयमुनित्रयसिद्धान्तप्रमाणप्रदर्शनपूर्वक - न्नागेशादिनव्यवैयाकरणमतानुसारमहमस्मिन्नेतादृशप्रस्तुतशोधपत्रेपदशास्त्रीयधात्वाख्यातार्थ- विषयकशाब्दबोधं पर्यशोध  यम्। तावन्मात्रेण व्याकरणमतमेव समीचीनमन्यानि प्राचीननवीन - नैयायिकमीमांसादर्शनान्तरीयमतानि समूलपप्रामाणिकानीति नास्ति मेभिमतम्। अपि चैतदनुसन्धानपत्रे सर्वदा सर्वथा मया प्राचीनवैयाकरणप्राचीनमीमांसकादिदर्शनान्तरीयमतानि समूलकाषन्नैवाकाषित। यत्र नागेशादिनव्यवैयाकरणमतानुसारं पदशास्त्रीयधात्वार्थविषय -

कशाब्दबोधनिरूपणावसरे दर्शनान्तरीयमतानि बाधकानि स्युस्तत्रैवानुसन्धाता मया प्राचीनादि वैयाकरण नैयायिकमीमांसकमतानि पर्यनुयुञ्जिषत। सर्वेषां दर्शनानाम्महर्षिप्रोक्तत्वा - त्तादृशपवित्रदर्शनेषु इदं व्याकरणदर्शनमेव समीचीनमन्यानि दर्शनानि सर्वथाऽसमीचीनानीचि निर्णयोऽस्मदादिभिर्नैव कर्तव्यः वादिनो दौर्बल्यन्नतु वादस्येति वचनानुसारं वादिना - मनितरसाधारणप्रतिभाशेमुषीवैभवेन तत्रद्दार्शनिकास्तत्रच्छास्त्रीयवासनया तत्रच्छास्त्रीयसिद्धान्तान् प्रौढ्या समर्थयाञ्चक्रुः। प्रस्तुतानुसन्धानपत्रप्रणेताहमपि शोधपत्रेऽस्मिन् सर्वथावच्छेदकावच्छेदेन दर्शनान्तरीयमतानि नैवादूषयम्। यत्र प्रस्तुतानुसन्धानपत्रप्रणयनावसरे पदशास्त्रीयधात्वाख्यातार्थ - विषयकशाब्दबोधभञ्जकदर्शनान्तरीयपर्यनुयोगा एव मया उट्टङ्किताः। यत्र तादृशरीति नास्ति तत्र नव्यनैयायिकनव्य मीमांसकसिद्धान्तानप्यहम्मूर्धन्यतया शिरोधारयामासा तद्यथा धात्वर्थनिर्णयावसरे प्राचीनवैयैकरणप्राचीनमीमांसकप्राचीननैयायिकमतानि पदशास्त्रीयमूर्धन्यसिद्धान्तभञ्जकानीति कृत्वा तन्निराकरणपूर्वकं फलावच्छिन्नव्यापारोधात्वर्थः कर्तृलकारस्थले एवं कर्मप्रत्यय समभिव्याहारस्थले व्यापारावच्छिन्नपलमेव धात्वर्थः इति व्याकरणसिद्धान्तोऽत्र शोधपत्रे मया समूलं पर्यशोधि। एवं यत्र दर्शनान्तरीयमतान्यत्र शोधपत्रनिर्माणावसरेऽनुसन्धात्रा मया समाश्रयिषत। अत एव फलं तदनुकूलफूत्कारादिशारीख्यापाश्च धात्वर्थः। कृतिरेव आख्यातार्थ इति न व्यनैयायिकनव्यमीमांसकमुख्यसिद्धान्तः पाणिनीयनव्यव्याकरणशास्त्रसिद्धान्तस्यात्यन्तस्यात्यन्त - मनुकूल इति हेतोः दर्शनान्तरीयतादृशा नव्यमीमांसकनैयायिकादीनामेतादृशसिद्धान्तो मयाऽत्रानु - सन्धानपत्रे साङ्गोपाङ्गं प्रत्यष्ठापि। अनयामत्प्रणी तमिदं परिशोधनपत्रं निखिलविद्वज्जन - स्वाध्यायोपकारकं भूयादित्यलम्पल्लवतल्लजकल्पानल्पजल्पनेनेति दिक्। इत्थं बुधजनविधेयः।

1. न्यायभाष्यम् – 2-1-25
2. तद्वतितत्प्रकारकोऽनुभवःप्रम। तत्त्वचिन्तामणिः-प्रथमः-प्रत्यक्षखण्डः।
3. तत्सवेतत्सत्वमन्वयः।
4. तद्भावेतद्भावो व्यतिरेकः। (तर्कसङ्ग्रहः-चतुर्थः-शब्दपरिच्छेदः)
5. व्याकरणमहाभाष्यम् (प्रदीपोद्योतटीकाद्वयसहितम्) द्वितीयाध्यायः-प्रतमपादः-प्रथमाह्निकम् – सूत्रसङ्ख्या-1, व्याकरणमहाभाष्यम् – 2/1/1/1
6. वैयाकरणसिद्धान्तलघुमञ्जूषा – नागेशभावप्रकाशटीकोपेता- पृष्ठसङ्ख्या – 48

7. परमलघुमञ्जूषा – भावप्रकाशिका – बालबोधिनी संस्कृतहिन्दीव्याख्योपेता – प्रथमम्-शक्तिनिरूपणम् – पृ. सं. 12,13
8. तत्त्वदर्शिनी – वैयाकरणभूषणसारव्याख्या – प्रथमोधात्वर्थनिर्णयः – पृ.सं. 126-143
9. तत्त्वदर्शिनी – वैयाकरणभूषणसारव्याख्या प्रथमप्रकरणम् – धात्वर्थनिर्णयः – पृ.सं. – 362
10. परमलघुमञ्जूषा – बालबोधिनीटीकोपेता – धात्वर्थनिर्णयः-पृ.सं.223
11. तत्त्वदर्शिनी (वैयाकरणभूषणसारव्याख्या) प्रथमप्रकरणम् – धात्वर्थनिर्णयः – पृ.सं. – 12
12. परमलघुमञ्जूषा – भावप्रकाशिका – बालबोधिनी संस्कृतहिन्दीव्याख्योपेता –पृ.सं. – 101,102

***

# काल एव हि विश्वात्मा

**प्रो. प्रकाशचन्द्रः**
आचार्यः, व्याकरणविभागः।

लोके वेदे च कालस्य सत्ता सत्तात्मको वा कालः सर्वैः स्वीक्रियते स्तूयते च। व्यवहारदृष्ट्या च कालस्य महत्त्वपूर्णं स्थानं विद्यते। कालं विना किमपि स्थावरजङ्गमात्मकं स्थित्यात्मकं क्रियात्मकञ्च कर्म नैव सम्भवति। कालस्य स्वरूपात्मकं माहात्म्यमथर्ववेदे अतीव सरलशब्दैः निर्दिष्टं दृश्यते, यथा तत्सम्बद्धाः केचनमन्त्रा द्रष्टुं शक्यन्ते।

**कालो अश्वो वहति सप्तरश्मिः सहस्राक्षो अजरो भूरिरेताः।**
**तमारोहन्ति कवयो विपश्चितः तस्य चक्रा भुवनानि विश्वा।।**[1]

**काले मनः काले भूतानि प्राणः काले नाम समाहिताम्।**
**कालेन सर्वा नन्दन्त्यागतेन प्रजा इमाः।।**[2]

**काले तपः काले ज्येष्ठं काले ब्रह्म समाहितम्।**
**कालो ह सर्वस्येश्वरो यः पितासीत् प्रजापतेः।।**[3]

**कालादाप समभवन् कालाद् ब्रह्म तपो दिशः।**
**कालेनोदेति सूर्यः काले निविशते पुनः।।**[4]

एतादृशा बहवो मन्त्रा वेदेषु समुपलभ्यन्ते यैः कालस्य स्वरूपात्मकं माहात्म्यं ज्ञातुं शक्यते। न केवलं व्यवहारिकदृष्ट्या अपितु आध्यात्मिकदृष्ट्या दार्शनिकदृष्ट्या च कालस्य मानवजीवने कियन्महत्त्वं विद्यत इति प्रबोधका विचारा वैदिके लौकिकवाङ्मये च सम्प्राप्यन्ते। प्रस्तुतप्रसङ्गे व्याकरणशास्त्रदृष्ट्या कालविषयः प्रस्तोतुं प्रयत्यते।

**काललक्षणम्** –

यद्यपि पाणिनिना काललक्षणं नैव लक्षितं तथापि कालस्य व्यावहारिकीमपेक्षां स्वीकृत्य शास्त्रकार्यार्थं बहूनि सूत्राणि विरचितानि। पाणिनिमते कालोऽशिष्योऽस्ति यतो हि स स्वाभाविकरूपेण सर्वत्र प्राप्तोऽस्ति, तस्य च लोकतोऽर्थावगतेः तस्याशिष्यत्वमिति। यथा सूत्रमस्ति- **कालोपसर्जने च तुल्यम्।**[5]**तदशिष्यं संज्ञाप्रमाणत्वात्।**[6]

इति सूत्रादशिष्यमिति वर्तते। सूत्राभिप्रायं स्पष्टयन् कथयति काशिकाकारः कालोपसर्जने चाशिष्ये कस्मादर्थस्यान्यप्रमाणत्वात्। तुल्यशब्दो हेत्वनुकर्षणार्थः। अशिष्यविशेषणं चैतत्। कालोपसर्जने च तुल्यमशिष्ये भवतः। इहान्ये वैयाकरणाः कालोपसर्जनयोः परिभाषां कुर्वन्ति आन्याय्यादुत्थानादान्याय्याच्च संवेशनात्। एषोऽद्यतनः कालः। अपरे पुनराहुः। अहरुभयतोर्द्धरात्रमेषोऽद्यतनः काल इति। तत्पाणिनिराचार्यः प्रत्याचष्टे लोकतोऽर्थावगतेः। **यैरपि व्याकरणं न श्रुतं तेदेऽप्याहुरिदमस्मामिरद्य कर्तव्यमिदं श्वः कर्तव्यमिदं ह्यः कृतमिति। नैव व्युत्पाद्यन्ते।**[7]

**भाष्यकारमतम् –**

महाभाष्यकारेण कालस्य संक्षिप्तं किन्तु तात्त्विकं लक्षणं निर्दिष्टमस्ति कालाः परिमाणिना [8] इति सूत्रभाष्ये। कालविषये भाष्यकारः कथयति येन मूर्तीनामुपचयाश्चापचयाश्च लक्ष्यन्ते तं कालमित्याहुः। तस्यैव कयाचित्क्रियया युक्तस्याहरिति च भवति रात्रिरिति च । कया क्रियया आदित्यगत्या। तत्रैवाऽसकृदावृत्तया मास इति भवति संवत्सर इति च भवति। [9] अत्र प्रदीपकारः भाष्याशयं स्पष्टयन् निगदति "तरुतृणलताप्रभृतीनां कदाचिदुपचयः अन्यथा त्वपचयः। स प्रत्ययान्तरऽविशेषेऽपियत्कृतः स कालः इत्यर्थः" [10] तत्र उद्योतोऽपि द्रष्टव्यो भवति तरुतृणेति। पदार्थानामन्यथा सिद्धवृद्ध्यपेक्षयाऽनुमेयः काल इति भाष्याशय इति भावः। प्रत्ययान्तरम्। कारणान्तरम्। भाष्ये तस्यैवेति। अखण्डकालाभिप्रायमिदम्। [11] अनेन भाष्यादिप्रमाणेन कालविषये वक्तुं शक्यते यदेकोऽखण्डोऽपि वस्तूनामुपचयापचयादि क्रियाक्रियान्तरलक्षितेन कार्येण कालोऽनुमीयते। स च काल आदित्यगत्या क्रियया दिवसरात्रिमाससंवत्सरादिभेदोपभेदेन विभज्यमानो व्यवहाराय कल्पते।

**मात्रापरिमितो वर्णात्मकः कालः –**

तपरस्तत्कालस्य ऊकालोऽज्झस्वदीर्घप्लुतः इत्यादिसूत्रनिर्देशैर्वर्णसहचरितो मात्रापरिमितश्च कालः परिगृह्यते यथा तपरस्तत्कालस्य इति सूत्रभाष्यं द्रष्टुं शक्यते अयुक्तोऽयं निर्देशः तत्कालस्येति। तदित्यनेन कालः प्रतिनिर्दिश्यते, तदित्ययं च वर्णः। तत्रायुक्तं वर्णस्य कालेन सह सामानाधिकरण्यम्।

कथं तर्हि निर्देशः कर्तव्यः। तत्कालकालस्येति। किमिदं तत्कालकालस्येति?। तस्य कालस्तत्कालः। तत्कालः कालोयस्येति सोऽयं तत्कालकालस्तत्कालस्येति।

स तर्हि तथा निर्देशः कर्तव्यः?। न कर्तव्यः। उत्तरपदलोपोऽत्रद्रष्टव्यः तद्यथा उष्ट्रमुखमिव मुखं यस्य सोऽयमुष्ट्रमुखः खरमुखः। एवं तत्कालकालस्तत्कालस्तत्कालस्येति। [12] प्रदीपकारः भाष्यसन्दर्भेण वर्णकालयोः सामानाधिकरण्यं स्पष्टयन् कथयति उष्ट्रमुख इति। गम्यमानार्थत्वाद्द्वितीयमुखशब्दप्रयोगः। उष्ट्रो मुखमस्योष्ट्रमुखः। न च प्राणी प्राण्यन्तरस्य मुखमिति सामर्थ्यात्सादृश्यप्रतीतिः। समग्रेण चोष्ट्रेण मुखस्य सादृश्याभावादुष्ट्रशब्दोऽवयवे वर्तते। मुखेनैव मुखस्य सादृश्यं प्रसिद्धमिति सामर्थ्यात् – उष्ट्रमुखमिवमुखमस्येत्यर्थो गम्यते। एवमिहापि वर्णः कालो न भवतीति सामर्थ्यात्तदीया क्रिया क्रियान्तरपरिच्छिन्नासती क्रियान्तरस्य परिच्छेदिकेति वर्ण एव परिच्छेदक उच्यते। [13] तत्रोद्योतोऽपि भाष्यप्रदीपाशयं प्रकाशयति तदीया क्रियेति। उच्चारणरूपेत्यर्थः। क्रियान्तरस्य। वर्णान्तरोच्चारणस्य। वर्ण एवेति। वर्णाश्रितक्रियागतपरिच्छेदकत्वाश्रये उपचाराद्वर्णपरामर्शिनस्तच्छब्दस्य मुख्यवृत्तेरेव कालशब्देन सामानाधिकरण्य-मित्यर्थः"।[14]

अस्मिन् विषये समाधानान्तरं प्रस्तुवन् भाष्यकारः कथयति अथवा साहचर्यात्ताच्छब्द्यं भविष्यति। कालसहचरितो वर्णः, वर्णोऽपि कालएव [15]अर्थात् "वर्णसहचरितायां क्रियायां तच्छब्दो वर्तते, स कालो यस्येति तद्वर्णसमवेता क्रिया परिच्छेदिकाऽस्येत्यर्थः"[16]

"ऊकालोऽझ्ह्रस्वदीर्घप्लुतः" इतिसूत्रभाष्येऽपि तादृश एव विमर्शो भाष्यकारेण विहितोऽस्ति यथा तत्र लिखति भाष्यकारः अयुक्तोऽयं निर्देशः "ऊ" इत्यनेन कालः प्रतिनिर्दिश्यते। "ऊ" इत्ययं च वर्णः। तत्रायुक्तं वर्णस्य कालेन सह सामानाधिकरण्यम्। कथंतर्हि निर्देशः कर्तव्यः? "ऊकालकाल" इति। किमिदमूकालकाल इति। "ऊ" इत्येतस्य काल ऊकालः, ऊकालो यस्य स ऊकालकाल इति। स तर्हि तथा निर्देशः कर्तव्यः? न कर्तव्यः। उत्तरपदलोपोऽत्र द्रष्टव्यः। तद्यथा उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः। खरमुखः। एवमूकालकाल ऊकाल इति। अथवा साहचर्यात्ताच्छब्द्यं भविष्यति। कालसहचरितो वर्णोऽपि काल एव। [17] अनेन भाष्यादिविवरणेन वर्णसहचरितो मात्रादिपरिमितो कालः शब्दोच्चारणक्रियया सह सामानाधिकरण्यं धत्ते। यथा अन्याः क्रियाकालसापेक्षा भवन्ति

तथैव तपरत्वादिनिर्दिष्टा ह्रस्वदीर्घप्लुतादिमात्रापरिमिता द्रुतमध्यमविलम्बितादिवृत्तिविशिष्टा वर्णाद्युच्चारणक्रिया अपि कालसहचरिता तत्तद्वर्णसमवेता सती सर्वत्र शब्दव्यवहाराय कल्पते।

**वाक्यपदीयकारमतम्** –

भर्तृहरिणा भाष्यादिकमनुसृत्य वाक्यपदीये विविधप्रकरणेषु कालस्य तात्त्विकं स्वरूपं विस्तरेण प्रतिपादितम्। वाक्यपदीयस्य तृतीयकाण्डे कालस्वरूपं विवेचयितुं कालनाम्ना कालसमुद्देशोऽपि विरचितः। तत्र कालस्य वैविध्यपूर्णं व्यावहारिकं दार्शनिकञ्च स्वरूपमाचार्येण समीक्षितम्। तत्र निर्दिष्टकालस्य कानिचित् तत्त्वानिद्रष्टुं शक्यन्ते। समुद्देशस्यादौ तावद् वैशेषिकसम्मतकालस्वरूपं निरूपयन् कथयति।

**"व्यापारव्यतिरेकेण कालमेके प्रचक्षते।**
**नित्यमेकं विभु द्रव्यं परिमाणं क्रियावताम्।।"**[18]

अर्थात् "परापरादिप्रत्ययलिङ्गो व्यापक एकोऽमूर्तोऽत एवाकृतकत्वान्नित्यः कालः क्रियाव्यतिरिक्तो जन्मादिक्रियाद्वारेण भावपरिच्छेदको वैशेषिकैराम्नातः।" [19] कालस्य परिच्छेदकान्तरेभ्यः परिच्छेद्यभेदेन भेदं स्पष्टयन् कथयति वाक्यपदीयकारः।

**"दिष्टिप्रस्थसुवर्णादि मूर्तिभेदाय कल्पते।**[20]
**क्रियाभेदाय कालस्तु सङ्ख्या सर्वस्य भेदिका।।**

कारिकाशयं विमृशन् टीकाकारः कथयति दिष्टिरायाममानविशेषः प्रमाणरूपः प्रस्थो व्रीह्यादेरारोहपरिणाहाभ्यां परिच्छेदकं परिमाणम्, सुवर्णादिकं तून्मानमूर्ध्वमानरूपम्, आत्मनो गुरुत्वविशेषेण द्रव्यपरिच्छेदकम्, एतत् त्रितयं मूर्तिभेदाय मूर्तिमतो द्रव्यस्य भेदायकल्पते परिच्छेदाय प्रभवति। कालस्तु अमूर्तायाः क्रियाया भेदाय परिच्छेदाय कल्पते सूर्यादिसञ्चारो हि कालेन परिच्छिद्यते मासः संवत्सर इत्यादिमूर्तस्य सङ्ख्यया परिच्छेदे द्वौ घटाविति, अमूर्तस्य तया परिच्छेदे बहव आत्मान इति द्वे क्रिये इति च । प्रमाणस्य तया परिच्छेदे एका वितस्तिः द्वौ हस्तौ इति। परिमाणस्य तया परिच्छेदे चत्वारः प्रस्थाः इति। उन्मानस्य तया परिच्छेदे – पञ्च पलानि इति। सङ्ख्याया अपि सङ्ख्या भेदिका द्वे विशंती इति, पञ्चपञ्चाशत् इति च।[21] अत्रेदमवधेयं भवति यत् कालो यथा अमूर्तः तथैव क्रियाऽपि अमूर्ता अप्रत्यक्षा भवति यथा क्रियाविषये भाष्यकारः कथयति"क्रिया नामेयमत्यन्तापरिदृष्टाशक्या पिण्डीभूता निदर्शयितुं यथा गर्भो निर्लुठितः" [22] अतः

उभयोरपि अमूर्तयोः क्रियाकालयोः परिच्छेद्यपरिच्छेदकभावो भवतीति भावः। कालेन क्रिया कथं परिच्छिद्यते इति विषयं स्पष्टयन् कथयति वाक्यपदीयकारः -

**"उत्पत्तौ च स्थितौ चैव विनाशेचापि तद्वताम्।**
**निमित्तं कालमेवाहुर्विभक्तेनात्मना स्थितम्[23]।"**

अर्थात् जन्मस्थितिविनाशाः समस्तक्रियाकलापान्तर्भावनहेतव इति तद्द्वारेण जन्मादिमतां पदार्थानां निमित्तकारणं कालमाहुः। तदपेक्षो हि पदार्थानामुदयादिरवतिष्ठते प्रविभक्तशरीरः। तथा हि केचिद्वसन्ते प्रसूयन्ते, अपरे शरदि, प्रावृष्यन्य इत्यादि वाच्यम्। एवं स्थितिविनाशयोरपि। उपाधिभेदाच्च क्रियारूपोपाधिभेदाच्चभिद्यमानः काल स्वसंसर्गिषु जन्मादिक्रियावत्सु भावेषु भेदाय तेषां परिच्छेदाय अलं पर्याप्त[24] समर्थोऽस्तीति क्रियाकालयोः परिच्छेद्यपरिच्छेदकभावः सिध्यति।

**प्रतिबन्धाभ्यनुज्ञात्मिकाकालशक्तिः** –

वाक्यपदीयस्य ब्रह्मकाण्डे आचार्यो भर्तृहरिः कालशक्तिं निर्दिष्टवान् यथा –

**अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः।[25]**
**जन्मादयो विकाराः षड् भावभेदस्य योनयः।।**

अर्थात् ब्रह्मणएकत्वेपि कालशक्त्या विविधा जन्मादयो भावविकाराः सम्भवन्ति, यस्य ब्रह्मणोऽध्या- हितकलाम्, आरोपितभेदाम्। कलाऽत्र भेदः कलतेरनेकार्थत्वात्। कालशक्तिमुपाश्रिता (जायतेऽस्ति विपरिणमते वर्धते परिक्षीयते विनश्यतीति निरुक्ते वार्ष्यायणिमतानुसारं यास्काचार्येण षड् भावविकारा उल्लिखिताः (नि.रु.1/2/8,9)जन्मादयः षड्भावविकाराः भावभेदस्य क्रियाविशेषस्य पच्यादिरूपस्य योनयो भूतभविष्यद्वर्तमानरूपैरपाक्षीत् पक्ष्यति पचतीत्यादिरूपैर्ज्ञापककारणानि भवन्तीति भावः [26]। स्वोपज्ञवृत्तिकारः कारिकाशयं स्पष्टयन् कथयति कालाख्येन हि स्वातन्त्र्येण सर्वाः परतन्त्राः जन्मवत्यः शक्तयः समाविष्टा कालशक्तिमनुपतन्ति।[27]तत्रैतदवधेयमस्ति यत् कालाख्या स्वातन्त्र्यशक्तिर्ब्रह्मण इति तत्र भवद्भर्तृहरेरभिप्रायः।[28] यथा जातिसमुद्देशेऽपि हेलाराजः आत्मभूतं क्रमोऽप्यस्या यत्रेदं कालदर्शनम्। पौर्वापर्यादिरूपेण प्रविभक्तमिव स्थितम्। [29] इति कारिकाव्याख्यायां कथयति तात्पर्येण तु कालः पौर्वापर्यादिरूपेण प्रविभक्त इव क्रियोपाधिवशात्। क्रमाख्या हि कालशक्तिः ब्रह्मणो जन्मवत्सु पदार्थेषु जन्मादिक्रियाद्वारकमेव पौर्वापर्येणावभासोपगमविधायिनी नापरो द्रव्यभूतः काल इति। [30]ये च

भावानां क्रमवन्तःक्रियाविशेषास्तेकालाधीनत्वात् पृथगप्रत्यवभासमानाः काल एव व्यवह्रियन्ते इति कालस्य विश्वात्मत्वरूपं विवृण्वन् वाक्यपदीयकारः कथयति –

**प्रत्यवस्थं तु कालस्य व्यापारोऽत्र व्यवस्थितः।**
**काल एव हि विश्वात्मा व्यापार इति कथ्यते।।**[31]

अर्थात् प्रत्यवस्थं तु नियतकालासु स्थितिनिरोधाख्यासु अवस्थासु प्रत्येकं तु अनुग्राहकत्वप्रतिबन्धकत्वतिरोभावकत्वादिभेदेन कालस्य व्यापारोऽत्रावस्थासु व्यवस्थितः। हि शब्दः प्रसिद्धौ विश्वात्मा विश्वस्य कालायत्तत्वाद् विश्वस्यात्मा प्रयोजकत्वेन सूत्रस्थानीयः काल एव भावानां (भावविकाराणाञ्च) सर्वविधव्यापाररूप इति कथ्यते कार्यकारणयोरभेदोपचारादिति।[32] अन्वर्थेन नाम्नैव कालो विश्ववैचित्र्यहेतुरितितत्त्वं प्रकाशयन् कथयति वाक्यपदीयकारः।

**जलयन्त्रभ्रमावेशसदृशीभिः प्रवृत्तिभिः।**
**स कलाः कलयन् सर्वाः कालाख्यां लभते विभुः।।**[33]

कारिकाभावं विवृण्वन् टीकाकारहेलाराजः लिखति ‘‘जलस्योद्धरणार्थं यन्त्रमरघट्टप्रायमरघट्टसदृशम्, (अरहट इति भाषायाम्) तस्य भ्रमः परिवर्तनम्, तेनावेशस्तस्यैव क्षोमः तत्तुल्याः परावर्तमानस्यकालस्य पुनः पुनर्वसन्तादि- भावेनावृत्तयः ताभिरयं विभुर्व्यापको नित्योऽपि कलयति क्षिपति कला भावपर्यायाः समुत्सृजति स्वकारणेभ्यः प्रवर्तयतीति कालाख्यामन्वर्थां (संज्ञां) लभते। तथा च क्रमिकांश्चक्रभ्रमवत् परावर्तमानान् भावान् प्रकाशयन् कालयति भूतानीति काल इत्युच्यते।[34]यद्यपि सर्वेऽपिविकाराः कार्याणि स्वस्वकारणाधीनोत्पत्तयः तथाप्यस्ति तेषां सर्वेषामप्युत्पत्तौ ब्रह्मात्मिका कालशक्तिः कारणभूता विद्यत इति भावः। कालसमुद्देशे कालशक्तिः किंस्वरूपेति जिज्ञासायां सा प्रतिबन्धाभ्यनुज्ञात्मिका कालशक्तिर्विद्यते इति विस्तरेण प्रतिपादितवान् वाक्यपदीयकारः यथा तद्विषये काश्चनकारिका द्रष्टव्या भवन्ति, यथा शक्त्यात्मकं कालं निरूपयन् कथयति –

**तमस्य लोकयन्त्रस्य सूत्रधारं प्रचक्षते।**
**प्रतिबन्धाभ्यनुभ्यां तेन विश्वं विभज्यते।।**[35]

कारिकाभिप्रायोऽस्ति अस्य सर्वचक्षुः सन्निकृष्टस्यलोकयन्त्रस्य यन्त्रकल्पस्य लोकस्य विश्वस्य तं कालं सूत्रधारमिवनियामकं प्रचक्षते कवयः क्रान्तदर्शिनः। तेन कालेन हि

प्रतिबन्धाभ्यनुज्ञाभ्यां स्वशक्तिभ्यां, जन्मनः प्रतिबन्धोलयः विनाशः, अभ्यनुज्ञा उत्पत्तावनुमतिः, जन्मनाशाभ्यामिदं विश्वं विभज्यते। प्राप्तपौर्वापर्यप्रविभागं दृश्यते। सर्वाः प्रविभागलक्षणाश्चेष्टाः ताभ्यामेव प्रतिबन्धाभ्यनुज्ञाभ्यां कालशक्तिभ्यामेव कार्यन्ते। [36]तत्रैव कालसमुद्देशे कालस्य प्रतिबन्धाभ्यमुज्ञाभ्यांसह शाश्वतीं वृत्तिं स्वीकुर्वन् कथयति भर्तृहरिः –

**प्रतिबन्धाभ्यनुज्ञाभ्यां वृत्तिर्यातस्यशाश्वती।**
**तया विभज्यमानोऽसौ भजते क्रमरूपताम्।।**[37]

कारिकाशयं स्पष्टयन् प्रकाशटीकाकारः कथयति कस्याश्चित् क्रियायाः साधनशक्तीनां व्यापारविघाते प्रतिबन्धः। तद्विपर्ययोऽभ्यनुज्ञा। ताभ्यामुपलक्षिता कालस्य नित्या प्रवृत्तिर्भावेषु सततपरिणामिषु हि भावेषु किञ्चिदाजायते किञ्चिदपक्षीयत इति नियतमेतत्, तथा च कार्यनिवेशी क्रमः काले समारोप्यते, न त्वसौ तत्र भाविक इत्यर्थः क्रियाधर्मो हि मुख्यः क्रमस्तदन्यत्रोपचरितः। पौर्वापर्यं हि पूर्वापरेषु वस्तुषूपाधिभूतं लक्ष्यते, न तु स्वतन्त्रम्। एवं यौगपद्यमपि क्रमविरोधी धर्मः कार्यगतः काले समारोप्यते। [38]अनेन प्रकारेण प्रतिबन्धाभ्यनुज्ञात्मिकया नित्यकालवृत्त्या सर्वा उत्पत्तिविनाशात्मिकाः क्रमयुक्ताः स्थावरजङ्गमक्रियाः काले समारोप्यन्त इति भावः।

**कालप्रविभागाः –**

एकोऽपि कालः व्यवहाराय भूतभविष्ययद्वर्तमानादिभेदेन त्रिधा विभक्तः स्वाक्रियते। पाणिनिसूत्रेषु विभागात्मककालस्यक्रमे भूतकालस्य प्राथम्येनोल्लेखो विद्यते। तदनु वर्तमानकालस्य तत्पश्चाच्च भविष्यत्कालस्य। भाष्यकारेण भूते, [39] वर्तमाने लट् [40] भविष्यति गम्यादयः [41] इत्यादिसूत्रभाष्ये विभागात्मककालविषयः तात्त्विकरूपेण विमृष्टोऽस्ति। यथा भूते इति अधिकारसूत्रमुद्दिश्य भाष्यकारो विचारयति "भूत इत्युच्यते। कस्मिन् भूते? काले? न वै कालाधिकारोऽस्ति। एवं तर्हि धातोरिति वर्तते। धातौ भूते। धातुर्वैशब्दः। न च शब्दस्य भूतभविष्यद्वर्तमानतायाः सम्भवोऽस्ति। शब्देऽसम्भवादर्थे कार्यं विज्ञास्यते। कः पुनर्धात्वर्थः? क्रिया। क्रियायां भूतायाम्। [42] तदेवं क्रियाकालसमन्वयेन कालस्य भूतत्वं स्वीक्रियते। भूतत्वं च वर्तमानध्वंसप्रतियोगिकालवृत्तित्वम्[43] यथा क्रियात्मक- कालस्य भूतत्वभेदः तथैव भविष्यत्त्वभेदोऽपि स्वीक्रियते तत्र **भविष्यति गम्यादयः** इत्यादिसूत्राणि प्रमाणभूतानि सन्ति। वर्तमाने लट् इति सूत्रभाष्ये वार्तिकमाध्यमेन कालस्य वर्तमानत्वविषयो विवेचितोऽस्ति भाष्यकारेण।

यथा वार्तिकमस्ति –न्याय्यात्वारम्भानपवर्गात् [44] तत्र भाष्यकारः कथयति, **"न्याय्या त्वेषा वर्तमानकालता। कुतः? आरम्भानपवर्गात्। आरम्भोऽत्रानपवृक्त एष एव च नाम न्याय्यो वर्तमानकालो यत्रारम्भोऽनपवृक्तः** [45]। अर्थात् आरम्भापरिसमाप्तिक्रियात्मकः कालो वर्तमानकालो भवति। तत्र सूत्रे वर्तमानकालविषयोविस्तरेण चर्चितोऽस्ति भाष्यकारेण।सूत्रवार्तिकभाष्यादिकमनुकृत्य भर्तृहरिणा कालस्य दिवसरात्रिपक्षमाससंवत्सरादिप्रविभागैः सह तस्य भूत भविष्यद्वर्तमानादयः प्रविभागा विस्तरेण विवेचिताः सन्ति वाक्यपदीये – यथा अस्मिन् सन्दर्भेकाश्चनकारिका द्रष्टव्याः यथा "कालाः परिमाणिना"इति सूत्रभाष्यनिर्दिष्टकाललक्षणं स्वीकृत्य कथयति वाक्यपदीयकारः -

**"आदित्यग्रहनक्षत्रपरिस्पन्दमथापरे।**
**भिन्नमावृत्तिभेदेन कालं कालविदो विदुः।।"**[46]

अर्थात् उदयावधिरस्तमयावसानः सूर्यसञ्चारो दिवसः। अस्तमयादिरुदयपर्यवसानो रात्रिकालः। स च पञ्चदशावृत्तिः पक्षः। त्रिंशत्कृत्वो मासः। चन्द्रमसः सकलनक्षत्रातिक्रमो मास इत्येवं वा कल्पना। बृहस्पते रेकराशिसञ्चरणं संवत्सरः। एवमन्येषामपि ग्रहनक्षत्राणां ज्योतिषशास्त्रप्रसिद्धेन गतिप्रचारभेदेन युगमन्वन्तर कल्पमहाकल्पादिप्रविभागः कालोऽनुसर्तव्य इति हेलाराजः।[47] प्रकारान्तरेण क्रियान्तराणां कालपरिच्छेद्यत्वं निरूपयन् कथयति ग्रन्थकारः –

**"क्रियान्तरपरिच्छेदे प्रवृत्ता या क्रियां प्रति।**[48]
**निर्ज्ञातपरिमाणा सा काल इत्यभिधीयते।।"**

अर्थात् क्रियान्तरपरिच्छेदे प्रवृत्ता या क्रिया सूर्यादिसञ्चाररूपा दिवसादिपदवाच्या सा काल इत्यभिधीयते। किञ्च या क्रिया गोदोहनादिरूपाऽन्यतो निर्ज्ञातपरिमाणा सा क्रियामासनादिकां प्रति काल इत्यभिधीयते। आद्याया उदाहरणम् – दिवसमधीते रात्रिमधीते इति। द्वितीयाया उदाहरणम् – गोदोहमास्ते इति। [49]अभिप्रायोऽस्ति यत् क्रियान्तरपरिच्छेदे प्रवृत्तेत्यनेनैव गतत्वात् क्रियां प्रतीति पुनर्वचनमपेक्षाभेदेन क्रियायाः कालत्वानियमख्यापनार्थम्। तथा चान्यतः प्रसिद्धपरिमाणो गोदोहादिरपि देवदत्तादिगतास्यादिक्रियाः परिच्छिन्दन् भवत्येवकालः। [50]कालस्य भूतभविष्यद्वर्तमानत्वादिविभागदृष्ट्यापि भर्तृहरिणा विस्तरेण चर्चा कृतास्ति। यथा क्रियोपाधिमाध्यमेन कालस्य विभागं तद्भेदांश्च निर्दिशन् वाक्यपदीयकारिका विद्यते –

**"क्रियोपाधिश्च सन् भूतभविष्यद्वर्तमानता।**
**एकादशभिराकारैर्विभक्ताः प्रतिपाद्यते।।"[51]**

अर्थात् उत्पन्नध्वस्ता यदा क्रिया भवन्ति, तदातदुपाधिः कालो भूत इति व्यपदिश्यते। यदा तु सन्निहितसाधनाः सम्भाव्यमानोदयाः क्रियाः तदा तदुपाधिः कालो भविष्यत्तां प्रतिपाद्यते। प्रारब्धापरिसमाप्तकालक्रियोपाधिस्तु वर्तमानकालः, ते च भूतादयः कालविभागाः, पुनरवान्तरभेदेनैकादशधा भवन्ति। [52]भूतादयः कालविभागा एकादशधा कथं भवन्तीति विषयमग्रिमकारिकया स्पष्टयन् कथयति ग्रन्थकारः –

**"भूतः पञ्चविधस्तत्र भविष्यंश्च चतुर्विधः।**
**वर्तमानो द्विधाख्यात इत्येकादशकल्पना।।"[53]**

अर्थात् तत्र भूतभविष्यद्वर्तमानसंज्ञकेषु त्रिषु कालविभागेषु भूतः पञ्चविधः, तथा हि भूतसामान्यमेकः, अद्यतनभूतो द्वितीयः अनद्यतनभूतस्तृतीयः अद्यतनानद्यतनसमुदायश्चतुर्थः। भविष्यन्नपि अध्यारोपितभूतभावो भूतभेदः पञ्चमो गौणः। भविष्यंश्च भविष्यत्कालस्तु चतुर्विधः। तथाहि भविष्यत्सामान्यमेकः अद्यतनो भविष्यद्द्वितीयः, अनद्यतनो भविष्यत् तृतीयः, अद्यतनानद्यतनसमुदायरूपो भविष्यच्चतुर्थः। वर्तमानस्तु द्विधाऽऽख्यातः कथितः तथा हि एको मुख्योवर्तमानः एकः, अमुख्यस्त्वतिदिष्टवर्तमानभावो द्वितीयः। इत्येवं भूतभविष्यद्वर्तमानकालभेदा अवान्तर- भेदैरेकादशधा[54]विभक्ता व्यवह्रियन्ते। कालस्य भूतादिविभागत्रयं दार्शनिकरीत्या विमृशन् कथयति वाक्यपदीयकारः-

**"तस्याभिन्नस्य कालस्य व्यवहारे क्रियाकृताः।**
**भेदा इव त्रयः सिद्धा याँल्लोको नातिवर्तते।।"[55]**

कारिकाशयं स्पष्टयन् हेलाराजः कथयति, "अभिन्नेन कालेन व्यवहर्तुमशक्यत्वाल्लोके त्रयो भेदा इव परमार्थत एकत्वात् क्रियोपाधयः प्रसिद्धाः तस्य भूतभविष्यद्वर्तमानाख्याः। क्रियाव्युपक्रमे भूतः, सम्भावितायां क्रियायां भविष्यत्, क्षणप्रवाहरूपेण प्रवर्तमानायां तस्यां वर्तमानो मुख्य एवायम्।" [56] तस्य कालस्य भूतादिभेदः परमार्थः कथं न भवतीति जिज्ञासायां कथयति वाक्यपदीयकारः –

**"एकस्य शक्तयस्तिस्रः कालस्य समवस्थिताः।**

**यत्सम्बन्धेन भावानां दर्शनादर्शने सताम्।।"**[57]

अर्थात् कार्यभेदे कारणभेदानुमानम्, शक्तिभेदादेव च कार्यभेदोपपत्तेः कालाख्यस्य जगत्कारणस्य मुख्यो भेदो नास्ति। तथाहि वर्तमानशक्तिसम्बन्धेन भावानां सतामेवाभिव्यक्तिर्जन्म। अतीतानागतकालशक्तिसम्बन्धेन तु सतामेव तिरोभावदर्शनमनभिव्यक्तिर्विनाशः प्राक्प्रध्वंसाभावरूप इति शक्तिभेदात् कार्यभेदोपपत्तौ कालभेदकल्पना निर्निमित्ता।[58] कालस्य एते भूतादयः त्रयो विभागाः। त्रयो मार्गा इव व्यवस्थिताः सन्तः परम्परया व्यवह्रियन्ते इति तत्त्वं प्रकाशयन् आचार्यः कथयति – **"तमः प्रकाशवत् त्वेते त्रयोऽध्वानो व्यवस्थिताः**

**अक्रमास्तेषु भावानां क्रमः समुपलभ्यते।।"**[59]

कारिकाशयं स्पष्टयन् प्रकाशकारो निगदति।भूतभविष्यद्वर्तमानाख्यास्त्रयः कालविभागा अध्वान इव अध्वानः। यथा ह्यध्वसु गन्तारो गमनागमनादिप्रबन्धं वर्तयन्ति, तथैतेषु भावाः परिणाममनुभवन्तो गतागतप्रबन्धमुपरचयन्ति। भविष्यदध्वनि य एव स्थितः स एव वर्तमानाध्वनि पतित्वाऽतीतेऽध्वनि पुनः पतति। यद्यपि चैते त्रयः शक्तिविशेषाः (भूतभविष्यद्वर्तमानाख्याः) कालात्मन्यक्रमा एवावस्थिताः, तथापि तमःप्रकाशरूपत्वादाधेयेषु भावेषु वर्तयन्तो यथायथं दर्शनादर्शनाभ्यां सदसद्रूपोपकल्पनया पौर्वापर्यं विदधति। तद्यथा सत्त्वरजस्तमोलक्षणगुणा नित्यत्वाद्युगपदवस्थाना अपि अङ्गाङ्गिभावोपगमनेन यथायथं स्ववृत्त्युल्लासे विचित्रपरिणामाद्भावानुपरचयन्ति तथेमे कालभेदाः स्वशक्तिमाहात्म्याद् भावभेदेषु क्रमोपरचनचतुरा इत्यर्थः।[60] न केवलमेतावदपि तु कालः स्वशक्तिभिः प्रकृत्यासह समन्वितः सन् तस्याः विभिन्नेषु कार्येषु भावेषु भिद्यमानः आक्रीड इव परिलक्ष्यते यथा वाक्यपदीयकारः लिखति –

**"आक्रीड इव कालस्य दृश्यते यः स्वशक्तिभिः।**

**बहुरूपस्य भावेषु बहुधा तेन भिद्यते।।"**[61]

अर्थादेकस्यापि कालस्य स्वशक्तिभिर्बहुरूपस्य यो भावेषु बहुधा आक्रीड इव दृश्यते तेनोपाधिभूतेन कालो भिद्यते। यथा वासन्तीविकासेन वसन्तकालः कुन्दप्रसवेन माघमासः, हंसागतिरवाभ्यां शरत्कालः, मयूरनृत्येन केकया च मधुरया वर्षाकालः, सूर्यगतिविशेषैरयनभेदः[62] इत्यादिसर्वापि प्रकृतिगतऋत्वादीनामावर्तनरूपा क्रियाकालस्यैव आक्रीडनशक्तिर्विद्यत इति भावः। जगति सर्वे प्राणिनः कालरूपाक्रीडे उद्याने परिभ्रमन्तः स्वस्वकर्मसु प्रवृत्ताः ततश्च निवृत्ता भवन्तः

परिलक्ष्यन्ते। स च कालः स्वमहिम्ना शक्त्या च भूतभविष्यद्वर्तमानत्वादिभेदवैचित्र्यपूर्णस्वाजस्रसामर्थ्येन सर्वान् कर्मणे प्रेरयति, कर्मसु योजयति सर्वं संसारचक्रञ्च चालयतीति भावः।

तदेवं कालस्य नित्यत्वं सर्वविधलोकव्यवहारानिवार्यत्वं शास्त्रोपयोगित्वं भूतभविष्यद्वर्तमानत्वरूपेण सर्व- क्रियापरिच्छेदकत्वं स्थावरजङ्गमजगद्व्यवस्थानियामकत्वमिति बहुविधंमाहात्म्यं समीक्ष्य भगवता भर्तृहरिणा सम्यगेवोक्तम्।

"**काल एव हि विश्वात्मा**[63] इति शम्"।

**सन्दर्भाः**

1. अथर्ववेदः 19/53/2
2. अथर्ववेदः 19/53/7
3. अथर्ववेदः 19/53/8
4. अथर्ववेदः 19/54/1
5. अष्टाध्यायी 1/2/57
6. अष्टाध्यायी 1/2/53
7. काशिका1/2/57
8. अष्टाध्यायी 2/2/5
9. महाभाष्यम् 2/2/5
10. तत्रैव प्रदीपः।
11. तत्रैवोद्योतः।
12. तपरस्तत्कालस्य (1/1/69) इति सूत्र भाष्ये।
13. तत्रैव प्रदीपः।
14. तत्रैवोद्योतः।
15. तत्रैव भाष्यम्।
16. तत्रैव प्रदीपः।

17. ऊकालोझ्रस्वदीर्घप्लुतः (1/2/27) इति सूत्रभाष्ये।
18. वाक्यपदीयम् कालसमुद्देशः कारिका – 1
19. तत्रैव प्रकाशव्याख्या।
20. वाक्यपदीयम् कालसमुद्देशः कारिका – 2
21. तत्रैव अम्बाकर्त्री।
22. भूवादयो धातवः (1/3/1) इति सूत्रभाष्ये।
23. वाक्यपदीयम् कालसमुद्देशः कारिका – 3
24. तत्रैव प्रकाशाम्बाकर्त्रीव्याख्याद्वयम्।
25. वाक्यपदीयम् ब्रह्मकाण्डम् कारिका – 3
26. तत्रैव अम्बाकर्त्री।
27. तत्रैव स्वोपज्ञवृत्तिः।
28. वाक्यपदीयम् कालसमुद्देशः कारिका – 62 (प्रकाशव्याख्या)
29. वाक्यपदीयम् जातिसमुद्देशः कारिका – 37
30. तत्रैव हेलाराजः।
31. वाक्यपदीयम् कालसमुद्देशः कारिका – 12
32. तत्रैव अम्बाकर्त्री।
33. वाक्यपदीयम् कालसमुद्देशः कारिका – 14
34. तत्रैव प्रकाशव्याख्या।
35. वाक्यपदीयम् कालसमुद्देशः कारिका – 4
36. तत्रैव प्रकाशाम्बाकर्त्री व्याख्याद्वयम्।
37. वाक्यपदीयम् कालसमुद्देशः कारिका – 30
38. तत्रैव प्रकाशव्याख्या।
39. अष्टाध्यायी 3/2/84
40. अष्टाध्यायी 3/2/123
41. अष्टाध्यायी 3/3/3

42. भूते इति सूत्रभाष्ये ।
43. तत्रैवोद्योतः।
44. वर्तमाने लट् इति सूत्रे वार्तिकम् ।
45. तत्रैव भाष्यम् ।
46. वाक्यपदीयम् कालसमुद्देशः कारिका – 76
47. तत्रैव प्रकाशव्याख्या ।
48. वाक्यपदीयम् कालसमुद्देशः कारिका – 77
49. तत्रैव अम्बाकर्त्री ।
50. तत्रैव प्रकाशव्याख्या ।
51. वाक्यपदीयम् कालसमुद्देशः कारिका – 37
52. तत्रैव प्रकाशव्याख्या ।
53. वाक्यपदीयम् कालसमुद्देशः कारिका – 38
54. तत्रैव प्रकाशाम्बाकर्त्रीव्याख्याद्वयम् ।
55. वाक्यपदीयम् कालसमुद्देशः कारिका – 48
56. तत्रैव प्रकाशव्याख्या ।
57. वाक्यपदीयम् कालसमुद्देशः कारिका – 49
58. तत्रैव प्रकाशव्याख्या ।
59. वाक्यपदीयम् कालसमुद्देशः कारिका – 52
60. तत्रैव हेलाराजः ।
61. वाक्यपदीयम् कालसमुद्देशः कारिका – 72
62. तत्रैव अम्बाकर्त्री ।
63. वाक्यपदीयम् कालसमुद्देशः कारिका – 12

***

# पाणिनीयपद्धत्या ए बी सी डी – इत्यादीनां सिद्धिः

**प्रो. बोधकुमारझाः**

व्याकरणविभागः

राष्ट्रियसंस्कृतसंस्थानम्,

क जे. सोमैयासंस्कृतविद्यापीठम्,

विद्याविहारः, मुम्बई।

शब्दशास्त्रे शाब्दिकैः मतद्वयं सम्पोष्यते। व्युत्पन्नत्वं व्युत्पन्नाऽव्युत्पन्नत्वञ्च। तत्र यदि सर्वे व्युत्पन्नाः प्रत्ययः शाब्दार्थश्च नूनं भवेत्। एतन्मते शब्दानां , तर्हि सर्वत्र प्रकृतिः , का वार्त्ता , वर्णत्वेन प्रसिद्धोऽपि स्वतन्त्रशब्दत्वेन शक्यते भवितुम्। अतो हि एकाक्षरको शस्य प्रासङ्गिकता सङ्गच्छते। अत एव च माहेश्वरसूत्राणां दार्शनिकं विवेचनं प्रस्तूयते। यथा नन्दकेश्वरकृतकाशिकायाम् अ इ उ ण् इत्यादीनां अः –= परमेश्वरो निर्गुणः इः ,=मायामाश्रित्य उः ,=व्यापकः सगुणो ण् , =आसीदित्यादिरूपेण व्याख्यानं संस्तुतम्। भाषावैज्ञानिकैः भाषाणाम् अनेके परिवाराः प्रकल्पिताः। अनेकासु भाषासु वर्णध्वनिसाम्यं शब्दसाम्यञ्च दृष्टिगोचरं भवति। तदनुरोधेन संस्कृतभाषा भाषाणां जननीत्वेन प्रसिद्धा। अस्यां व्युत्पत्तेः नित्यनूतनप्रसूतेश्च महान् अवकाशो राज्यते। पाणिनिव्याकरणं त्वस्या अपूर्वमेव। एतेन बद्धपरिकरैः विद्वद्भिः संसारस्य बहूनां भाषाशब्दानां सिद्धिः क र्तुं शक्यते। तत्र आङ्ग्लशब्दाः संस्कृतशब्दाश्च बहुत्र तुल्यतां भजन्तीति विदितं भाषाविदाम्। एतत्सर्वंहृदि निधाय पाणिनिपद्धत्या आङ्ग्लाक्षराणां व्युत्पत्तिः प्रदर्श्यते छा , या खलु विद्वन्मनोविनोदाय ,त्राणां व्युत्पत्तिलाभाय, च पाणिनीयव्याकरणस्य अनितरसाधारण्यप्रतिपादनाय कल्प्यते।

<u>**एः**</u> -'इण् गतौ' धातोः विच् 'अन्येभ्योपि दृश्यन्ते' वा इण् विच् .= एः। ये गत्यर्थास्ते प्राप्त्यर्था इति वचनात् एति प्राप्नोति सर्वं विश्वमिति एः। अर्थाद्विष्णुः। सर्वं विष्णुमयं जगत् इति – – वाक्यादस्य तथात्वम्। उक्तञ्च

**एकारं परमं दिव्यं ब्रह्मविष्णुशिवात्मकम्।**

**रञ्जिनीकुसुमप्रख्यं पञ्चदेवमयं सदा।। (कामधेनुतन्त्रम्)**

**बीः** -'वी गतौ' धातोः न्यङ्क्वादित्वात् भावे क्विपि। वी क्विप् += वीः। वयनं वीः अर्थाद् गमनम् इत्येकाक्षरकोशः अभिधानात्पुंस्त्वम्। वी = बी इत्य नयोर्मध्ये प्रयत्नसाम्यम् उच्चारणस्थानसामञ्च।

**सीः-**'षिञ् बन्धने' धातोः बाहुलकात् डिः षिञ् डिः ,= सिः। सिनोतीति सिः अर्थात् बन्धनकर्त्ता। अथवा सिश्चासौ इः इति सीः अर्थात् बन्धनकर्त्री माया।

**डीः-**'डीङ् विहायसा गतौ' धातोः क्विपि। डीङ् क्विप् += डीः। डीयते डयते वेति डीः पक्षी।

**ईः-**'अव् रक्षणे' धातोः उप्रत्यये सति अः अर्थाद् विष्णुः निष्पद्यते तस्य (डीपि)पत्नी ई अर्थात् 'ई' लक्ष्मीः इति विश्वमेदिन्यौ। तथा च अवतीति अःअस्य पत्नी ई इति। ,

**एफ्** –'आप्लृ व्याप्तौ' धातोः असुन् प्रत्यये सति पृषोदरादित्वाद् ह्रस्वे च कृते अपः इति निषपद्यते। अपः अ र्थाद् यज्ञकर्म इत्युणादिकोशः। तथा च आप्नोतीति अपः। एतीति एः विष्णुः। तस्य उभयोः) अपः एपः। एप एव एफः (विष्णोः) केवलं महाप्राणाल्पप्राणप्रयुक्तो भेदः । तथा च( इति एफम् अर्था , एः विष्णोः फं फूत्कृतिः तत्पुरुषः , एफः अर्थाद् विष्णुयज्ञः।अथवाद् विष्णुशंखफूत्करणम्। फम्.क्ली ,। 'फक्क असद्व्यवहारे इति धातोः ड प्रत्यये सति फं साध्यते। फम् अर्थात् रुक्षोक्तिःनिष्फलभाषणम् इति मेदिनी। ,फूत्कृतिः ,

**जीः-**'जि जये' धातोः बाहुलकात् डिः प्रत्ययः। जि +ड=जिः। अर्थात् जेता जयतीति व्युत्पत्तेः। जिः अर्थात् पिशाचः इत्येकाक्षरकोशः। जिश्चासौ ई इति जी जेत्री लक्ष्मीः।

**एच्-**'एजृ कम्पने' धातोः क्विपि।। एजृक्विप्+=एच्। एजति वायुना इति एच्। एच् वृक्षः।

**आइः-** अस्य विष्णोः श्रीकृष्णस्यापत्यं पुमान् इः कामदेवः। अ इञ् = इः कन्दर्पः इति पुरुषोत्तमहलायुधौ। आ समन्तात् इः इति आइः नि )पात एकाजनाङ् इत्यनेन प्रगृह्यसञ्ज्ञा , अर्थात् कन्दर्पपर्यन्तम्।(प्रकृतिभावश्च

**जेः-** जयतीति जेः अर्थात् जेता। जि विच् += जेः।

**केः-**'कि ज्ञाने' धातोः विच्प्रत्यये कृते केः इति परिनिरष्ठितो भवति। चिकेतीति केः अर्थात् ज्ञाता। अथवा 'कै शब्दे' इति धातोः उप्रत्ययेन कः इति जायते। (10-2-3 .वा .अन्येभ्योपि) यस्यार्थो ब्रह्म भवति। तस्य इः शक्तिः माया इति केः।

**एल्-**'इल् प्रेरणे' धातोः पचाद्यच्। इल अच् += एलः अर्थात्प्रेरकः अथवा एलति विग्रहादिस्थले आत्मानं क्षिपतीति एलः अर्थात् मेषः इति राजनिघण्टुः।

**एम् –**'अम् भजने' धातोः सत्यच् प्रत्यये अमः इति प्रक्रियते। अम् अच् (भजनकर्त्ता)= अमः। एः विष्णुः। एः विष्णोः अमः इति एमः अर्थाद् भगवद्भजनकर्त्ता। (तत्पुरुषः.ष )

**एनः** । एति गच्छति प्रा(.क्ली) एनः -यश्चित्तेन इत्येनः। अण् आगसीत्यसुन् नुडागमश्च। इण् असुन्+= एनः। एनः अर्थात् पापम् अपराधः इति मेदिनी। निन्दाप्यर्थः –

**एनो निवृत्तेन्द्रियवृत्तिरेनम्,**

**जगाद भूयो जगदेकनाथः23-5 इति रघुः -**

अथवा एतीति एणः अर्थात् कुरङ्गः। बाहुलकाण्णः।

**ओः-**'ऊङ् शब्दे' =भ्वा । तस्माद्विचि ओः। अवते इति व्युत्पत्तेः.'ओः' अर्थात् ब्रह्म इत्येकाक्षरकोशः।

**पी** -पीयते इति पीः। 'पीङ् पाने' धातुः क्विप् प्रत्ययश्च।

**क्यूः-** चिकेतीति किः अर्थात् ज्ञाता । अतति सर्वं व्याप्नोति(बाहुलकात् ,डि + कि) विश्वमयत्वात् इति उः शिवः अत् डु। किश्च उश्च इति क्यू इतरेतरयोगः अर्थात् ज्ञाता शिवश्च। वा ज्ञाता ज्ञेयश्च।

**आरः-** आरं । आङ्(क्लीबम्)'ऋ भावे'घञ् मुण्डायसम् पित्तलं वेति कोशः अथवा आरः , आ (.पुं)ङ्क+ऋ+र्त्तरि सञ्ज्ञायां घञ्इति हेमचन्द्रः। – पित्तलम् ,मङ्गलग्रहः। शनिः ,

**एसः-** इष्यते गम्यते इति एषः। 'इष् गतौ' धातुः। इषु इच्छायाम् धातुर्वा। तथा च गमनम् इच्छा वार्थो भवति। इष घञ् += एषः।

**टीः-** टलतीति टः पुं तस्य स्त्री ,डः अर्थात् वामनः + टल् .टी। वा तरतीति तीः सम्पादिभ्यः) । तीः एव आङ्ग्लैः टीत्यनेनोच्चार्य्यते। तथा च टीः अर्थात् तरणकर्त्ता।(क्विप्

**यूः-** यौतीति यूः स्त्री – . अप्राणिजातेश्चारज्वादीनामुपसङ्ख्यानम् इति वार्त्तिकेन ऊङ्। यु ऊङ् =यूः। अर्थात् यूपः इति हेमचन्द्रः।

**वीः-** भीः स्त्री वी .(29-7-1) अर्थाद् भयम्इत्यमरः ( भीत्याम् सम्पदादित्वात् क्विप्– भी ) . इत्युच्चारणे सति वीवत् सिद्धिः बोध्या।

**डब्लूः-** डभ संघे। डम्भयते राशीक्रियते इति डब्। लुनातीतिलूः। डभो लूः डब्लूः अर्थाद् (.चूरा) राशीकरणस्यलावकः राशि)विखण्णडकः।(

**एक्सः-** क्षयति लोकान् युगान्तकाले प्रलये सर्वाणि भूतानि महाकालोदरं प्रेरयतीति 'क्षः' क्षि क्षये) +डप्रत्ययः संवर्त्तः। एः क्षः एक्षः। एक्ष एव एक्सः अर्थाद् विष्णोर्विनाशकारियत्नः। (

**वाय्-** वायते अनेन इति वायः अर्थात् तन्तुवाययन्त्रम्। वेञ् तन्तुसन्ताने घञ् += वायः।

**जेड्** –जेषते इति जेट् जेड् वा। अर्थात् गन्ता। जेष् गत्यां क्विप् = जेड्।।

अनुकरणम् अनुकार्यादभिन्नमिति शाब्दिकसिद्धान्तसख्या तत्र तत्र वृत्त्योपस्थितस्य अर्थवत्त्वस्य अभावात् न सुबुत्पत्तिरिति उक्तेषु स्थलेषु प्राप्तव्यविभक्तीनामभावे कारणं बोध्यम्। अत एव भू सत्तायामिति पाणिनिनिर्देशोऽविभक्तिक इति पण्डितरूपेणानुशोचनीयम्।

***

# समासस्य तत्त्वबोधिनीलघुशब्देन्दुशेखरयोः तुलनात्मको विमर्शः

डा. सुभाष मीणा
सहायकाचार्यः (व्याकरणविभागः)

**विभक्तिर्लुप्यते यत्र तदर्थस्तु प्रतीयते।**
**पदानां चैकपद्यं च समासः सोऽऽभिधीयते॥**

प्रत्येकं शास्त्रं समासेनोपकृतमित्यत्र नास्ति कश्चन विसंवादः। सम्पूर्वकाद् अस् (असु क्षेपणे) धातोः 'भावे' इत्यनेन घञ् प्रत्यये, अनुबन्धलोपे सम् + अस् + अ इति जाते, ञित्वात्'अत उपधायाः' इति सूत्रेण उपधावृद्धो जातायाम। सम + आस् + अ इति जाते वर्णसम्मेलने, स्वादिकार्ये 'समासः' इति सिद्ध्यति।

समासलक्षणं तद्भेदाश्च –

"समसनं समासः" एकपदीभवनं वा समासः

"अनेकपदानां समाहारः समासः कथ्यते"

यथा – राधायाः पतिः= राधापति

समासभेदाः – पञ्चविधसमासस्य संक्षिप्तविवरणमस्मिन् श्लोके प्राप्यते।

**द्वन्द्वो द्विगुरपि चाहं मद्गेहे नित्यमव्ययीभावः**
**तत्पुरुष कर्मधारय्य येनाऽहं स्यां बहुव्रीहिः।**
**चकारबहुलो द्वन्द्वः स चासौ कर्मधारयः**
**यस्य येषां बहुव्रीहिः शेषस्तत्पुरुषो मतः॥**

केचित्– सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा
सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः।

समासभेदाः वैयाकरणसिद्धान्तकौमुदीबालमनोरमा-तत्त्वबोधिनीसहिताद्वितीयभागानुसारेण –

1. अव्ययीभावः समासः, 2. तत्पुरुषसमासः, 3. बहुव्रीहि समासः, 4. द्वन्द्वसमासः, 5. एकशेषसमासः, 6. सर्वसमासशेषसमासः, 7. अलुक्समासः

1. अव्ययीभावसमासलक्षणम्

यत्र प्रायेण पूर्वपदस्य अर्थः प्रधानः सः अव्ययीभावः अर्थात् पूर्वपदस्य अर्थप्राधान्ये सति अव्ययीभावः इत्यर्थः। यथा हरि ङि इति अधिहरि।

- द्वयोः टीकयोः साम्यं वैषम्यं च ।
- तत्त्वबोधिनीकारस्तु व्यपेक्षालक्षणविषये –
  तत्र स्वार्थपर्यवसायिनां पदानामाकाङ्क्षादिवशाद्यः परस्परसम्बन्धः सा व्यपेक्षा सैव वाक्ये राज्ञः पुरुष इत्यादौ ।
- लघुशब्देन्दुशेखरकारस्तु –
  तत्र स्वार्थपर्यवसायिनां पदानामाङ्क्षादिवशाद्यः परस्परान्वयः तद् व्यपेक्षाभिधं सामर्थ्यम्, इदं च राज्ञः पुरुष इत्यादिवाक्य एव भवति।

2. तत्पुरुषसमासलक्षणं तद्भेदाश्च।
   प्रायेण उत्तरपदस्यार्थप्रधानः तत्पुरुषसमासः कथ्यते।
   अर्थात् उत्तरपदस्य अर्थः यदि क्रियया अन्वितो भवति तर्हि तत्पुरुषः भवति यथा – राजपुरुषः।

1. सामान्यतत्पुरुषः (कृष्णाश्रितः), 2. नञ् तत्पुरुषः (अब्राह्मणः),
2. कर्मधारयतत्पुरुषः (घनश्यामः), 4. प्रादितत्पुरुषः (प्राचार्यः),

5. गतिसमासः (अच्छगत्यः), 6. उपपदतत्पुरुषसमासः (कुम्भकारः)

(क). समानाधिकरणः कर्मधारयः तत्पुरुषः

कर्मधारयस्य भेदः द्विगुः – संख्यापूर्वो द्विगुः

यत्रा – त्रिलोकी, त्रिभुवनम् ।

(ख). व्यधिकरणतत्पुरुषविचारः –

द्वितीया-तृतीया-चतुर्थी-पंचमी-षष्ठी-सप्तमीव्यधिकरणतत्पुरुषः अनेकविधः।

उदाहरणार्थम्– कृष्णं श्रितः-

कृष्णश्रितः, हरिणात्रातः – हरित्रातः, यूपाय् दारु – यूपदारु, चोरात् भयम् – चोरभयम् ।

राज्ञः पुरुषः – राजपुरुषः, अक्षेषु शौण्डः– अक्षशौण्ड।

(ग). प्रादितत्पुरुषः– यथा प्रगतः आचार्यः प्राचार्यः।

गत्यर्थक (कुगतिप्राद्यः) यथा कुत्सितः पुरुषः कुपुरुषः।

(घ). उपपदतत्पुरुषः – उपपदतिङ्

यथा – कुम्भकारः – कुम्भंकरोति।

- द्वयो टीकयोः साम्यं वैषम्यं च ।
- तत्त्वबोधिनीकारस्तु –
  "गमेरिनिः" इत्यौणादिक इनिः स च "भविष्यति गम्यादयः" इति भविष्यत्काले।
- लघुशब्देन्दुशेखरकारस्तु –
  "गाम्यं गमीति""गमेरिनिः इति औणादिक इनि प्रत्ययः,स च भविष्यति गम्यादयः" इति वचनाद् भविष्यतिकाले भवति।

3. बहुव्रीहिलक्षणं तद्भेदाश्च –

अनेकं प्रथमान्तमन्यपदार्थे वर्तमानं वा समस्यते सः बहुव्रीहिः

अर्थात् अन्यपदार्थस्य अर्थः प्रधानः भवति । यथा – लम्बोदरः – लम्बः उदरः यस्य सः।

बहुव्रीहिभेदाः –

क. समानाधिकरणबहुव्रीहिः यथा – निर्गतं भयं यस्मात् – निर्गतभयः (पुरुषः)

ख. व्यधिकरणबहुव्रीहिः यथा – धनुः पाणौ यस्य सः धनुष्पाणि (रामः)

ग. तुल्ययोग बहुव्रीहिः यथा –"चित्रवाससम् आनय"

घ. व्यतिहारबहुव्रीहिः यथा – चित्रगुम् आनय अत्र व्यक्तिविशेषं स्वीकृतवान् ।

- द्वयोः टीकयोः साम्यं वैषम्यं च ।
- तत्त्वबोधिनीकारस्तु – कण्ठेकाल इत्यादिना बहुव्रीहिस्तु ज्ञापकसाध्य इति भावः।
- लघुशब्देन्दुशेखरकारस्तु – कण्ठेकालः इति सप्तम्यन्तपदघटितसमासगर्भो बहुव्रीहिः।

4. द्वन्द्वसमासलक्षणं तद्भेदाश्च –"चार्थे द्वन्द्वः" अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते सः द्वन्द्वः। प्रायेण उभयपदार्थ प्रधानः द्वन्द्वः।

द्वन्द्वसमासभेदाः –

क. इतरेतरद्वन्द्वसमासः – परस्परापेक्षितानां समुदितानामेकस्मिन् क्रिया पदेऽन्वयो यत्र। यथा – धवखदिरौ– धवश्च खदिरश्च इति।

ख. समाहारद्वन्द्वसमासः – अथ समाहारं लक्षयति – समूहः समाहर इति परस्परसाहित्यमित्यर्थः। यथा –"संज्ञापरिभाषम्।"

ग. एकशेषविचारः – तदेवं द्वन्द्वे निरूपिते तदपवादमेकशेषप्रकरणमारभते अथैकशेष इति। यथा – समानं रुपम् एषां इति सरूपाः। सरूपाणां शब्दानाम् एकविभक्तौ परतः एकशेषः भवति।

"पितामात्रा" (1-2-70) मात्रा सहोक्तौ पिता वा शिष्यते माता च पिता च पितरौ।

- द्वयोः टीकयोः साम्यं वैषम्यं च।
- तत्त्वबोधिनीकारस्तु – ईश्वरं गुरुं च भजस्वेति – अत्र क्रियायां द्रव्ययोः समुच्चयोऽयम्।
- लघुशब्देन्दुशेखरकारस्तु – ईश्वरं गुरुं च भजस्वेति। अत्र सम्मुच्चयोदाहरणमिदम्।

**सन्दर्भग्रन्थसूची**

1. बृहच्छन्देन्दुशेखरः – नागेशभट्टः।
2. महाभाष्यप्रदीपोद्योत् – नागेशभट्टः।
3. परमलघुमञ्जूषा – नागेशभट्टः।
4. अष्टाध्यायी – पाणिनि।
5. महाभाष्यम् – पतञ्जलिः।
6. वाक्यपदीयम् – भर्तृहरिः।
7. काशिकाव्याख्या (पदमञ्जरी) – हरदत्तः।
8. सिद्धान्तकौमुदी – भट्टोजिदीक्षितः।
9. शब्दकौस्तुभः -भट्टोजिदीक्षितः।
10. लघुशब्देन्दुशेखर व्याख्या (ज्योत्स्ना) – उदयशंकर पाठकः।
11. तत्त्वबोधिनी – ज्ञानेन्द्रसरस्वती।

# व्याकरणनये सम्बन्धनिरूपणम्

डॉ. माधवदत्तपाण्डेयः

द्वयोः पदार्थयोः योजना येन क्रियते, अथ च द्वयोः पदार्थयोः यस्तिष्ठति स लोके सम्बन्धः इत्युच्यते। "षष्ठी स्थानेयोगा" इति सूत्रे महाभाष्यकृता प्रोक्ताचतुर्विधाः सम्बन्धा अपि स्मृतिपथमानीताः – स्रौवाः यौनाः आर्थाः मौखाश्चेति। [1] इमे च साक्षात् परम्पराभेदेन पुनर्द्विधा भवितुमर्हति।

यस्मादधिकं यस्यचेश्वरवचनं तत्र सप्तमी इति सूत्रे भाष्ये तत्रत्यप्रदीपे उद्योते च – परस्परप्रतियोगिकस्य इति कथनेन सम्बन्धिभिन्नत्वम्, परस्परनिष्ठस्योभयगतस्य च इत्युक्तिभ्यां तदीयं द्विष्ठत्वं स्फुटं लक्ष्यते।[2]

अत्रश्री हरिः –

**द्विष्ठोऽप्यसौ परार्थत्वाद् गुणेषु व्यतिरिच्यते।**
**तत्राभिधीयमानश्च प्रधानेप्युपयुज्यते॥**[3]

अनेन श्लोकेन द्विष्ठत्वमुक्तमेव। सम्बन्धिभिन्नत्वं तु आर्थिकं बोध्यम्। यतोहि यत्र यस्तिष्ठति, स ततो ऽतिरिच्यत एव, आश्रयाश्रितयोर्भेदस्य नियमनात्। वैयाकरणभूषणसारकृतापि सम्बन्धलक्षणे – उक्तविशेषणद्वयं सुष्ठु समर्थ्यते। तथा हि – सम्बन्धस्योभयनिरूपितत्वात्पदार्थस्येव तद्बोधकत्वेन स्वस्यापि ज्ञानसम्भवाच्चेति भूषणसारग्रन्थः। तत्र प्रभाटीकायामुक्तं सम्बन्धस्योभयनिरूप्यत्वादित्यस्य शब्दार्थोभयनिष्ठत्वादित्यर्थः। एवञ्च सम्बन्धस्य द्विष्ठत्वं प्रत्यक्षत उक्तमेव। (वै. भू. सा. प्र. दी. टी. नामार्थानि. पृ. 258)

शाब्दिकमूर्धन्यः श्रीनागोजिभट्टोऽपि वैयाकरणसिद्धान्तलघुमञ्जूषायां सम्बन्धो हि सम्बन्धिभ्यां भिन्न उभयसम्बन्धी इति। [4] तेन पूर्णसम्बन्धलक्षणं समर्थितम् अतः इत्यत्र विभक्त्यवाच्यतया सम्भावितसम्बन्धविशेषाणां विमर्शः करिष्यते। तत्र पूर्वं ज्ञाप्यज्ञापकभावसम्भन्धो निरूप्यते।

**ज्ञाप्यज्ञापकभावसम्बन्धनिरूपणम्** –

अयञ्च सम्बन्धः पदपदार्थोभयवृत्तिः भेदव्याप्यो वृत्तित्वानियामकः साक्षात्सम्बन्धे परिगणितश्च। "तुमुन् ण्वुलौ "[5] इति सूत्रे भाष्यकृता अयं स्फुटं सूचितः। तथाहि – ण्वुलः

क्रियार्थोपपदस्य पुनर्विधानं क्रियते। किमर्थम् ? ज्ञापकार्थम् किं ज्ञाप्यम् ? एतज्ज्ञापयति आचार्यः क्रियायामुपपदे क्रियार्थायां वासरूपेण तृजादयो नभवन्ति इति। 'ण्वुलपि तृजादि' इति।[6]अत्र ण्वुलः पुनर्विधानं ज्ञाप्यकम्, क्रियार्थः क्रियोपपदे सति तृजाद्यभावो ज्ञाप्यः इति द्वयोर्ज्ञा ऽप्यज्ञापकभावः सम्बन्धः।एवमेव युस्मदस्मभ्यां ङसोऽश् इति सूत्रेऽपि अशः शित्करणस्य ज्ञापकता।
किञ्च –

**सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः।**
**एकदेशविकारे हि नित्यत्वं नोपपद्यते ।।**

वचनस्य ज्ञाप्यता उक्ता महाभाष्ये। [7] तत्रापि अनयोर्द्वयोःशित्करणोक्तपरिभाषयोः ज्ञाप्यज्ञापकभावसम्बन्धः सूचितः। एवमेव बहुत्र सम्बन्धोऽयं संकेतितः।[8]

1. म. भा. पा. सू. 1/1/49
2. म. मा. प्र. उ. 2/3/9
3. वा. प. 3/7/157
4. वै. सि. ल. म. सुब. प्र. पृ. 1313
5. पा. सू. 3/3/10
6. म. भा. 3/3/10
7. म. मा. 7/1/27
8. तत्रैव प्र. उ. 6/1/105, का. पद न्या. 6/1/113

**ज्ञाप्यज्ञापकभावसम्बन्धभेदविमर्शः –**

दैशिककालिकभेदाभ्यामयं सम्बन्धो द्वैविध्यं भजते। तत्र दैशिकस्योदाहरणम् –"सति गुणे द्रव्यत्वमस्ति" इति। अत्र द्रव्यत्वकर्तृकसत्ता ज्ञाप्या गुणकर्तृकसत्ताक्रिया ज्ञापिका। एवञ्च गुणकर्तृकसत्तानिष्ठज्ञापकतानिरुपितज्ञाप्यतावती द्रव्यत्वकर्तृका सता इति बोधः। द्रव्यरूपो देशो द्वयोराधारः। द्रव्यत्वं कुत्रास्ति इति जिज्ञासायां यत्र गुणः अस्ति इत्युत्तरम्।

**कालिकस्योदाहरणम् –**

"गोषु दुह्यमानासु गतो देवदत्तः "[1] इति। अत्र देवदत्तकर्तृकगमनक्रिया ज्ञाप्या, गोकर्मकदोहनक्रिया ज्ञापिका। देवदत्तः कदा गतः इति गमनाधिकरणकालजिज्ञासायां यदा (यास्मिन्

काले) गावो दुहयन्तेइति ज्ञाप्यज्ञापकयोः कालाधारतया कालिको ऽयं ज्ञाप्यज्ञाप्यभाव उच्यते। अयं लक्ष्यलक्षणभावपदेनाप्युच्यते "यस्य च भावेन भावलक्ष णम्"[2] इति सूत्रे। अयं सम्बन्धः सप्तमीविभक्तेः वाच्यतया प्रसिद्धः। सप्तम्यर्थरूपो ऽयं सम्बन्धः पूर्वस्मात् ज्ञाप्यज्ञापकभावसम्बन्धाद् विलक्षण एव। स तु वैयर्थ्यमूलकः, अयन्तु स्वाभाविको जिज्ञासामूलकः।

**लक्ष्यलक्षणभावसम्बन्धनिरुपणम् –**

अयञ्चसम्बन्धः "अनुर्लक्षणे"[3] लक्षणेत्थंभूताख्यानं [4] यस्य च भावेन भावलक्षणम् इत्यादिसूत्रेषु समर्थितो भगवता सूत्रकृता व्याख्यातश्च तथैव महर्षिणा पतञ्जलिनापि। तथाहि "लक्षणं हि नाम तद्भवति येन पुनः पुनर्लक्ष्यते" इति। अत्र लक्षणलक्षणमुक्तम्।[5]

शाकल्येन सुकृतां संहितामनुनिशम्य देवः "प्रावर्षद्"[6] अत्र वाक्ये हि देवकर्तृकं वर्षणंलक्ष्यम्, संहिताकर्मकं श्रवणं लक्षणमिति द्वयोर्लक्ष्यलक्षणभावः सम्बन्धो द्रष्टव्यः। ज्ञानजन्यज्ञानविषयत्वं लक्ष्यत्वम्, ज्ञानजनकज्ञानविषयत्वं लक्षणत्वम्। अनुरुपसर्गोऽस्य सम्बन्धस्य प्रकृते द्योतकः।

अयञ्चापि सम्बन्धः पदपदार्थोभयवत्तिः वृत्तित्वानियामकः, भेदव्याप्यः साक्षात्त्वविशिष्टश्च। बहुत्र व्याकरणदर्शने सम्बन्धस्यास्य उपयोगः कृतो वर्तते। [7] तत्र नहि भूयो दर्शनमेव लक्षणत्वपरिचायकमपि तु सकृद्दर्शनमपि। तदप्युक्तं भाष्ये –"सकृदेव असौ कमण्डलुपाणिश्छात्रो दृष्टस्तस्य तदेव लक्षणम्"[8] इति ।

1. वै. सि. कौ. त. बो. युता, कारक प्र. पृ. 201
2. पा. सू. 2/3/37
3. पा. सू. 1/4/84
4. पा. सू. 1/4/90
5. म. भा. 2/3/37
6. म. भा. 1/4/83
7. म. भा. प्र. 1/4/83
   म. भा. उ. 1/4/89
   म. भा. प्र. 2/2/18
   म. भा. प्र. 3/3/26

8. म. भा. 2/3/37

**प्रत्याय्यप्रत्यायकभावसम्बन्धनिरूपणम्** –

अयं सम्बन्धो "मतौ च्च सूक्तसाम्नोः" इति सूत्रे भाष्यप्रदीपद्योतेषु सङ्कीर्तितो ऽस्ति।[1] तत्र शब्दः प्रत्यायकः, अर्थविशिष्टं तदीयं रुपं प्रत्याय्यम् इति द्वयोः प्रत्याय्यप्रत्यायकभावसम्बन्धो बोध्यः। एवमेव अनुकार्यं प्रत्याय्यम्, अनुकरणश्च प्रत्यायकम् तत्रापि द्वयोस्तयोरपि अयमेव सम्बन्धः।

अयं सम्बन्धो वाच्यवाचकभावबोध्यबोधकभावशब्दाभ्यामपि वक्तुं शक्यः। अयञ्च वृत्तित्वानियामकः भेदाभेदोमयव्याप्यः पदपदार्थोमयवृत्तिसाक्षात्सम्बन्धः षष्ठ्यर्थतयापि संगृहीतः।

**उत्सर्गापवादभावसम्बन्धविमर्शः** –

अयं सम्बन्धः "दयतेर्दिगि लिटि"[2] इति सूत्रे भाष्यं व्याख्यातवता प्रदीपकृता स्पष्टमुक्तोस्ति। तथा हि अयं दोषो नोत्सर्गापवादपक्षे उपात्तो भूमावस्यावकाशदर्शनेन उत्सर्गापवादभावनिराकरणात्। द्वयोस्तु सावकाशयोः परत्वाद्द्विर्वचने कृते "बभूव" इति न सिद्ध्यति [3]इति। अनेन सन्दर्भेण द्विर्वचनस्योत्सर्गत्वम्, अस्तेर्भूभावस्यापवादत्वञ्च सूचितम्। एवञ्च द्वयोरुत्सर्गापवादभावसम्बन्धः सम्भवति।

सम्बन्धोऽयं बाध्यबाधकभावपदेनापि वक्तुं शक्यः। अयं हि वृत्तित्वानियामकः भेदव्याप्यः, पदपदार्थोभयवृत्तिः साक्षात्वविशिष्टश्च बोध्यः। बहुत्र व्यवहृतश्चायं व्याकरणग्रन्थेषु।

**बाध्यबाधकभावसम्बन्धविमर्शः** –

अयं सम्बन्धो "हयवरट्"[4] इति सूत्रे भाष्यकृता ध्वनितः प्रदीपकृता च स्पष्टं विशदीकृतः। तथाहि नेमौरहौ इति। हकारवद् रेफो ऽपि न कार्यी इत्यर्थः। तत्रैकवाक्यतायां सामान्यविशेषविध्योः लोकव्यवहारादेव शब्दार्थसम्बन्ध- परिज्ञानवत् सामान्यविधेर्विशेषविधिबाधकः। प्रत्यक्षश्च विशेषविधिः, सामान्यविधिस्त्वनुमेय इति रेफस्य कार्यित्वं निमित्तत्वेन बाध्यते [5] इति। अनया उक्त्या रेफस्य निमित्तत्वं रहाभ्यामित्यनेन साक्षाद् बोध्यते। कार्यित्वं (स्थानित्वं) तु यर् प्रत्याहारघटकतया अनुमानप्रमाणेन बोध्यते। रेफः कार्यी, यर् प्रत्याहारघटकत्वादित्यनुमानाकारः।

एवञ्च तत्वरूपा विषयता बाधिका, विशेषविहितत्वात्। कार्यित्वरूपाविषयता च बाध्या, सामान्यविहितत्वात्। एकञ्च अनेयोर्द्वयोर्बाध्यबाधकभावसम्बन्धः सम्भवति। अयमपि सम्बन्धो

वृत्तित्वानियामको भेदव्याप्यः, साक्षात्त्वविशिष्टः पदपदार्थोभयवृत्तिः, व्यवहृतश्च बहुत्र भाष्यप्रदीपादिषु।[1]

1. म. भा. प्र. उ. 5/2/59
2. पा. सू. 7/4/9
3. म. भा. 7/4/9
4. म. भा. प्र. उ. 7/4/1
   म. भा. प्र. उ. 7/4/10
   म. भा. प्र. उ. 7/4/82
   का. न्या. 5/4/39
5. माहे. सू. 5
6. म. भा. द्वि. आह्नि, माहे. सू.5
7. म. भा. प्र. उ. 1/2/2
   म. भा. प्र. 1/4/1
   म. भा. प्र. 3/1/94
   म. भा. प्र. 3/4/67

**सामान्यविशेषभावसम्बन्धविमर्शः –**

अयं सम्बन्धः "तस्मिन्निति निर्दिष्टेपूर्वस्य"[1] इति सूत्रे भाष्ये निर्दिष्टः, प्रदीपादौ पल्लवितश्च। तथा हि किं पुनरिति। "सामान्यविशेषभावस्यानवस्थानात् प्रश्नः। तत्र गौः सामान्यं, कृष्णो विशेषः इत्याद्यग्रिमेण भाष्येण सामान्यविशेषयोः नियता स्थितिर्न प्रकल्पते इत्युक्त्वा विवक्षया एव सामान्यविशेषभावो व्यवस्थापितः। परिच्छेद्यपरिच्छेदकभावात्मनाप्ययमुद्योतकृता सङ्केतितः। [2] एवञ्च "गौः कृष्णा" इत्यत्र यदि गोः सामान्येन विवक्षा, कृष्णाया विशेषतो विवक्षा, तदा अस्त्यत्र सामान्यविशेषभावः सम्बन्धः। विशेषणविशेष्यभावरूपेणाप्ययं वक्तुं शक्यः। [3] अयञ्च अभेदव्याप्यः वृत्तित्वानियामकः, पदपदार्थोभयवृत्तिः साक्षात्त्वविशिष्टश्च बहुत्र व्यवहृतो भाष्यादौ।[4]

**परिच्छेद्यपरिच्छेदकभावसम्बन्धविमर्शः –**

अयं सम्बन्धः समर्थसूत्रे भाष्ये सङ्केतितः, उद्योतकृता च स्पष्टमुक्तः। तथा हि विशेषणत्वमिति। परिच्छेदकत्वमित्यर्थः। विशेषणं विशेष्येण इति सूत्रे परिच्छेद्यपरिच्छेदकभाव एव विशेषणविशेष्यभाव इत्यभिमानः इति।

यद्यप्यत्र प्रदीपकृता परिच्छेद्यपरिच्छेदकभावरूपतया विशेषणविशेष्यभावः समादृतः, तथापि उद्योतकृता तस्य समर्थनं न क्रियते। "राजपुरुषः" इत्यादौ भेदनिबन्धनो विशेषणविशेष्यभावः "नीलोघटः" इत्यादौ तु अभेदनिबन्धनः, परिच्छेद्यपरिच्छेदकभावस्तु "द्रोणो व्रीहिः" इत्यादौ भेदस्थले एवेति उद्योतकृतां हृदयं प्रतिभाति।[5]

वस्तुतस्तु परिच्छेद्यपरिच्छेदकभावः, भेद्यभेदकभावः, विशेषणविशेष्यभावश्च समानरुपतयैव स्वीकर्तुं शक्यः शब्दभेदेपि अर्थाभेदात्। [6] अयञ्च सम्बन्धो भेदाभेदोभयव्याप्यः वृत्तित्वनियामकोऽनियामकश्च पदपदार्थोभयवृत्तिः साक्षात्त्ववांश्च मानमेयभावपरिमाणपरिमाणिभावादिपदेनापि बहुत्र व्यपदिष्टः।[7]

**अनुवर्त्यानुवर्तकभावसम्बन्धविमर्शः –**

अयं सम्बन्धो वृत्तित्वानियामकः पदपदार्थोभयवृत्तिः भेदव्याप्यः, साक्षात्त्वधर्मविशिष्टश्च। यथा "लः कर्मणि च भावे चाकर्मकेभ्यः "[8] इत्यत्रोच्यते "कर्तरिकृत्"[9] इत्यतः 'कर्तरि' इत्यनुकृष्यते। तत्र 'कर्तरि' इति अनुवर्त्य च शब्दस्तु अनुवर्तकः, अतो द्वयोः कर्तरिच शब्दयोः अनुवर्त्यानुवर्तकभावसम्बन्धः सर्वसम्मतः।

1. पा. सू. 1/1/66
2. म. भा. प्र. उ. 1/1/66
3. म. भा. प्र. उ. 1/1/1

म. भा. प्र. उ. 1/1/15

म. भा. प्र. 1/4/23

4. म. भा. माहे. सू. 5

म. भा. प्र. उ. 1/1/2

म. भा. प्र. उ. 1/1/66

5. म. भा. प्र. उ. 2/1/1
6. वै. भू. सा. धा. नि. कारि 21
7. म. भा. प्र. 2/2/5
   म. भा. प्र. उ. 4/1/3
   म. भा. प्र. 5/1
8. पा. सू. 3/4/69
9. पा. सू. 3/4/67

यदि लः कर्मणि इत्यत्र चकारो न स्यात् तदा कर्मणि इत्यंशां दृष्ट्वा कर्तरि इति नानुवर्तेत, यतो हि एषनियमः – उत्तरसूत्रे निमित्तं दृष्ट्वा पूर्वसूत्रस्य निमित्तान्तरं नानुवर्तते। प्रकृतेपि कर्मणि इथमुद्दिश्य कर्तरि न स्यात्, उद्देश्यं दृष्ट्वा उद्देश्यं नानुवर्तते इति नियमात्। अतः चकारोऽत्र सप्रयोजनः। एवञ्च अयं सम्बन्धो बहुत्र व्यवहृतो महाभाष्यादौ।[1]

**संख्यासंख्येयभावसम्बन्धनिरूपणम्** –

अयं सम्बन्धः "गवां विशतिः " इत्यत्र गोपदार्थस्य संख्येयस्य विंशतिपदार्थेन विंशतित्वसंख्यारूपेण सहस्फुटं प्रतीयते। विंशतिशब्दस्य संख्येयपरत्वे तु 'विंशतिर्गावः' इति व्यवहारे अभेदसम्बन्ध एव स्वातन्त्र्येण संवेद्यते। विंशतित्वसंख्यायास्तु धर्मिपारतन्त्र्येण संख्यासंख्येयभावः, परिच्छेद्यपरिच्छेदकभावः, परिमाणपरिमाणिभावो वा प्रतीतिपथमायाति, इत्यन्यदेतत्। यदा वृत्तिविषये संख्यामात्रवृत्तित्वं पञ्चादीनामाश्रीयते तदा परिमाणपरिमाणिभावः स्वीकरणीयः। तस्मिन्'सत्येव''पञ्चकाः''शकुनयः' इति प्रयोगे कन् प्रत्ययो विधातुं शक्यः।

सम्बन्धश्चायं 'संख्यायाः संज्ञासंघसूत्राध्ययनेषु ' इति सूत्रीयभाष्यप्रदीपे स्फुटीकृतोऽस्ति।[2]अयं हि वृत्तित्वानियामकः सम्बन्धितामात्रनियामकः, पदपदार्थोभयवृत्तिः, भेदव्याप्यः, साक्षात्त्वविशिष्टश्च महाभाष्यादौ बहुत्र सङ्कीर्तितः।[3]

**व्याप्यव्यापकभावसम्बन्धविमर्शः** –

अयं सम्बन्धः 'कालाध्वनोरत्यन्तसंयोगे' इति सूत्रे अत्यन्तसंयोगपदेन सङ्केतितः।[4] स च यद्यपि व्याप्तिरूपतया उक्तः उद्योतग्रन्थे, प्रदीपकृता ऽपि 'भासमास्ते' इत्यत्र मासमासेन व्याप्नोति इत्यर्थकरणेन व्याप्तेः धात्वर्थता दर्शिता, तथापि धातुवाच्यत्वाभावमते सम्बन्धरूपयैव मन्तव्यः।

'तमधीष्टो भृतो भूतो भावी ' इति सूत्रे ऽपि प्रदीपकृता – अध्येषणभरणफलव्यापारव्याप्यात्तु कालादीष्यते, इत्युक्तम्।[5] एवञ्च अध्येषणव्यापारस्य व्यावकत्वं, कालस्य व्याप्यत्वमिति कृत्वा द्वयोर्व्याप्यव्यापकभावसम्बन्धः स्फुटं सूचितः। तथा च तावान् कालो ऽध्येषणक्रियया व्याप्तः (अत्यन्तसंयुक्तः) इति भावः।

अयञ्च सम्बन्धो भेदव्याप्यः, पदपदार्थोभयवृत्तिः, वृत्तिताया अनियामको नियामकश्च साक्षात्त्वधर्मविशिष्टः कार्यकारणभावसम्बन्धस्य व्यापको व्याकरणग्रन्थेषु बहुत्र चर्चितो ऽस्ति।[6]

**ग्राह्यग्राहकभावसम्बन्धनिरूपणम् –**

'अस्य च्वौ '[7] इति सूत्रे अकारः अष्टादशानां सवर्णानां ग्राहकः, अणुदित्सू[8]त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वात्। एवञ्च आकारस्य अष्टादशसवर्णैः सह ग्राह्यग्राहकभावसम्बन्धः। अणुदिसूत्रञ्चास्य सम्बन्धस्योज्जीवकम्।

1. म. भा. प्र. उ. 5/1/34

का. न्या. पद 5/3/52

का. न्या. पद 8/2/16

2. म.भा.प्र. 5/1/58
3. म.भा.प्र.उ. 5/2/45 तत्रैव 5/3/49 तत्रैव 5/2/17, तत्रैव 8/1/1, का.न्या.पद 5/2/45 तत्रैव 8/1/1 इत्यादिषु।
4. म. भा.प्र.उ. 2/3/5
5. म. भा.प्र.उ. 5/1/80
6. वै.सि.ल.म.धा.नि.पृ.428-480

   ल.श.शे.का.प्र.पृ. 472
7. पा. सू. 7/4/32

8. पा. सू. 1/1/69

सम्बन्धोऽयं वृत्तित्वानियामकः भेदव्याप्यः, पदपदार्थोभयवृत्तिः, साक्षात्त्वविशिष्टश्चास्ति। बोध्यबोधकभावप्रतिपाद्यप्रतिपादकभावादिपदेनाप्ययं व्यवहर्तुं शक्यः। 'एरनेकाचोऽसंयोगपूर्वस्य'[1]'ओः सुपि'[2] इत्यादौ बहुत्र[3] व्यवहृतश्चायं सम्बन्ध इति दिक्।

**विषयविषयिभावसम्बन्धनिरूपणम्** –

चिणो लुक् इति सूत्रे तलोपस्यासिद्धत्वादिति भाष्यं व्याचक्षाणेन प्रदीपकृतोच्यते – प्रतिलक्षणं लक्षणभेदाद् अस्ति विषयविषयिभाव इति।अत्र 'चिणो लुक् ' इत्यस्य लक्षणस्य भेदाभावात् 'अकारितराम्' इत्यत्र लोपस्यासिद्धत्वाभावात् रपो ऽपि लुक् प्राप्नोति। एवं सति लक्ष्यभेदाद् वारं वारं प्रवृत्त्या प्रत्ययत्रयात्मकस्य समुदायस्य लुक्-प्रसङ्गः।तत्रोच्यते प्रतिलक्ष्यं लक्षणभेदाद् अस्ति विषयविषयिभावः इति।[4]

एवञ्च भेदनिबन्धनोविषयविषयिभावः प्रत्येकंप्रत्यये वर्तते। अतः तरपो लुकि कर्तव्ये तप्रत्ययसम्बन्धिलुकोऽसिद्धत्वात् न तरब्लुक् । अत्र प्रत्येकं लक्ष्यस्य विषयता, लक्षणस्य विषयिता बोध्या। अयञ्च सम्बन्धो विषयस्य ज्ञानेन इच्छया संस्कारेण सह सर्वत्र भवत्येव। एवं चायं वृत्तित्वानियामकः, भेदव्याप्यः उपमानोपमेयभावसम्बन्धनिरूपणम् पदपदार्थोभयवृत्तिः साक्षात्त्वविशिष्टश्चेति। अनेकत्र चर्चितश्चायं सम्बन्धः।[5]

उपमानस्योपमेयेन सह उपमानोपमेयभावसम्बन्धो व्यवस्थितः। यथा – 'आद्यन्तवदेकस्मिन्'[6] इत्यत्र आद्यन्तवदित्युपमानस्य एकस्मिन् इत्युपमेयेन सहायं सम्बन्धः। यथा मथुरावत् पाटलिपुत्रे प्राकारः इत्यत्र मथुरापदार्थः उपमानभूतः पाटलिपुत्रेण उभयेन सह अनेनैव सम्बन्धेन सम्बद्धः प्राकारपदार्थेन तु सह अनयोर्द्वयोरपि आधाराधेयभावसम्बन्धः इमौ द्वौ आधारौ, प्राकारः आधेयः। स्पष्टं चेदं सर्वं 'आद्यन्तवदेकस्मिन्' इति सूत्रे भाष्यप्रदीपयोः।[7]

वस्तुतस्तु सादृश्यमूलक एवायं सम्बन्धः समानविभक्तिकस्थले व्यवहृतो भवति। अयं च भेदव्याप्यः वृत्तित्वानियामकः, पदपदार्थोभयवृत्तिः, साक्षात्त्वविशिष्टश्च बहुत्र महाभाष्यादौ व्यवहृतः।[8]

आधाराधेयभावसम्बन्धोऽत्रैव प्रकारपदार्थेन सहविवृतः। आश्रयाश्रयिभावपदेनापि [9] स व्यपदिश्यते इति दिक्।

1. म.भा. प्र. उ. 6/4/82

2. तत्रैव 6/4/83
3. तत्रैव 6/1/101, का. न्या. 6/1/101
4. म. भा. प्र. 6/4/104
5. तत्रैव 1/4/3, तत्रैव 6/4/49
   म. भा. प्र. 6/4/104
   का. पद. 6/4/104
6. पा. सू. 1/1/21
7. म. मा. प्र. 1/1/21
8. म. भा. 2/1/54, उपमानाद्वासिद्धम्, म. भा. वा. 3/1/7, म. भा. 3/1/8, म. भा. प्र. उ. 3/1/67
9. म.भा. प्र. उ. 1/1/21
   म. भा. प्र. 2/1/1
   तत्रैव 1/3/15
   तत्रैव 4/3/42

# कर्त्तृकर्मणोः कृति

**डॉ. नवीनकुमारमिश्रः**
व्याकरणविभागः ,राष्ट्रियसंस्कृतसंस्थानम् ,
क. जे .सोमैयासंस्कृविद्यापीठम्मुम्बई। ,

इदं सूत्रं पाणिनिकृताष्टाध्याय्याः द्वितीयाध्यायस्य तृतीयपादस्य पञ्चषष्टितमत्वेन पठितम् । कर्तृ च कर्म च कर्तृकर्मणी तयोः कर्तृकर्मणोः सप्तमीद्विवचनरूपम् । षष्ठी शेषे 2/3/50 इत्यस्मात्सूत्रात् षष्ठीपदमात्रस्य अनभिहिते 2/3/1 इति सम्पूर्णसूत्रं प्रस्तुतमनुवृत्तम् । अत्र शेषे न संबध्यते, षष्ठी शेषे इत्यनेन षष्ठीविधानसामर्थ्यात् प्रकृतसूत्रवैयर्थ्यापत्तेः ।

कृद्ग्रहणेन कृदन्तपर्याप्तानुभविकशक्तिग्रहमात्रप्रयोज्यशाब्दबोधविषयक्रियानिरूपितकर्तृकर्मणोः षष्ठी इति सूत्रार्थः ।

षष्ठी शेषे इत्यनेन शास्त्रेण षष्ठीविधाने सुप्सुपा समस्यते । प्रकृतसूत्रेण षष्ठीविधाने प्रतिपदविधाना या षष्ठी सा न समस्यते (वा.) अस्माद्वार्त्तिकात् प्रतिपदविहितषष्ठ्यन्तस्य समासो निषिध्यते । उभयोः शास्त्रयोः वैषम्यात् प्रकृतशास्त्रस्य न वैयर्थ्यमिति । कृद्योगा षष्ठी समस्यते एव (वा.) इति प्रतिषिद्धसमासस्य प्रतिप्रसवेन पुनर्विधानेन प्रवृत्तवार्त्तिकेन प्रकृतसूत्रविहिता या षष्ठी सा समस्यते । अतएव प्रकृतसूत्रेशेषे इति पदस्य अन्वयो न ।

कृद्योगे कर्त्तरि कर्मणि च षष्ठी स्यात् (वा.) इति वार्त्तिकेन तत्र समासस्येष्टत्वात् । अत्र कर्त्तृसाहचर्यात् कर्मापि धात्वर्थे भेदेनान्वय्येव गृह्यते । तेन क्रियाविशेषाणानां कर्मत्वे ऽपि न ततः षष्ठी । अत्र अधीगर्थदये शां कर्मणि 2/3/52 इति सूत्रात् चतुर्थ्यर्थे बहुलं छन्दसि 2/3/62 इति पर्यन्तमनुवर्तमानस्य कर्त्तरि च कृति इति न्यस्य सन्निहितकर्मणीत्यस्यानुकर्षणसम्भवे ऽपि कर्मग्रहणं मन्थरमितिचेन्न ,सन्निहिताधिकरणस्याप्यनुकर्षणापत्तेः ।

धातोःकृत्प्रत्ययेप्रयुज्यमाने सति अनुक्तकर्तृकर्मणोरर्थे षष्ठी विधीयते इति सूत्रार्थलाभः । कर्तुरीप्सिततमं कर्म 1/4/49 इति सूत्रेण कर्मसञ्ज्ञा विहिता । हरिं भजतीत्यत्र कर्मणि द्वितीया 2/3/2 इत्यनेन द्वितीयासिद्धिः कर्मसञ्ज्ञायाः प्रयोजनम् , एवं स्वतन्त्रः कर्त्ता 1/4/54 इति शास्त्रेण

कर्तृसञ्ज्ञा विहिता। कर्तृकरणयोस्तृतीया 2/3/18 इति शास्त्रेण तृतीयाविभक्तिःविहिताकर्तृसञ्ज्ञायाः प्रयोजनम् ।यथा रामेण हन्यते । अनयारीत्या कर्मणि प्राप्तां द्वितीयां कर्त्तरि प्राप्तां तृतीयां प्रबाध्य कर्तृकर्मणोः कृति2/3/65 इति सूत्रेण षष्ठीविभक्तिः विधीयते। यथा कृष्णस्य कालिदासस्य वा कृतिः-कृष्णकर्त्तृका सृष्टिः, पुरां भे त्ता ,भवतः शायिका ,अपां स्रष्टा, ग्रन्थस्य प्रणेता ,जगतः कर्त्ता कृष्णः, गामस्य ग्राममजां नयति,नेता अश्वस्य स्रुघ्नं स्रुघ्नस्य वा। इत्यादीन्युदाहरणानि। कृष्णस्य कालिदासस्य वा कृतिः इत्यत्र कर्तृषष्ठ्या उदाहरणम्भावे क्तिन्प्रत्ययः।करणं कृतिरित्यत्र उत्पत्त्यनुकूलव्या-पारःकृञ्धात्वर्थः। तादृशव्यापारस्य जनकः कृष्णः कर्त्ता। तद्वाचकात् षष्ठी। कृष्णपदस्य अनुक्तकर्त्तरि कृष्णप्रातिपदिकात् कृद्योगे षष्ठीविभक्तिः। उक्ते तु प्रथमैव।

जगतः कर्त्ता कृष्णःजगत्कर्मकसृष्ट्यनुकुलव्यापारवान्कृष्णःइत्यत्र कर्मणः उदाहरणमत्र कर्तृपदे कृधातोः तृच्प्रत्ययेन कृष्णरूपकर्तुरभिधानेनतृजा कर्तुरुक्तत्वात् कृष्णात्प्रथमैव।कृञ्धात्वर्थव्यापार-जन्योत्पत्तिरूपफलाश्रयत्वेन जगतः अनुक्तकर्मत्वात् जगत्पदात् षष्ठी। अत्र कृञ्धातोर्यत्न-वाचकत्वं नास्ति।

अनभिहिते इति पदप्रयोजनदर्शकम् - कृद्योगे सति अनुक्तकर्तृकर्मणोरेव षष्ठीविभक्तिः स्यात्। वनास्तव्योऽहमत्राऽहमिति पदेन कर्त्रुक्तत्वात् कृज्जन्यतव्यत् सत्वे ऽपि (कृद्योगेऽपि) न षष्ठी किन्तु प्रथमैव।

कर्तृकर्मणोरिति पदप्रयोजनदर्शकम् –शस्त्रेण भेत्ता। प्रकृतसूत्रे कर्तृकर्मणोः पदाभावे करणाद्यर्थेष्वपि षष्ठीप्राप्तिः तद्वारणाय सूत्रे कर्तृकर्मणोरिति पदं न्यस्तम्।

गुणकर्मणि वेष्यते (वा.) द्विकर्मकधातुयोगे ऽप्रधानकर्मसंज्ञकात् गौणकर्मणि कृद्योगे षष्ठी वेष्यते। पक्षे द्वितीया च। यथा नेता ऽश्वस्य स्रुघ्नस्य स्रुघ्नं वा। अत्र अश्वस्य प्रधानकर्मत्वम्। गोपालकः गोःगाम् वा नयति। अत्र अश्वस्य प्रधानकर्मत्वम् कर्तुरीप्सि ततमं कर्म 1/4/49 इति सूत्रेण कर्मसञ्ज्ञा विहिता। अकथितञ्चेति कर्मत्वं स्रुघ्नस्य अप्रधानकर्मत्त्वम्।

देवदत्तः ओदनं पचतीत्यत्र **न लोकाव्ययनिष्ठाखलर्थतृनाम्** पा.सू.2.3.69 इति लादेशयोगे षष्ठीनिषेधः,तर्हि तिङ्व्यावृ त्यर्थं कृन्नेष्यते। शतेन क्रीतः शत्यो ऽश्व इत्यादौ तु तद्धितान्तादेवाश्वादेः षष्ठीविभक्तिः निषिद्धा। देवदत्तं हिरुक् इति वाक्ये **न**

**लोकाव्ययनिष्ठाखलर्थतृनाम्** पा.सू.2.3.69 षष्ठीनिषेधात्। हिरुगाद्यव्ययबोध्यवर्जनादिक्रियां प्रति देवदत्तपदे कर्मत्वादनेन षष्ठीविरहः। शेषत्वविवक्षायां तु षष्ठी इष्यते सा च कृद्योगमात्रम्।
ननु स्तोकं पाक इत्यत्र पच्धातोः भावे घञ्प्रत्ययः अनुक्तकर्मणि स्तोकक्रियाविशेषण - प्रातिपदिकात् षष्ठी प्राप्ता तां वारणाय धात्वर्थे भेदसम्बन्धेनान्वयिकर्तृवाचकपदात् षष्ठी,तत्साहचर्यात्धात्वर्थे भेदसम्बन्धेनान्वयिकर्मवाचकपदात् षष्ठी स्यात्। स्तोकं पाक इत्यत्र स्तोकादिपदार्थस्य धात्वर्थः फले अभेदेन अन्वयात् क्रियाविशेषणवाचकपाकपदात् न षष्ठी किन्तु प्रथमैव।

ननु स्तोकं पाचकः इत्यादौ क्रियाविशेषणेन पचति समानाधिकरणसमासः,सुप्सपेति वा समासः कुतो नेति चेन्न, सुबन्तार्थ विशेषणेनानन्वयात्। **द्वितीयाश्रितातीत0**—इत्यत्र तु द्वितीयाविभक्तिप्रकृत्यर्थस्य कृत्प्रत्ययक्तार्थ विशेषणीभूतधात्वर्थक्रियान्वयेऽपि अवयवद्वारा सामर्थ्यमादाय समासो भवत्येव।

क्रिया विशेषणस्तोकदारुणादिभ्यो न षष्ठी कर्तृकर्मणोः इति। नापि समासः। अत एव दारुणम् अध्यापकः इत्यत्र दारुणाध्यापकः इति सिद्ध्यर्थं **मलोपवचनम्** (वा.) इति वार्त्तिकमारब्धम्। अन्यथा कर्तृकर्मणोः इति षष्ठ्या तृजकाभ्यां कर्त्तरि इति निषेधसामर्थ्यादवयवद्वारा सामर्थ्ये ऽपि प्रवृत्त्या,तत्समासेनैव सिद्धौ मलोपवचनं व्यर्थमेव स्यात्।

क्रिया विशेषणेन समासाभावः पाकपदे प्रतिपादितः स्तोकं पाचक इत्यत्र तु **विशेषणं विशेष्येण बहुलम्** पा.सू.2.1.57 **उत** सुप्सुपा इत्यादिनान समासः सामर्थ्याभावात्। स्तोकादिपदार्थस्य क्रिययान्वयः सुबन्तार्थविशेष्येण सह (पाकेन) विशेषणसुबन्तार्थस्यान्वयः सामर्थ्यं दर्शयति। पाकविशेष्यकः मृदु पचतीत्यर्थकः।

निरुक्तसामर्थ्ये एव समासस्वीकारे कष्टं श्रित इत्यादौ न समासः। कष्टं सुबन्तार्थस्य श्रि (श्रितः सुबन्तैकदेश) धात्वर्थक्रियायामन्वयः। यः श्रितःसुबन्तार्थस्यैकदेशः न तु सुबन्तार्थः। इत्यापत्तिः।

**द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः** पा.सू 2.1.24 इति सूत्रारम्भसामर्थ्यात्

कष्टश्रित इत्यादौ श्रितशब्दार्थैकदेशाश्रयणरूपश्रिधात्वर्थे ऽन्वयेऽपि **द्वितीयाश्रितातीतेति** समासो भवति। नीलोत्पलमित्यत्र चारितार्थ्येन अन्वयेन सामर्थ्याश्रयणं स्वीकृत्य विशेषणादीनामप्रवृत्तिरिति प्राञ्चः।

वस्तुतस्तु द्वितीयाकारके ऽवयवद्वारा सामर्थ्याश्रयणम्। शिखीध्वस्त इत्यादिवत् कष्टं श्रित इत्यादावपि श्रिधात्वर्थवृत्तिकष्टनिष्ठकर्मतानिरूपकत्वस्य श्रिशब्दार्थाश्रयणकर्त्तरि आरोप्य निरुक्तसामर्थ्यं वदेत्।

क्रिया विशेषणेन सह समासविधानं तस्मादेव षष्ठ्यनुत्थापकत्वम्।अत एवमहाभाष्यकारःआचार्यपतञ्जलिः**पूजनात्पूजितमनुदात्तम्** पा.सू.8.1.67 इति सूत्रे**दारुणाध्यापक**इति साधयितुं **"मलोपश्च"इति** सूत्रारम्भः। दारुणं यथा स्यात् तथैव अध्यापकरिति दारुणशब्दो ऽत्र क्रियाविशेषणम्। अन्यथा (क्रियाविशेषणेन सह समासस्वीकारे ) समासोत्तरे क्षणे एव सुपो धातुप्रातिपदिकयोरिति सूत्रेण सुब्लकि कृते दारुणाध्यापकपदसिद्धे मलोपवचनमत्र निष्फलम् । अतोऽत्र क्याविशेषणान्न षष्ठी।

सुबन्तार्थैकदेशधात्वर्थे ऽन्वयात्सामर्थ्ये समासाभावे न सन्देहः, **तृजकाभ्यां कर्त्तरि** इत्यादौ निषेधसामर्थ्यात् अवयवसामर्थ्ये ऽपि षष्ठीसमासप्रवृत्तिर्ज्ञापयति। नो चेत् अपां स्रष्टा इत्यत्र धात्वर्थेऽन्वयेऽपि सामर्थ्याभावे समासाभावः। तथाहि **तृज्काभ्यां कर्त्तरि** इति सूत्रेण समासनिषेधः व्यर्थः। समासः वैकल्पिकः,तदभावे विग्रहवाक्यकाले दारुणाध्यापक इति प्रयोगसिद्धये भाष्यकाराणां **मलोपविधानं** युक्तमिति चेन्न यदि भाष्याकाराणामाशयः वाक्ये ऽपि प्रयोगः इष्टः स्यात्तर्हि वाक्ये मलोपश्चेति वक्तव्यम्। अत एव वाक्ये दारुणाध्यापकः प्रयोगः असाधुरेव।

कैयटाभिप्रायः-दारुणेति क्रियाविशेषणं वैयधिकरण्यात् समासो न स्यात् तस्माद् मलोपविधानं कृतम्। सुप्सुपादिना समासविधानं न सार्वत्रिकम् आदिपदेन मयूरव्यंसकादयश्चेत्यस्य संग्रहः।

न च समासस्य वैकल्पिकत्वेन तदभावे वाक्ये मलोपपूर्वकदारुणाध्यापकरुसिद्ध्यर्थं मलोपवचनमिति वाच्यम्, तथा सति **वाक्ये मलोपश्च वक्तव्यः**इति वदेत्।

अत एव कैयटेन क्रियाविशेषणदारुणादयस्तत्र वैयधिकरण्यात्समासाभावात् मलोपो विधीयते इत्युक्तम्। **सुबामन्त्रिते** इत्यतः सुबिति अनुवर्त्तमाने सुपा इति समासस्तु न सार्वत्रिकः। किन्तु अगतिकगतिस्थले एव शिष्टप्रयोगानुरोधेन विधानात् नात्र तत्समासाप्राप्तिः।

यद्यपि विस्पष्टं पटुः इत्यर्थके विस्पष्टपटुःइत्यत्र विस्पष्टं पटुत्वं तदाश्रयः पटुः इत्यत्र विस्पष्टपदार्थस्याश्रयार्थे विशेषणतया भासमाने पटुत्वे ऽन्वयेऽपि सुपा इति समासो भाष्ये। तत्र भाष्यप्रामाण्यात् तथा स्वीकारेऽपि अत्र तथा न प्रमाणाभावात्।

कृति किम् –कर्तृसञ्ज्ञा च धात्वर्थव्यापाराश्रयस्य,कर्मसञ्ज्ञा च धात्वर्थव्यापारजन्यफलाश्रयस्य भवतीति पीनत्वस्यान्यथा ऽनुपपत्त्या रात्रिभोजनमर्थापत्त्या यथा पीनो देवदत्तः दिवा न भुङ्क्ते इत्यत्र रात्रिभोजनक्रियाक्षिप्यते तथैव प्रकृते कर्तृकर्मभ्यां क्रिया सन्निधाप्यते आक्षिप्यते क्रियावाची धातुरेव। तद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरुपितवृत्तिविशिष्टज्ञानं हेतुः। कारकनिष्ठप्रकारतानिरुपितविशेष्यतासंबन्धेनशाब्दबुद्धित्वावच्छिन्नरूपकार्यम्प्रति, धातुजन्यसाध्यत्व-विशिष्टभावनात्वावच्छिन्नोपस्थितिः कारणम् इति। कारकान्वययोग्यतावच्छेदकरूपेण साध्यत्वेन धातुभिरेव तदुपस्थितेः। शत्यो ऽश्वः आभ्रिक इत्यादौ न तेन तेन रूपेणोपस्थितिरिति न तत्र कारकाणामन्वयः,एतद्भाष्यप्रामाण्यात्। अतएव हिरुगादियोगे न कर्मादिसंज्ञा। तेन देवदत्तेन शत्यो ऽश्वः इत्यादौ षष्ठीनिवृत्त्यर्थमपि न कृद्ग्रहणम्। अधिका खारी द्रोणेन इत्यत्र हेतौ तृतीया, तत्र जनकत्वरूपहेतुसत्वात्।

धातोश्च द्वये प्रत्ययास्तिङः कृतश्च। तत्र तिङ्योगे न लोकेति निषेधात् कृदन्ततदादियोगे एव कर्त्तृवाचकात्,कर्मवाचकात् षष्ठी भविष्यति किं कृद्ग्रहणेन। नन्वत्र कृद्ग्रहणाभावे उत्तरत्र तत्संबन्धाभावेन न लोकेति सूत्रे कृदव्ययस्यैव ग्रहणम् इति कथं लभ्यते ? अत्रोच्यते अव्ययार्थस्य ये कर्तृकर्मणी इति व्याख्यानेन तत्सिद्धेः। ननु कृद्ग्रहणाभावे तस्योत्तरत्रानुवृत्त्यभावेन उभयप्राप्तौ इत्रान्यपदार्थे जायमानो बहुव्रीहिरिति तत्रान्यपदार्थज्ञानाभावः। कृद्ग्रहणसत्त्वेतु कृदन्तत - दादिरूपान्यपदार्थस्य स्पष्टतया अवगमः इति चेन्न एकाचो द्वे इत्येव अशाब्दस्यापि अन्यपदार्थस्य यत्रावगमस्तत्रापि इति व्याख्यानाद्भविष्यति। न च भेदिका देवदत्तस्य काष्ठानामोव इत्यादौ गुणभूते

णिच्प्रत्ययार्थकर्त्तरि षष्ठ्यर्थकृत्पदं यौगिकमिति करोति कृदिति कर्तृपरं वाच्यम्। तृतीयावत् तत्र षष्ठ्या अपि स्वतस्सिद्धेः।

कृति किम्-तद्धितान्ततदादिपर्याप्तानुभविकशक्तिग्रहमात्रप्रयोज्य-शाब्दबोधविषयक्रियायाः कर्त्तरि कर्मणि च मा भूदित्यर्थः,कृतपूर्वी कटमिति कृतः कटः पूर्वमनेन इति विग्रहे उत्पत्त्यनुकुलव्यापारवाचककृधातोः सकर्मकत्वेन क्तस्य कटरूप कर्मणि विधानेनक्तप्रत्ययेनैवाभिहितं कर्मेति नात्र द्वितीया प्राप्नोति, अनभिहिताधिकारात्,नापि द्वितीया बाधिका ऽनेन षष्ठी प्राप्नोति,इहाप्यनभिहिताधिकारसत्त्वात्।

किञ्च कृतः कः इति प्रश्ने सन्निधानात् कट इति, कृत्पदार्थस्यकटपदार्थसापेक्षत्वेन सापेक्षमसमर्थवत् इति एकार्थीभावरूपसामर्थ्याभावात् समासो ऽत्र दुर्लभ इति, एवं **सपूर्वाच्च** इति इनिप्रत्ययोऽपि न प्राप्नोति इति कृतपूर्वी कटम् इति वाक्यमेव अशुद्धम्।

अत्रोच्यते पूर्वं कृतमनेन इति विग्रहं कृत्वा कटरूपकर्मणो ऽविवक्षया अविवक्षितकर्मतया अकर्मत्वेन पूर्वं भावेक्तप्रत्ययो विधेयः।

एवञ्च कृतपदार्थस्य सापेक्षत्वाभावेन समासतद्धितौ भवतः। तथा च कृतपूर्वी इत्ययं पूर्वं कृतवान् इति समासार्थः सम्पद्यते गुणभूतया ऽपि (विशेषणभूतयाऽपि) क्रियया कारकाणां सम्बन्धस्य कटं कृतवान् इत्यादौ दर्शनात्। अत्रापि करोति क्रियापेक्षं कर्मत्त्वं कटस्य। तच्च कर्मत्वं न केनाप्यभिहितम्,भावे क्तस्य, कर्त्तरि इनिप्रत्ययस्य च विधानात्।

एवञ्च प्रत्युदाहरणे सकर्मकप्रकृतिकभावक्तान्तस्येदृशवृत्तिमात्रविषयतया भाष्यसम्मतत्वेन तस्य केवलस्य क्वाप्यप्रयोगेण तद्धितान्ततदादिसमुदायशक्त्यैव क्रियोपस्थापकत्वेन तद्योगे कटशब्दान्नानेन षष्ठी किन्तु कर्मणि द्वितीयैव। पूर्वं कर्मणो ऽविवक्षासमासतद्धितानन्तरं कर्मणः कटस्य विवक्षा। अत्र भाष्यमेव मानम्।

तण्डुलानां पाचकतरः इत्यादौ तु तरब्रहितस्य पाचकादेः पृथक्प्रयोगेण तच्छक्तिग्रहस्यापि सत्त्वेन कृदन्ततदादिपर्याप्तशक्तिग्रहप्रयोज्योपस्थितिविषयत्वं क्रियायै अस्त्येवेति भवत्येव षष्ठी। अत एव ग्रन्थे तद्धिते मा भूदिति उक्तम् , न तु तद्धिताधिक्ये ऽपीति। भाष्ये ऽपि तद्धितस्य(तद्धितान्ततदाद्युपस्था-प्यक्रियायाः) ये कर्तृकर्मणी तत्र मा भूत्,कृतो ये कर्तृकर्मणी तत्रैव यथा स्यादित्येव उक्तम् एव **मधीती व्याकरणे** इत्यत्रापि बोध्यम्। तदुक्तं भाष्ये –यदा वाक्यं न तदा

प्रत्ययः(भावे) यदा प्रत्ययः सामान्येन (भावे) तदा वृत्तिः। अनेन भाष्येण भावक्तान्तस्य वाक्ये न प्रयोग इति स्पष्टमुक्तम्।

ओदनस्य पाचकतम्इत्यादौ वृ त्यन्तर्भूतकृद्योगः तर्हि ओदनस्य इत्यत्र षष्ठ्याभावे द्वितीयैव स्यात् इष्टापत्तेश्च। एवञ्च ओदनस्य पाचकतमेत्यत्र षष्ठ्यसाधुत्वे इष्टापत्तिरेव। अत एव मतुबधिकारे **प्रज्ञाश्रद्धाऽर्चाभ्यो णः** पा.सू. 5.2.101 प्राज्ञो व्याकरणम् श्राद्धः,आर्चः इत्याद्युदाहृतम्।

क्रियते घटःइत्यत्र कर्मणःविवक्षाभावमाश्रित्य भावलकारे सति अनन्तरं घटस्य कर्मत्वेन अन्वयात् अनभिहिते द्वितीया न तु प्रथमा वैषम्याच्च। कृतपूर्वीत्यत्र अलौकिकविग्रहे कटपदस्य असन्निधानात् कर्मणोऽविवक्षायां कृत्पदे भावे क्तप्रत्यययुतः।

क्रियते घटःइत्यत्र कर्मविवक्षायां तु द्वितीयैव कृत्तद्धित समास्सैकशेषसनाद्यन्तधातुरूपवृत्ति-पञ्चकान्तरभूतत्वेन वृत्तिशून्यतया विग्रहाभावात् वृत्तिविषये एवायं व्युत्पत्तिप्रकार इति प्राञ्चः। इयमेव कर्मणो ऽविवक्षा नाम। न च नपुंसके भावे क्त इति भावे क्तप्रत्ययेन कृत इत्ययस्य सिद्धिः,तत्र अकर्मकेभ्यःइत्यनुवृत्तिसत्त्वात्। अकर्मकानुवृत्तौ चेदं भाष्यमेव मानम्।धायैरामोदमुत्तमम् इत्र उत्तमम् आमोदं गृहीत्वा इत्या ध्याहृत्य तत्र द्वितीया,न षष्ठी। तदर्हम् इति निर्देशादस्य सूत्रस्य अनित्यत्वमिति। अनित्यत्वमन्तरा ऽपि पूर्वोक्तप्रयोगस्य सिद्धेः। कृतपूर्वी इत्यत्र सुप्सुपेति समासो बोध्यः।

ननु कृतः कटः पूर्वमनेन विग्रहे कृतशब्दस्य पूर्वशब्देन समासो न भवति। कृतशब्दस्य कटशब्दसापेक्षत्वेन सामर्थ्याभावात्। अत एव तद्धित इनिप्रत्ययस्याप्यभावः। किञ्च कृत इति क्तप्रत्ययेन कटस्य कर्मणोऽभिहितत्वेन ततः षष्ठ्याः प्राप्तिरेव नास्तीति किं तन्निवृ त्त्यर्थेन कृद्ग्रहणेन। क्तप्रत्ययेन कृता अभिहितत्वादेव कटशब्दात् द्वितीयापि दु र्लभेति चेन्न ,कृत अम् पूर्व अम् इत्यलौकिकविग्रहवाक्ये कटस्यासंनिहिततया कर्मत्वेनान्वयासंभवेन कृञ्धातोस्तदानीमकर्मकतया कर्मणि क्तप्रत्ययस्यासंभवे सति **नपुंसके भावे क्तः** पा.सू 3.3.114 इति भावे क्तप्रत्यये कृते सति कृतशब्दस्य कटशब्दसापेक्षत्वाभावात् समासतद्धितौ निर्बाधौ। ततश्च कृतपूर्वी तद्धितान्तस्य पूर्वं कृतवानित्यर्थः पर्यवस्यति। किं कृतवान् कर्मजिज्ञासायां कटमित्यन्वेति, गुणभूतयापि क्रिया-कारकसंबन्धस्य कटं कृतवानित्यादौ दर्शनात्। तच्च कर्मत्वं न क्तप्रत्ययेनाभिहितम्, तस्य भावे विधानसामर्थ्यात्। नैवेनिप्रत्ययेन तस्य कर्त्तरि विधानात्। तथा च असति कृद्ग्रहणे षष्ठी स्यात्।

कटमित्यत्र प्राप्तषष्ठीवारणाय प्रकृतसूत्रे कृद्ग्रहणमिति।

नागेशस्तु कृतिग्रहणाभावे कर्तृकर्मणोः क्रियाक्षेपात् उभावपि कारकत्त्वव्याप्यधर्मः तेनैव क्रियानिरूपिता तस्मात् क्रियावाचकः धातुरेव। कारकान्वययोग्यतावच्छेदसाध्यत्वरूपेण धातुनैव क्रियोपस्थितत्वात्। धातुभिरेवात्र एवपदस्य व्यावृत्तिः कथ्यते शत्यो ऽश्वः,अभ्रिकः इत्यादयः तद्धितान्तत् कारकान्वयितावच्छेदकसाध्यत्वरूपेण क्रियाया अनुपस्थितिः अतः तद्धिते उपस्थितक्रियायां न कारकाणामन्वयः। कृतपूर्वी कटमित्यत्र भाष्यप्रमाणं दर्शयति-देवदत्तेन शत्योऽश्वः,अभ्रिकः भूमिम् आदि अपप्रयोगाः,शत्यः-शतेन क्रीतः,अभ्रिकः अभ्रया खनति। अत एव धातुनैव साध्यत्वक्रियाया उपस्थितिः। तत्र कारकान्वये हिरुगादियोगे न कर्मसंज्ञा। क्रियायाः उपस्थितिः सिद्धत्वरूपेण भवति। शत्यः,अभ्रिक इति तद्धितप्रयोगे साध्यत्वक्रियायाः नोपस्थितिः,तत्रैव कारकान्वयः। देवदत्तेन शत्यो ऽश्व इत्त्र देवदत्तपदे प्राप्तषष्ठीवारणाय सूत्रे कृद्ग्रहणमिति प्राञ्चः। देवदत्तपदस्य कर्त्तृत्वेन अन्वयाभावात् कृद्ग्रहणाभावे देवदत्तपदे षष्ठ्या अप्राप्तिः तर्हि षष्ठीवारणप्रसङ्गनिष्फलमिति नव्याः।

ननु भट्टिकाव्येद**दैर्दुःखस्यमादृग्भ्ये धायैरामोदमुत्तमम्। लिम्पैरिव तनोर्वातैः चेतयः स्याज्ज्वलो न कः?॥** श्लोकेऽस्मिन् श्रीरामस्य विरहार्त्तस्य वाक्यमेतत्। अत्र दुःखस्येति तनोरिति च कर्मणि षष्ठीविभक्तिः दुःखं ददैः द ददृभ्यः,पुष्पादीनाम् आमोदं परिमलं धायैः पोषकैः,तनोः तनुं शरीरं लिम्पैः लिम्पद्भिः कः चेतयः प्राणी ज्वलः ज्वलन्निव न स्यादित्यर्थः। अत्रामोदस्योत्तमस्येति कर्मणि षष्ठ्या भाव्यम्। धायशब्दस्य पोषणार्थकधाञ्धातोः **ददातिदधात्योर्विभाषा पा.सू 1.1.140** इति णप्रत्ययात्मककृदन्तत्वादिति चेन्न उत्तममामोदं पुष्पादीनां गृहीत्वा दुःखस्य पोषकैरित्येवं गृहीत्वेत्यध्याहृत्य तद्योगे द्वितीयापत्तेः। अत्राहुः **कर्तृकर्मणोःकृति** इदमनित्यम् मत्वा षष्ठीविभक्तिः**तदर्हम्** इति निर्देशात्। स्त्रीप्रत्य ययोरिति कथं तर्हि **सुट्तिथोः** इति सूत्रे सुटा सूयुटो बाधो नेति। करणत्वविवक्षाया तृतीयेति गृहाण।

दाधातोःपोषणार्थकाद्धाञ्च **ददातिदधात्योर्विभाषेति** शाणौ लिम्पेः ज्वलेर्णः **अनुपसर्गलिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसहिभ्यश्च** पा.सू 3.1.138 इति शप्रत्ययः। **श्याऽऽद्व्यधास्रुस्रंस्वतीणवसाऽवहृलिहश्लिषश्वसश्च** पा.सू. 3.1.141 इति णप्रत्ययः इति

जयमङ्गलाश्लोकव्याख्याप्येतज्जातीयैव। धायैरामोदमुत्तममित्यत्रगृहीत्वेत्यध्याहृत्य तद्योगे द्वितीया बोध्या।

उभयप्राप्तावित्यंशस्य उभयोः कर्तृकर्मणोः प्राप्तिर्यस्मिन्निति विग्रहः। यत्र एकस्याः क्रियायाः

कर्तृकर्मणोः षष्ठीप्राप्तिः तत्र कर्मण्येवेति नियमः। यथा ओदनस्य पाकः ब्राह्मणानाञ्च प्रादुर्भावः।

अस्मिन्नुदाहरणे नियमस्याप्रवृत्तिःप्रादुर्भावक्रियायाः कर्त्ता ब्राह्मणः पाकक्रियायाः कर्म ओदनमत उभयत्र षष्ठी। प्रतिपदोपादानेन ज्ञायते यत् कर्तृकर्मणोः प्रयोगे एव अस्य नियमस्य प्रवृत्तिः।

**स्त्रीप्रत्यययोरकाराकारयोर्नायं नियमः(भा.वा.)**

**स्त्रियां क्तिन्** पा.सू.3.3.94 इति सूत्राधिकारे अक -अकारयोः प्रत्यययोः प्रयोगे कर्मण्येव षष्ठीति नायं नियमः। अत कर्तृकर्मणोः षष्ठी भेदिका बिभित्सा वा सद्रस्य जगतः।

**शेषे वा(भा.वा.)**

इदं वार्त्तिकम्उभयप्राप्तौ कर्तृकर्मणोः इति सूत्रस्य पक्षान्तरं मतान्तरं वा। शेषपदेन क्तिन्प्रत्ययस्य ग्रहणम् एवं कर्त्तरि वा षष्ठी न तु कर्मणि। द्वयोः उभयप्राप्तस्त्रीप्रत्य ययोः पूर्वपाठात्। यथा विचित्रा जगतः

कृतिर्हरेर्हरिणा वा इत्येके। दीक्षितस्तु शेषपदात् अकाराभ्यां प्रत्ययाभ्यां भिन्नयोः सामान्येन कृन्मात्रग्रहणम्।

**शब्दानुशासनम् आचार्येण आचार्यस्य वा(भा.वा.)**

असाधुशब्दान् अपहाय साधुशब्दान् बोधयति यच्छास्त्रं तच्छास्त्रं शब्दानुशासनशास्त्रं गीयते।

प्रकृतवार्त्तिके शब्दकर्म एवम् आचार्यः कर्ताऽस्ति। अत एव षष्ठी तृतीया वा स्यात्।

**क्तस्य च वर्त्तमाने** (पा.सू.2.3.65)

राज्ञां मतः बुद्धः पूजितो वा अत्र मतः बुद्धः इत्यादौ **मतिबुद्धिपूजार्थेभ्यश्च** इत्यनेन वर्त्तमाने क्तप्रत्ययः स्यात्।

**अधिकरणवाचिनश्च**(पा.सू. 2.3.68) अधिकरणवाचके क्तप्रत्यययोगे अनुक्ते कर्तृकर्मणी षष्ठी

आस्यते अस्मिन् आसितम्-इदमेषामासितमित्युदाहरणम् अकर्मकधातोः इयं कर्तृषष्ठी,सकर्मकेभ्यः धातुभ्यः कर्तृकर्मणोःषष्ठी इदमेषां भुक्तमोदनस्य। **दण्डी तु** उक्ते तु कर्ममात्रे षष्ठी अधिकरणवाचिनश्च
इत्यस्योत्सर्गशास्त्रस्य उभयप्राप्तौ कर्मणि अपवादसूत्रत्वात्। अत्र उक्ते कर्त्तरि तृतीया न षष्ठी। मध्ये ऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् इति न्यायेन कर्तृकर्मणोः इति तु उभयप्राप्तावित्यस्य बाधकः न त्वधिकरणवाचिनश्चेति।

**सन्दर्भग्रन्थसूची-**


1.पाणिन्यष्टाध्यायी
2.काशिका
3.वैयाकरणसिद्धान्तकौमुदी
4. बालमनोरमाटीका
5.तत्त्वबोधिनीटीका
6.लक्ष्मीटीका
7.लघुशब्देन्दुशेखरः
8. लघुशब्देन्दुशेखरः षट्टीकः
9. लघुशब्देन्दुशेखरस्य दीपिकाटीका
10. लघुशब्देन्दुशेखरस्य भैरवीटीका
11.वैयाकरणसिद्धान्तदिग्दर्शनम्
12. वैयाकरणभूषणसारः
13.परमलघुमञ्जूषा
14. व्याकरणमहाभाष्यम्

# भाषाविज्ञानदृष्ट्याशब्दार्थसम्बन्धविमर्शः

**चेमटे सुरेशः**
व्याकरणविभागः रा. सं. संस्थानम्,
क. जे. सोमैय्यासंस्कृतविद्यापीठम्,
विद्याविहारः,मुम्बई-400077

विश्वप्रपञ्चे प्रत्येकं पदार्थस्य केनाप्यन्येन सह सम्बन्धो विद्यते। तत्र असम्बद्धः कोऽपि नास्ति। स च सम्बन्धः व्यावहारिकयथार्थोविद्यते।तेनैवलोकव्यवहारः प्रवर्तते। सर्वव्यवहारजनकोलोकप्रवृत्तिनिवृत्तिनिमित्तः, विशिष्टबुद्धिनियामको वा सम्बन्धः । शब्दश्चार्थश्चेतिशब्दार्थौ, तयोः यः सम्बन्धः सः शब्दार्थसम्बन्धः । तत्र तयोः सम्बन्धस्य भाषाविज्ञानदृष्ट्या विमर्शः अत्र उपस्थाप्यते।

**को नाम सम्बन्धः ?**

सम्बन्धः द्विष्ठः।सम्बन्धः नियामकः। प्रोक्तञ्च- शब्देनार्थस्याभिधाने सम्बन्धो हेतुः, अन्यथा सर्वं सर्वेण प्रत्याय्येत( हेलाराजः वा.प.३) वस्त्वादिद्वयं येन सम्बद्ध्यते सः सम्बन्धः । प्रोक्तञ्च - सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे सति आश्रयतया विशिष्टबुद्धिनियामकत्वं सम्बन्धत्वम् । वस्त्वादिस्वभावानुसारेण सम्बन्धस्य वैविध्यं मान्यमस्ति। यथा- संयोगः समवायः सामानाधिकरण्यं विषयताप्रभृतयः सम्बन्धाः । बहवः सम्बन्धाः - एकशतं षष्ठ्यर्थाः, यावन्तो वा सन्ति लोके बहवोऽभिसम्बन्धा आर्था यौना मौखा स्त्रौवाश्चेति। ( म.भा.१.१.४९)। तथाहि -घटस्य ज्ञानम् इत्यत्र ज्ञानेन सह घटस्य विषयितासम्बन्धः।ज्ञानीयो घट इत्यत्र ज्ञानेन सह घटस्य विषयतासम्बन्धः।रामस्य पुस्तकम् इत्यत्र पुस्तकेन सह रामस्य स्वत्वसम्बन्धः । घटस्याभावः इत्यत्र अभावेन सह घटस्य प्रतियोगितानुयोगिता वा सम्बन्धः । अयं घटः इत्यत्र सम्मुखस्थितेन वस्तुना सह घटस्य तादात्म्यसम्बन्धः।दध्ना जुहोति इत्यत्र साक्षात्सम्बन्धः( पारम्पर्यरहितः सम्बन्धः)। राज्ञः पुरुषः इत्यत्र स्वस्वामिभावसम्बन्धः।वह्निधूमयोः सामानाधिकरण्यसम्बन्धः , यथा वा नीलो घटः इत्यादौ नीलपदघटपदयोः सामानाधिकरण्यसम्बन्धः ।।धूमवह्न्योः कार्यकारणभावसम्बन्धः (हेतुहेतुमद्भावसम्बन्धः)। दशरथस्य पु त्रः , कवेः काव्यम् इत्यत्र जन्यजनकभावसम्बन्धः ।वृक्षस्य

शाखा इत्यत्र अवयवावयविभावसम्बन्धः।इको यणचि इत्यत्र स्थान्यादेशभावसम्बन्धः। गुरोः शिष्यः इत्यत्र विद्यासम्बन्धः । भूतले घटः इत्यत्र आधाराधेयभावसम्बन्धः ।पुष्पस्य गन्धः इत्यत्र समवायसम्बन्धः कार्यकारणभावसम्बन्धः वा, जगद्ब्रह्मणोः ,शरीरशरीरिणोः इत्यत्र अविनाभावसम्बन्धोवेत्यादि। तत्र कः शब्दार्थयोः सम्बन्धः?

**सम्बन्धज्ञानम्**

वृद्धव्यवहारादिभिरुपायैः शब्दार्थयोः सम्बन्धज्ञानं प्रतिपद्यते। तथाहि–

**शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।**
**वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।**

पुनश्च

**समयाद्(सङ्केताद्) योग्यता संविन्मातापुत्रादियोगवत्।** (वाक्य. ३)

**सम्बन्धो द्विविधः**

वृत्तिनियामकः वृत्त्यनियामकश्च। आधाराधेयबोधनिरूपकः सम्बन्धो वृत्तिनियामको भवति। स च संयोगसमवायस्वरूपकालिकादिभेदेनानेकविधः । यथा संयोगः(भूतले घटः) समवायः(घटे रूपम् ,नीलो घटः)।येन च सम्बन्धेन नाधाराधेयबोधो भवति, परन्तु विशिष्टबुद्धिर्भवति । स वृत्त्यनियामकसम्बन्धःकथ्यते। स च विषयविषयिभावप्रतियोग्यनुयोगिभावाधाराधेयभावस्वस्वामिभावतादात्म्यादिभेदेनानेकविधः।यथा स्वामित्वम् ( धनवान् देवदत्तः इत्यत्र देवदत्तेन सह धनस्य स्वामित्वसम्बन्धः )। शब्दार्थसम्बन्धस्यकारणंभाषाभाषिनः,रामः, कृष्ण इत्यादिशब्दश्रवणानन्तरं रामादीनां प्रतीतिश्च दृश्यते।किन्तु सर्वः शब्दः सर्वमर्थं न बोधयति, कश्चि त् शब्दः कमपि विशेषार्थमेव बोधयति । यथा घटशब्दोच्चारणे घटरूपार्थस्यैव प्रतीतिर्भवति,न तु पटरूपार्थस्य तेन ज्ञायते शब्दार्थयोरस्ति कश्चन सम्बन्धः स च कः इति जिज्ञासायाम्?

**शब्दः**

शब्दःयदोच्चार्यतेतदैवशब्दस्थः अर्थः श्रुतिगोचरीभवति। मूकोऽप्यभिव्यक्तिकाले शब्दस्यैव प्रयोगः प्रकारान्तरेण करोत्येव। यदा मूकस्तत्र प्रयततेऽभिव्यक्त्यर्थं तदा चतुर्थावाणीवैखर्येव सङ्केतरूपेणावतरति। मध्यमावाणीपर्यन्तं तु मूकस्यापि तत्राभिव्यक्तिप्रक्रिया प्रचलत्येव। अतः ज्ञायतेयत्कोऽपि वक्ता भवतु मूको वा शब्दस्तु सर्वत्रापि विराजते।

**अर्थः**

पदवाक्यादिभ्यः प्राप्तः भावः, चिह्नैः जायमानं ज्ञानं वा। इन्द्रियाणामर्थैः सह सन्निकर्षे जाते अर्थज्ञानं जायत इति सर्वेषामनुभवः। अर्थः वक्तुः बुद्धौस्थितो भवति। सः तं बुद्धिगतमर्थमुच्चारणद्वारा श्रोतारं समर्पयति तथा श्रोतापि तथैव स्वभावनया युक्तोभवति तथास्वस्वाभाविकयोग्यतयातंगृह्णाति।यथाघटशब्दस्यार्थःकम्बुग्रीवादिमान्(वस्तु)।
शब्दवृक्षस्यपुष्पंफलमर्थः। येनशब्देनयोऽर्थःगृह्यतेसतस्यार्थः।

**अयमस्यपदस्यार्थइतिकेचित्तेनवा।**

**योऽर्थःप्रतीयतेयस्मात्सतस्यार्थइतिस्मृतिः॥**( न्यायमञ्जरी २.३२९)

शब्दोच्चारणकाले उच्चरितस्य शब्दस्य योऽर्थः प्रतीयते अवबोध्यते वेति स एव तच्छब्दस्य अर्थः।

**यस्मिंस्तूच्चरिते शब्दे यदा योऽर्थः प्रतीयते।**

**तमाहुरर्थं तस्यैव नान्यदर्थस्य लक्षणम्॥**

**भाषाविज्ञानम्**

भाषा- कस्मिञ्चित् विशिष्टे स्थानप्रदेशादौ व्यवहारे प्रयुक्ता वाणी, तस्य विज्ञानम्( विशिष्टं ज्ञानम्) भाषाविज्ञानम्। प्रोक्तञ्च डा .भोलानाथतिवारिमहोदयैः "यस्य विज्ञानस्यान्तर्गतमैतिहासिकतुलनात्मकाध्ययनेन भाषाया उत्पत्तिसंघटनप्रकृतिविकासादीनां सम्यक् व्याख्यापूर्वकमेतेषां विषयाणां सिद्धान्तानाञ्च निर्धारणं भवति तद्भाषाविज्ञानम्"।

अपिच डा . श्यामसुन्दरदासः "भाषाविज्ञानं भाषाया उत्पत्तेः तत्संरचनाविकासस्य तद्ह्रासस्य वैज्ञानिकीं व्याख्यां करोति"।

**शब्दार्थयोः सम्बन्धः–**

तयोः सम्बन्धविषयेसर्वेषांभाषावैज्ञानिकानांनैकमतानिसन्तितत्रविशिष्टमतानि।

**वैयाकरणदृष्ट्या-**

**१. नित्यः**

शब्दानामर्थानाञ्चसम्बन्धोनित्यः।प्रोक्तञ्च–

**सम्बन्धस्यापि व्यवहारपरम्परयाऽनादित्वान्नित्यता**। (प्रदीप,म.भा. अ. 01)। भर्तृहरिः

– **नित्याः शब्दार्थसम्बन्धास्तत्राम्नाता महर्षिभिः।**

**सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः।।**( वा.प . 1/23)

**कथं ज्ञायते सिद्धः शब्दोऽर्थः सम्बन्धश्चेति ? लोकतः**।( म.भा. अ. 01)।

कात्यायनः -

**"सिद्धे शब्दार्थसम्बन्धे"**।

**विशेषः- नित्यःशब्दार्थसम्बन्धःइतितान्त्रिकाः**।

कालिदासोऽपि -

**वागर्थाविवसम्पृक्तौवागर्थप्रतिपत्तये।**

**जगतःपितरौवन्देपार्वतीपरमेश्वरौ।।**( रघुवंशम् १.१)।

उपर्युक्तभाषावैज्ञानिकानुसारं शब्दार्थयोः सम्बन्धो नित्योऽस्तीति निश्चप्रचम्।

**२.योग्यतारूपः**

यथा इन्द्रियार्थयोः प्रकाश्यप्रकाशकभावरूप एकः अभिन्नः योग्यतासम्बन्धो भवति तथैव शब्दार्थयोः। प्रोक्तञ्च–

**इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।**

**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा**। (वा. प. 03 )।

अयमेव भट्टोजिदीक्षितादिभिरभिमतः।

**३.कार्यकारणभावः**

श्रोतुः बुद्धौ यः अर्थः विद्यमानो ऽस्ति तस्य कारणं शब्दः । शब्दात् श्रोतुः बुद्धिगतो ऽर्थः जागरितो भवति। बुद्धौ पूर्वस्माद् विद्यमानाद् अर्थादेव शब्दस्य ज्ञानं भवति । अतः अर्थः शब्दस्य कारणं भवति।प्रोक्तञ्च -

**कार्यकारणभावेन योग्यभावेन च स्थिताः**। (वा. प. 1/25 )।

**शब्दः कारणमर्थश्च स हि तेनोपजन्यते।**

**तथा च बुद्धिविषयादर्थाच्छब्दः प्रतीयते**।( वा.प.का. 03)

**4.वाच्यवाचकभावः**

वाच्यश्च वाचकश्चेति वाच्यवाचकौ, तयोर्भावो वाच्यवाचकभावः । यस्मिन्नर्थे यः शब्दः आद्येन वक्त्रा( भाषाभाषिभिः) सङ्केतितः सो ऽर्थस्तस्य शब्दस्य वाच्यः, स च शब्दस्तस्यार्थस्य वाचकः। यथा गवि गोशब्द आद्येन वक्त्रा( भाषाभाषिभिः) सङ्केतित इति गौः गोशब्दस्य वाच्यः, गोशब्दश्च गोरूपार्थस्य वाचकः । अयमेव सम्बन्धः नागेश-मीमांसक-द्वैत-अद्वैत-विशिष्टाद्वैतादिसंमतः।

**5.तादात्म्यसम्बन्धः**

तादात्म्यं सम्बन्धताविशेषः प्रतीतिसाक्षिकः।यः शब्दः स अर्थः, यः अर्थः स शब्दः इत्येवं शब्दार्थयोः तादात्म्यसम्बन्धः । तयोः प्रतीतिरैक्यरूपेण भवति । तयोः कृते एक एव शब्दः प्रयुज्यते।यद्यर्थस्य बोधकः शब्दः पटः अस्ति, त र्हि तस्य शब्दस्यार्थो ऽपि पट एव विद्यते । अर्थस्तु शब्दे एव प्रतिबिम्बितो भवति। अतः तयोः तादात्म्यसम्बन्धः इतरेतराध्यासरूपः।

विशेषः- शब्दार्थयोः सम्बन्धः इतरेतराध्यासमूलकं तादात्म्यम् इति योगशास्त्रज्ञाः।

**६. स्वाभाविकः**

स्वस्य =आत्मनो भावः=सत्ता स्वभावः, तेन युक्तः। वक्ता यत् किञ्चित् वदति, श्रोता क्षिप्रमवगच्छतीत्यनेन सिद्ध्यते यत् सम्बन्धस्तु स्वभाविकः। हेलाराजः-

**स्वाभाविकः शब्दार्थयोः सम्बन्धः**

**समयवशादभिव्यज्यमानस्वरूपः।**

**ज्ञानं प्रयोक्तुर्बाह्योऽर्थः सर्वरूपञ्च प्रतीयते।**

**शब्दैरुच्चारितैस्तेषां सम्बन्धः समवस्थितः॥**( वा.प.का. 03)

**सारांशः-** शब्दार्थयोः नित्यः, स्वभाविकः, योग्यतारूपः, कार्यकारणभावः, इतरेतराध्यासरूपः तादात्म्यसम्बन्धः इत्यादिसम्बन्धमामनन्ति शाब्दिकाः।

**मीमांसकदृष्ट्या**

**औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः**। ( जै.सू. 115)

यथाअग्निजलादीनाम्औष्ण्यादिशक्तियोगःऔत्पत्तिकःयथावाचक्षुरादीनामिन्द्रियाणांबुद्धिविशेषजननशक्तिःऔत्पत्तिकीतथाशब्दार्थयोः। रामादिशब्देन सह अर्थस्य दाशरथ्याद्यर्थस्य सम्बन्धः औत्पत्तिकः( शब्दोत्पत्तिकाला-वच्छेदेनैव शब्दस्यार्थेन सम्बन्ध उत्पद्यते ) स च अपौरुषेयः नित्यश्च। तत्र अर्थप्रकाशप्रक्रिया-यथा चक्षुरिन्द्रियं संयुक्ततादात्म्येन सम्बद्ध्यमानं रूपं प्रकाशयति,यथा धूमादिश्च व्याप्त्यादिना सम्बन्धेन वह्न्यादिकं, तथा च शब्दोऽपि प्रत्याय्यप्रत्यायकत्वरूपेण( वाच्यवाचकत्वरूपेन/संज्ञासंज्ञिलक्षणत्वरूपेन) सम्बन्धेन अर्थं बोधयति।

विशेषः- शब्दः गुणः( प्रभाकरः), द्रव्यम्(भाट्टाः), वर्णात्मकः नित्यः, ध्वन्यात्मकोऽनित्यः। पदस्य स्ववाच्येन सह वाच्यवाचकभावसम्बन्धः नित्यः। नित्यत्वन्तु स्वरूपतः। वैयाकरणानां तु प्रवाहतः।

**न्यायदृष्ट्यासमयः**

( समयो नाम अभिधानाभिधेयनियमनियोगः) समयः = सङ्केतः। वस्तु = सङ्केतविषयः। यथा घटगगनादि। वस्तु द्विविधम् बाह्यमबाह्यञ्च। तत्र आत्मा तद्योग्यगुणास्तद्वृत्तिजातिः स्वर्गपूर्वादि चैतन्यबाह्यवस्तूनि मनसा श्रुत्यनुमानादिना च वेद्यानि च । एतदन्यानि तु बाह्यवस्तूनि ।न शब्दार्थयोः कुण्डबदरयोरिव संयोगसम्बन्धः, तन्तुपटयोरिवसमवायसम्बन्धः, निमित्तनैमित्तिकभावसम्बन्धः, आश्रयाश्रयिभावसम्बन्धः, कार्यकारणभाव -सम्बन्धः, अविनाभावसम्बन्धः( पृथक्स्थित्यभावसम्बन्धः) अपि तु समयसम्बन्धः। प्रोक्तञ्च-

**शब्दार्थयोः समयापरनामा वाच्यवाचकभावः सम्बन्धः** ( न्या.मं.)

अपि च

**शब्दार्थव्यवस्थानादप्रतिषेधः सामयिकत्वाच्छब्दार्थसम्प्रत्ययस्य** ( न्या.सू. २.१.५४-५५)

विशेषः- भामहोऽपि

**ईयन्त ईदृशा वर्णा ईदृगर्थाभिधायिनः।**
**व्यवहाराय लोकाय प्रागित्थं समयः कृतः।।** ( का.अ.६.१३)

अपि च- कणादः - **सामायिकः शब्दार्थप्रत्ययः**। ( वै.सू.७.२.२०)

विशेषः-शब्दः अनुमानविधयैव अर्थप्रत्यायकः।यथा प्रत्यक्षेणाज्ञायमानं साध्यं ज्ञातेन लिङ्गेन पश्चान्मीयतेऽनुमानस्थले, तथैव ज्ञातेन(श्रुतेन) शब्देन पश्चात् अर्थो ज्ञायते।

**भाषावैज्ञानिकदृष्ट्याप्रतीकात्मकः**

अर्थो वैयक्तिकः। अर्थादर्थः पूर्णतः व्यक्तिगतः - कस्य शब्दस्य कः अर्थः भवेदिति वक्तृगत एव भवति।( डा .शिलार स्ट्रोगश्च) ।अर्थः सम्बन्धविशेषः, यो न केवलं शब्दे, अर्थेऽपि भवति( डा.रसेलः)। अर्थः आन्तरिकभावनानामिच्छानां वा सक्रियप्रतीकरूपः( डा . पार्सन्सः)। यच्छब्दाः भावप्रतीकाः( फ्रेचविद्वान् देर्मेस्तेतः) इत्यादिवचनेन तेषां ग्रन्थानामध्ययनेन ज्ञायते शब्दार्थयोः सम्बन्धः प्रतीकात्मकः।

**विशेषः- नास्तिशब्दार्थयोःसम्बन्धः कः इतिजीज्ञासायामुच्यते -**

**१. संयोगः**

अग्निशब्दोच्चारणे मुखस्य दाहानुपलम्भात् , मधुशब्दोच्चारणे मुखस्य माधुर्यानुपलम्भात्

क्षुरशब्दोच्चारणे मुखस्य पाटनप्रसङ्गानुलम्भात् वाकुण्डबदरयोरिव घटभूतलयोरिव वा संयोगसम्बन्धः शब्दार्थयोर्नास्ति। यथा वा दण्डी इत्यत्र दण्डेन सह संयोगसम्बन्धो भवति तद्वदत्र न । यस्य सम्बन्धः स प्रतियोगी यस्मिन् च सम्बन्धः स अनुयोगी। यथा -हस्ते पुस्तकमस्ति इति वाक्ये हस्तपुस्तकयोः संयोगसम्बन्धे हस्तः सम्बन्धस्य अनुयोगी पुस्तकं च प्रतियोगी भवति।

**२. समवायः**

घटकपालयोरिव तन्तुपटयोरिव वा समवायसम्बन्धः शब्दार्थयोर्नास्ति । यथा वा एकाक्षः इत्यत्र चक्षुषा सह समवायसम्बन्धो भवति तद्वदत्र न। प्रोक्तञ्च - **संयोगसमवायाविह नेह सम्बन्धो यथाऽन्येषां दर्शनम्** – हेलाराजः।

**३.वास्तविकः**

**शब्दार्थयोर्नास्ति कश्चिद् वास्तवः समन्वय इति बोद्धव्यम् ।**-पुण्यराजः( वा. प. २.४२५)

**पूरणप्रदाहपाटनानुपलब्धेः सम्बन्धाभावः ।** ( न्यायसूत्रम् २.१.५३) अर्थात् अभेदो नास्ति शब्दार्थयोःअग्निशब्दोच्चारणे दाहो न भवति मुखे।

**अन्यथैवाग्निसम्बन्धाद् दाहं दग्धोऽभिमन्यते।**
**अन्यथा दाहशब्देन दाहाद्यर्थः प्रतीयते।।**( वा.प.२.४२५)

**न शब्दोऽर्थेन सङ्गतः । तद्देशान्तरावृष्टेर्विन्ध्यो हिमवता यथा** । ( श्लोकवार्तिकम्, सम्बन्ध ७)

**तद्धर्मणोस्तु ताच्छब्दं संयोगसमवाययोः।**

**तयोरप्युपकारार्था नियतास्तदुपाधयः॥**( वा. प.३. सम्बन्धसमुद्देशः ६)

**बौद्धः**-न शब्दार्थयोः कश्चन सम्बन्धः।

शब्दः न गुणः, न द्रव्यम् तथा च अनित्यः। अन्योन्याभावविशिष्टो विजातीयव्यावृत्तोऽर्थो विधिः, स एवापोहशब्दवाच्यः शब्दानामर्थः प्रवृत्तिनिवृत्तिविषयः। मनः कल्पितांशेनैव शब्दानां सम्बन्धः। प्रोक्तञ्च धर्मकीर्तिना- सर्वे शब्दा विवेकविषया विकल्पाश्च (अर्थात् सम्बन्धाः कल्पितास्सन्ति,तेषां तात्त्विकसत्ता नास्ति) । शब्दो( वर्णसमुदायः/ वर्णः) कल्पनामात्रं विद्यते। कल्पितशब्दैः पदस्य वाक्यरूपसमुदायस्य च कल्पनापि कल्पनामात्रमेव।अतः यदा शब्द एव काल्पनिकः तदा तत्रत्यसम्बन्धोऽपि वास्तविको न शशविषाणे नीलादिकल्पना कल्पनामात्रमेव न तु तद्वस्तु सद्भवति। तद्वदन्यत्रापि सम्बन्धस्य काल्पनिकप्रतीतिर्दृश्यते। पुनश्च तयोः प्रतीतिमात्रं सत्यानुभूतिस्वीकर्तॄणां दृष्ट्या सम्बन्धः सत्यः अन्यथा काल्पनिकः( स्वाभाविको न) इत्यादि।

**४. दैशिकः**

विभिन्नदिक्षुस्थितयोरपि शब्दार्थयोः परस्परं बोध्यबोधकभावदर्शनात्।

**५.कालिकः**

कालेन कृतः सम्बन्धो नास्ति शब्दार्थयोः। यथा कालगन्धयोः सम्बन्धः।

वर्तमानेन शब्देन अतीतानागतार्थयोर्बोधाभावप्रसङ्गात्।

**६. नित्यः**

शब्दस्य योऽर्थः तत्र अर्थसङ्कोचार्थविस्तारार्थादेशादिनां कारणात्। न नित्यः। साङ्केतिक एव शब्दार्थसम्बन्धः, सोऽपि सङ्केतितः शब्दार्थसम्बन्धः समये समये परिवर्तते । इत्यादि।

**उपसंहारः**

शब्दार्थयोःसम्बन्धःवाच्यवाचकभावइतिमीमांसक-वैयाकरण-द्वैत-अद्वैत-विशिष्टाद्वैतादिभाषावैज्ञानिकाः। शब्दार्थयोः सम्बन्धः सर्वदा नियतो नेति प्रायः भाषावैज्ञानिकाः।

शब्दार्थयोः सम्बन्धः नित्यः अनित्यः वेति विषये परस्परं मतभेदाः।शब्दार्थयोः कालिकः, दैशिकः, वास्तविकः, संयोगः, समवायः वेत्यादिसम्बन्धाः नेति सर्वे भाषावैज्ञानिकाः।

**सन्दर्भग्रन्थसूची**

1.न्यायकोशः – महामहोपाध्याय-भीमाचार्यः, S.K.Bolvalkar, Bhandarkar Oriental Research Institute Poona,No 4, तृतीय संस्करण, 1928 ख्रिस्ताब्दः

2.अर्थविज्ञान और व्याकरणदर्शन – कपिलदेव द्विवेदी आचार्य, हिंदुस्तानी एकेडेमी, उत्तरप्रदेश, इलाहाबाद, प्रथम संस्करण 1951

3. लघुमञ्जूषा और अर्थविज्ञान – परमानन्द झा, न्यु भारतीय बुक कार्पोरेशन, 208, द्वितीय तल, 4735/22, प्रकाशदीप भवन, अंसारी रोड, दरियागंज, नई दिल्ली – 110002, प्रथम संस्करण, 2012

4.शब्दार्थतत्त्व-डॉ.शोभाकान्त मिश्र,बिहार हिन्दी ग्रन्थ अकादमी,प्रेमचन्द मार्ग राजेन्द्रनगर पटना-800004 प्र.सं.1986

5.अर्थतत्व की भूमिका- डॉ.शिवनाथ, नागरीप्रचारिणी सभा,काशी, प्रथम संस्करण, सं. 2018 वि.

6.शब्दार्थ-विमर्श(संस्कृतसाहित्य दर्शनशास्त्र एवं व्याकरणशास्त्र के सन्दर्भ में)- देवनारायण मिश्र, देवनारायण मिश्र, सीतापुर, प्रथम संस्करण, 1980

7.शब्दार्थ-दर्शन – रामचन्द्र वर्म्मा, रचना प्रकाशन, इलाहाबाद-1, प्रथम संस्करण, 1968

8. स्फोट-मीमांसा – आचार्य चन्द्रभानु त्रिपाठी, शक्ति प्रकाशन, 34, बलरामपुर हाउस, इलाहाबाद, , प्रथम संस्करण, 1997

9.अर्थतत्व की भूमिका- डॉ.शिवनाथ, नागरीप्रचारिणी सभा,काशी, प्रथम संस्करण, सं. 2018 वि.

10. संस्कृत व्याकरणदर्शन-रामसुरेश त्रिपाठी, राजकमल प्रकाशन दिल्ली-6 प्र19.सं.72

**अन्तर्जालकानि) websites(**

1. www.sanskritdoucuments.org
2. www.dli.serc.iisc.ernet.in
3. www.archive.org
4. www.oudl.osmania.ac.in

# सिद्धान्तकौमुदीवैदिकप्रकरणस्थलौकिकवेदिकोहरणानामनुसन्धानम्

ऋतम्भरापाण्डेयः

बाल्यादेव वेदानभ्यस्यतां जनानां लौकिके संस्कृतप्रयोगे बहुत्रसन्देहः , एवमेव लौकिकसंस्कृतमात्रप्रयोगज्ञानां जनानां च वैदिकप्रयोगे बहुत्रसन्देहो जागर्ति। तत्रायं हेतुः – बहवः तादृशाः व्याकरणस्य विधयः सन्ति ये खलु वैदिकेषु प्रयोगेष्वेव सावकाशाः। न ते विधयः लौकिकप्रयोगेषु प्रवर्तन्ते। अत एव वैदिकप्रयोगाः लौकिकसंस्कृतप्रयोगेभ्यो बहुत्रभिद्यन्ते। महर्षिणा पाणिनिना बहूनि सूत्राणि वैदिकप्रयोगानुद्दिश्य आविर्भावितानि। तानि च सञ्चित्य दीक्षितेन वैयाकरणसिद्धान्तकौमुद्यां स्वतन्त्रं प्रकरणं निर्ममे। तत्र अष्टौ अध्यायाः विभज्यन्ते। तेषु निबन्धमर्यादां विलोक्य अत्र प्रारम्भिकस्य अध्यायत्रयस्योदाहरणानि अनुसन्धीयन्ते।

**प्रथमाध्यायस्थप्रयोगानुसन्धानम्** –

**.1**लौकिकप्रयोगः ’ -पुनर्वसू माणवकौ स्तः ‘ एवं ’गां गताविव दिवः पुनर्वसू ‘ इति। तत्र वैदिकप्रयोगः ’ -पुनर्वसुनक्षत्रमदितिर्देवता‘ इति ’पुनर्वसू नक्षत्रमदितिर्देवता ‘ इति च। विशेषः– अत्र द्विवचनस्य स्थाने एकवचनादेशः।प्रधानसूत्रम्– छन्दसि पुनर्वस्वोरेकवचनम्।

’ - लौकिकप्रयोगः .**2**विशाखे स्थः ‘। तत्र वैदिकप्रोगः ’ -विशाखं नक्षत्रमिन्द्राग्नी देवता‘। विशाखे नक्षत्रमिन्द्राग्नी देवता।विशेषः – अत्र द्विर्वचनस्य स्थाने एकवचनादेशः। प्रधानसूत्रम्– विशाखयोश्च।

**.3**लौकिकप्रयोगः [1] भूपतये इति रूपद्वयम् , समासे च भूपतिना ,पत्ये, पत्या -। तत्र वैदिकप्रयोगः -क्षेत्रस्य पतिना वयम्। क्षेत्रस्य पत्या वयम् [2]। कुलुञ्चानां पतये नमः। कुलुञ्चानां पत्ये नम [3]।विशेषः– अत्र षष्ठ्यन्तपतिशब्दस्य विकल्पेन घिसञ्ज्ञाविधानम्। प्रधानसूत्रम्– षष्ठीयुक्तश्छन्दसि वा।

**.4**लौकिकप्रयोगः [4]नभस्वत्। अङ्गिरस्वदङ्गिरः -। मनुष्वदग्ने। तत्रवैदिकप्रयोगः - –अङ्गिरोवदित्यादि। विशेषः ,नभोवत् अत्र वतिप्रत्यये परे पदसञ्ज्ञायाः सावकाशत्वे ऽपि तं बाधित्वा भसञ्ज्ञा विधीयते। प्रधानवार्त्तिकम्– नभोऽङ्गिरोमनुषां वत्युपसंख्यानम्।

–लौकिकप्रयोगः.**5** वषवसुः । वृषाश्वः । तत्रवैदिकप्रयोगः – वृषण्वसुः । वृषणश्वः ।विशेषः– अत्र भसञ्ज्ञाविधानम् । प्रधानवार्त्तिकम्– वृषण्वस्वश्वयोः ।

**.6**लौकिकप्रयोगः अयोमयम् । - ऋग्वता । वागिनेषु । तत्रवैदिकप्रयोगः अयस्मयं-[5] वर्म । अयस्मयानि पात्राणि । स सुष्टभा स ऋक्वता गणेन । नैनं हिन्वन्त्यपि वाजिनेषु[6]।विशेषः– अत्रहि प्रकृतिप्रत्ययसमुदायरूपाः शब्दाः पठिताः तत्र पदसञ्ज्ञा इति , भसञ्ज्ञा इति चोभयमपि विधीयते । तत्र प्रधानसूत्रंवार्त्तिकञ्च–अयस्मयादीनि च्छन्दसि , उभयसञ्ज्ञान्यपीति वक्तव्यम् ।

**.7**लौकिकप्रयोगः याति नि हस्तिना ।- नियाति । निहन्ति । तत्रवैदिकप्रयोगः -[7]नियाति हस्तिना। हन्ति नि मुष्टिना । निहन्ति स मुष्टिना ।विशेषः– अत्र धातोः परत उपसर्गाणां प्रयोगः । प्रधानसूत्रम्– छन्दसि परेऽपि ।

**.8**लौकिकप्रयोगः–आयाहि । तत्र वैदिकप्रयोगः–हरिभ्यां याह्योक आ । आ मन्द्रैरिन्द्र हरिभिर्याहि[8] ।विशेषः – अत्र धातोः व्यवहितो ऽपि उपसर्गाणां प्रयोगः । प्रधानसूत्रम् – व्यवहिताश्च।

**.9**लौकिकप्रयोगः–समीधे । ईधे । बभूव । तत्र वैदिकप्रयोगः ' -समीधे दस्युहन्तमम्'। पुत्र ईधे अथर्वणः । बभूव ।विशेषः – अत्र लिटः किद्विधानम् । प्रधानसूत्रम् – इन्धिभवतिभ्यां च ।

**द्वितीयाध्यायस्थप्रयोगानुसन्धानम् –**

**.1**लौकिकप्रयोगः यवागूम् अग्निहोत्रं जुहोति -। तत्रवैदिकप्रयोगः यवाग्वा-ऽग्निहोत्रं जुहोति । यवागूम् अग्निहोत्रं जुहोति ।विशेषः – अत्र कर्मणि स्थाने तृतीया विधानम् । प्रधानसूत्रम् –तृतीया च होश्छन्दसि ।

**.2**लौकिकप्रयोगः – शतस्य दीव्यति । तत्र वैदिकप्रयोगः गामस्य तदहः सभायां - षष् - दीव्येयुः ।विशेषःठीस्थाने द्वितीयाविभक्त्याः विधानम् । प्रधानसूत्रम् – द्वितीया ब्राह्मणे ।

– लौकिकप्रयोगः .**3**पुरुषमृगश्चन्द्रमसे । गोधाकालकादार्वाघाटस्ते वनस्पतिभ्यः । तत्र वैदिकप्रयोगः – पुरुषमृगश्चन्द्रमसः । गोधाकालकादार्वाघाटस्ते वनस्पतीनाम् । विशेषः - चतुर्थीविभक्त्यर्थे षष्ठीविभक्त्याः विधानम् । प्रधानसूत्रम् – चतुर्थ्यर्थे बहुलं छन्दसि ।

.**4** लौकिकप्रयोगः – या खर्वेण पिबति तस्याः खर्वः । तत्र वैदिकप्रयोगः - या खर्वेण पिबति तस्यै खर्वः । विशेषः – षष्ठ्यर्थे चतुर्थी विधानम् । प्रधानवार्त्तिकं –षष्ठ्यर्थे चतुर्थीति वाच्यम् ।

.**5**लौकिकप्रयोगः – घृतेन यजते । तत्र वैदिकप्रयोगः घतस्य घृतेन वा यजते । - – विशेषः अत्र यज्धातोः करणे बाहुलकेन षष्ठीविधानम् ।प्रधानसूत्रम् – यजेश्च करणे ।

– लौकिकप्रयोगः .**6** अघसत् । जिघत्सति । वैदिकप्रयोगः – घस्तां नूनम् । सग्धिश्च मे । विशेषः – अत्र बाहुलकेन अदः घस्लादेशः । प्रधानसूत्रम् – बहुलं छन्दसि ।

– लौकिकप्रयोगः.**7** हेमन्तशिशिरे । अहोरात्रः । तत्र वैदिकप्रयोगः – हेमन्तशिशिरौ ।

अहोरात्रे ।

विशेषः – अत्र द्वन्द्वसमासे पूर्ववल्लिङ्विधानम् । प्रधानसूत्रम् - हेमन्तशिशिरावहोरात्रे च छन्दसि ।

– लौकिकप्रयोगः .**8** हन्ति । शेते । त्रायध्वम् । तत्र वैदिकप्रयोगः वृत्रं हनति वृत्रहा - । अहिः ॑ शयत उपपृक्पृथिव्याः[9] । त्राध्वं नो देवाः । विशेषः – अत्र धातोः बाहुलकात् शपो विधानम् । प्रधानसूत्रम् – बहुलं छन्दसि ।

– लौकिकप्रयोगः .**9** ददाति । वष्टि । तत्र वैदिकप्रयोगः दाति - ॑ प्रियाणि चिद्वसु। पूर्णां विवष्टि । विशेषः – अत्र धातोः बाहुलकात् श्लुरादेशः । प्रधानसूत्रम् – बहुलं छन्दसि ।

– लौकिकप्रयोगः .**10** अघसत् । आह्वार्षीत् । अनशत् । अवारीत् । अधाक्षीत् । अप्रासीः । अवर्जीत् । अकार्षुः । अन्वगमन् । अजनिष्ट । तत्र वैदिकप्रयोगः - अक्ष ॒न्नमीमदन्त हि । माह्वर्मित्रस्य । धूर्तिः प्रणङ्क्त्यर्स्य । सुरूचो वेन आवः [10] । मा न आधक् । आ प्रा द्यावापृथिवी । परावग्भारभृद्यथा। अक्रन्नुषासः। ते रयिं जागृवांसो अनुग्मन् ।'अज्ञत वा अस्य दन्ताः [11]'।न ता अगृभ्णन्नजनिष्ट हि षः। विशेषः – अत्र च्लेर्लुग् भवति । प्रधानसूत्रम् – मन्त्रे घसह्वरणशवृदहाद्वृज्कृगमिजनिभ्यो लेः ।

**तृतीयाध्यास्थप्रयोगानामनुसन्धानम्** –

**.1** लौकिकप्रयोगः – अभ्युदसीषदत् । प्राजीजनत् । अचैषीत् । अरीरमत् । पाव्यात् । अवेदिषुः । तत्र वैदिकप्रयोगः अभ्युत्सादयामकः । प्रजनयामकः । चिकयामकः । रमयामकः - – । पावयांक्रियात् । विदामक्रन् इति । विशेषः अत्र एते प्रयोगाः निपात्यन्ते । प्रधानसूत्रम् – अभ्युत्सादयांप्रजनयांचिकयांरमयायकः पावयांक्रियाद् विदामक्रन्निति च्छन्दसि ।

– लौकिकप्रयोगः **.2** अगौप्तम् । तत्र वैदिकप्रयोगः इमान्नौ मित्रावरुणौ - गृहा ॒नजूं॑गुपतं युवम् । विशेषः – अत्र विकल्पेन गुपूधातोः च्लेश्चङादेशः । प्रधानसूत्रम् – गुपेश्छन्दसि ।

**.3** लौकिकप्रयोगः – औननत् । अदिध्वनत् अदध्वनद्वा । तत्र वैदिकप्रयोगः मा - त्वा ॑य॒तो ज॑रि॒तुः काम॑मूनयीः । मा त्वा॒ग्निर्ध्व॑नयीत् । विशेषः – अत्र च्लेश्चङादेशस्य निषेधः । प्रधानसूत्रम् – नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः ।

**.4** लौकिकप्रयोगः – अकार्षम् । अमृत । अदारीत् । अरुक्षत् । वैदिकप्रयोगः इ - ॒दं तेभ्योऽक॒रं नमः॑ । अमरत् । अदरत् । यत्सानो॒ः सानु॒मारु॑हत् । विशेषः – अत्र विकल्पेन च्लेरङादेशः । प्रधानसूत्रम् – कृमृदृरुहिभ्यश्छन्दसि ।

– लौकिकप्रयोगः **.5** कृत्यः ,चेयं,स्तव्यः ,भव्यः,खेयं ,मर्य्या ,उन्नेयः ,प्रणेयः ,देवहुः, निष्टर्क्य चिन्वीत पशुकामः । स्प- ब्रह्मवधम् । तत्र वैदिकप्रयोगः ,ब्रह्मवोद्यम् ॑र्धन्ते॒ वा उ॑ दे॒वहू॒ये॑ । प्रणीयः। उन्नीयः। उच्छिष्यः । मर्यः । स्तर्या । ध्वर्यः । खन्यः । खान्यः । शु॒न्ध॑ध्व॒ं दैव्या॑य॒ कर्म॑णे दे॒वयज्यायै॑ । आ॒पृच्छ्यं॑ ध॒रुणं॑ वा॒ज्य॑र्षति । प्रतिषीव्यः । ब्रह्मवाद्यम् । भाव्यः । स्ताव्यः । उपचाय्यपृडम् । उपचेयपृडम् ।विशेषः – अत्र एते कृत्यप्रत्ययाः निपात्यन्ते । प्रधानसूत्रम् छन्दसि-निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्य भाव्यस्ताव्योपचाय्यपृडानि ।-

**.6** लौकिकप्रयोगः 'उपचाय्यपृडम्- उपचेयपृडम् । तत्र वैदिकप्रयोगः - इति । विशेषः – अत्र यत्प्रत्यये स्थाने ण्यद्विधानम् । प्रधानवार्त्तिकम् - हिरण्य इति वक्तव्यम् ।

– लैकिकप्रयोगः .7 वनोति । सनोति ।रक्षति । हविः मन्थति । तत्र वैदिकप्रयोगः - ब्रह्मवनिं त्वा क्षत्रवनिम् । उत नो गोषणिं धियम् । चतुरक्षौ पथिरक्षी । हविर्मथीनामभि [12] । विशेषः – अत्र कर्मणीन्प्रत्ययस्य विधानम् । प्रधानसूत्रम् – छन्दसि वनसनरक्षिमथाम् ।

– लौकिकप्रयोगः .8तुरासाह् । तत्र वैदिकप्रयोगः – पृतनाषाट् । विशेषः- अत्र सुप्युपपदे सहेर्ण्विः प्रत्ययः । प्रधानसूत्रम् – छन्दसि सहः ।

– लौकिकप्रयोगः .9 दित्यवाह् । तत्र वैदिकप्रयोगः दित्यवाट् । विशेषः – अत्र सुप्युपपदे वहेर्ण्विः प्रत्ययः । प्रधानसूत्रम् – वहश्च ।

– लौकिकप्रयोगः .10 कव्यवाहः - पुरीषवाहः । तत्र वैदिकप्रयोगः ,पुरीषवाहः , – कव्यवाहनः । पुरीषवाहनः । पुरीष्यवाहनः । विशेषः अत्र वहेर्ज्युट् विधानम् । प्रधानसूत्रम् – कव्यपुरीषपुरीष्येषु ञ्युट् ।

– लोकिकप्रयोगः .11 हव्यवाहः । हव्यवाहनः । तत्र वैदिकप्रयेगः अ-ग्निश्च हव्यवाहनः । हव्यवाळग्निरजरः पिता नः । विशेषः – अत्र वहेर्ज्युटो विधानम् । प्रधानसूत्रम् - हव्येऽन्तःपादम् ।

**.12**लौकिकप्रयोगः – अब्जः । गोजः । गोसः। बिसखः । दधिक्रः । अग्रेगः । तत्र वैदिकप्रयोगः –अब्जाः । गोजाः । गोषा इन्दो नृषा असि । इयं शुष्मेभिर्बिसखा इवारुजत् । आ दधिक्राः शवसा पञ्च कृष्टीः । अग्रेगाः । विशेषः – अत्र विड्विधानम् । प्रधानसूत्रम् – जनसनखनक्रमगमो विट् ।

– लौकिकप्रयोगः .13 वाहः । शसः । दाशः । तत्र वैदिकप्रयोगः श्वेतवाः । - श्वेतवाहौ । श्वेतवाहः । उक्थानि उक्थैर्वा शंसति उक्थशाः यजमानः । उक्थशासौ । उक्थशासः – । पुरो दाश्यते दीयते पुरोडाः । विशेषः अत्र एते ण्विन्प्रत्ययान्ताः निपात्यन्ते । प्रधानसूत्रम् – मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् ।

– लौकिकप्रयोगः .14 अवयजन । तत्र वैदिकप्रयोगः – अवयाः ,अवयाजौ , –अवयाजः । विशेषः ण्विन्प्रत्ययविधानम् । प्रधनसूत्रम् – अवे यजः ।

– लौकिकप्रयोगः .15 हे श्वेतवाह हे - हे उक्थश । तत्र वैदिकप्रयोगः ,हे पुरोडाश , हे प , हे श्वेतवाः , अवयाः ुरोडाः एते शब्दाः सम्बुद्धौ कृतदीर्घाः - हे उक्थशाः ।विशेषः , – निपात्यन्ते । प्रमुखसूत्रम् अवयाः श्वेतवाः पुरोडाश्च ।

– लौकिकप्रयोगः .16 यजन् । तत्र वैदिकप्रयोगः – उपयट् । विशेषः – अत्र उपे उपपदे यजेर्विच्प्रत्ययविधानम् । प्रधानसूत्रम् – विजुपे छनदसि ।

– लौकिकप्रयोगः .17 सुदामा । सुधीः । घृतपः । भूरिदावः । सुपीवः । कीलालपः । तत्र वैदिकप्रयोगः –सुदामा । सुधीवा । सुपीवा । भूरिदावा । घृतपावा । कीलालपाः। अश्वत्थामा ।विशेषः – अत्र सुप्युपसर्गे चोपपदे आदन्तधातुभ्यः मनिन् ,क्वनिप् , वनिप्प्रत्ययाः। प्रमुखसूत्रम ् – आतो मनिन्क्वनिब्वनिपश्च ।

ब्रह्माहा । ब्रूणहा । वृत्रहा । चक्राणा । अरिरवान् ।साधु - लौकिकप्रयोगः .18 मातृहा । पितृहा । अ - पारयति । साधु भविता । तत्र वैदिकप्रयोगः ्हं द्यावापृथिवी आ ततान । चक्राणा वृष्णि । यो नो अग्ने अररिवाँ अघायुः । वीरुधः पारयिष्णवः। भविष्णुः ।विशेषः – अत्र बाहुलकेन क्विब्विधानम् विकल्पेन , भूतसामान्ये लिड्विधानम् , – धातोः तच्छीलादौ अर्थे च इष्णुच्प्रत्ययः । प्रधानसूत्राणि ,कानच्क्वस्वोः विधानम् बहुलं छन्दसि भुवश्च । ,णेश्छन्दसि ,क्वसुश्च ,लिटः कानज्वा ,छन्दसि लिट् ,

– लौकिकप्रयोगः .19 अघं कर्तुमिच्छति । तत्र वैदिकप्रयोगः – अघायुः । विशेषः - – परेच्छायां क्यच् प्रत्ययो। प्रमुखवार्त्तिकम्छन्दसि परेच्छायां क्यच उपसंख्यानम् ।

– लौकिकप्रयोगः .20 जवः । सवः । तत्र वैदिकप्रयोगः जवे याभिर्यूनः । - ऊर्वोरस्तुर्मे ज ्वः । अयं मे पञ्चौदनः सवः [13]। देवस्य सवितुः सवे । विशेषः – अपः स्थाने अज्विधानम् । प्रधानवार्त्तिकम् – एरजधिकारे जवसवौ छन्दसि वाच्यौ ।

रातिः। तत्र ,वीतिः,भूतिः ,वित्तिः ,मतिःपक्तिः,वृष्टिः - लौकिकप्रयोगः .21

वृ - वैदिकप्रयोगः ्ष्टिं

दिवः । सुम्नमिष्टये पंचात्पक्तीरुत । इयं ते नव्यसी मतिः । वित्तिः । भूतिः ।अग्न आ याहि वीतये[14] । रातौ स्यामोभयासः । विशेषः – उदात्तक्तिन्प्रत्ययविधानम् । प्रमुखसूत्रम् –मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः।

– लौकिकप्रयोगः **.22** सूपसदनम्। तत्र वैदिकप्रयोगः सूपसदनो -ऽग्निः। विशेषः – अत्र कृच्छ्राकृच्छ्रेर्थेषु ईषदादिषूपपदेषु गत्यर्थेभ्यो धातुभ्यो युच्प्रत्ययः। प्रमुखसूत्रम् – छन्दसि गत्यर्थेभ्यः।

– लौकिकप्रयोगः **.23** वेदनम्। तत्र वैदिकप्रयोगः सु-ऀवेदनामंकृणोर्ब्रह्मणे गाम्। विशेषः – गत्यर्थभिन्नेभ्यः धातोः युच्प्रत्ययः। प्रधानसूत्रम् अन्येभ्यो -ऽपि दृश्यते।

– लौकिकप्रयोगः **.24** गच्छतु – मृणाति। तत्र वैदिकप्रयोगः ,करोतु ,देवो देवेभिरागमत्। इदं तेभ्योकरं नमः। अग्निमद्य होतारमवृणीतायं यजमानः। अद्या ममार स ह्यः समान। विशेषः – धात्वर्थानां सम्बन्धे सर्वकालेषु लुङ् लिड्लकाराणां प्रयोगाः। ,लङ् , छन्दसि लुङ्लङ्लिटः। - प्रधानसूत्रम्

– वैदिकप्रयोगः **.25**प्रण आयूंषि तारिषत्। सुपेशस्करति जोषिषद्धि। आ साविषदर्शसानाय। पताति विद्युत्। प्रियः सूर्ये प्रियो अग्ना भवाति।विशेषः – एतेलेट्लकारस्य रूपाणि। प्रधानसूत्रम् –लिङर्थे लेट्।

**.26**तत्र वैदिकप्रयोगः – करवाव। करवावः। विशेषः – अत्र लेड्लकारे उत्तमपुरुषे विकल्पेन सकारस्य लोपो विधानम्। प्रधानसूत्रम् –स उत्तमस्य।

**.27** वैदिकयोगः – सुतेभिः सुप्रयसा मादयैते। यो यजाति यजत इत्। विशेषः – अत्र लेड्लकारे आकारस्य स्थाने ऐकारादेशो विधानम्। प्रधानसूत्रम् आत ऐ। -

– वैदिकप्रयोगः **.28**पशूनामीशै। मदग्रा एव वो ग्रहा गृह्यान्तै। सुप्रयसा मादयैते। विशेषः –अत्र एकारस्य स्थाने विकल्पेन ऐकारादेशः लेट्लकारे। प्रधानसूत्रम् वैतो -ऽन्यत्र।

– वैदिकप्रयोगः **.29**अहमेव पशूनामीशै। नेज्जिह्मायन्त्यो नरकं पताम।विशेषः – अत्रोपसंवादे आशङ्कायाञ्च धातोर्लेट् प्रत्ययः। प्रधानसूत्रम् – उपसंवादाशङ्कयोश्च।

– लौकिकप्रयोगः **.30** गृहाण जहार। तत ,गृह्णामि ,मुषाण ,ऀर वैदिकप्रयोगः – गृभाय जिह्वया मधु। बधान देव सवितः। गृभ्णामि ते। मध्वा जभार ' इति। विशेषः – श्नः शायजादेशः – हृधातोः ग्रह्धातोश्च हकारस्थाने भकारादेशः।प्रधानसूत्रं वार्त्तिकञ्च, छन्दसि शायजपि हृग्रहोर्भश्छन्दसि। ,

– लौकिकप्रयोगः.**31** भिनत्ति – तरेम् । तत्र वैदिकप्रयोगः ,नयतु,म्रियते ,आण्डा शुष्णस्य भेदति। जरसा मरते पतिः । ताश्चिन्नु न मरन्ति [15]। इन्द्रो वस्तेन नेषतु । इन्द्रेण युजा तरुषेम वृत्रम् ।विशेषः – अत्र विकरणानां बहुलप्रकारेण व्यत्ययो विधानम् ।प्रधानसूत्रम् – व्यत्ययो बहुलम् ।

– लौकिकप्रयोगः.**32**दक्षिणस्य ,वियूयात् ,मधुनि,युध्यति ,इच्छति ,तक्षन्ति , – मित्रा वयम् । तत्र वैदिकप्रयोगः ,अधुक्षत्धुरि दक्षिणायाः। चषालं ये अश्वयूपाय तक्षति । ब्रह्मचारिणमिच्छते । प्रतीपमन्य ऊर्भिर्युध्यति । मधोस्तृप्ता इवासते । अधा स वीरैर्दशभिर्वियूयाः । श्वो ऽग्नीनाधास्यमानेन । तमसो गा अदुक्षत् । मित्रं वयं च सूरयः । अन्नादाय । विशेषः – अत्र सुप्तिङुपग्रहलिङादीनां व्यत्ययः । प्रधानसूत्रम् – व्यत्ययो बहुलम् ।

– लौकिकप्रयोगः .**33**उच्यात् । तत्र वैदिकप्रयोगः – मन्त्रं वोचेमाग्नये । विशेषः – अत्रआशीर्लिङि परे धातोरङादेशः । प्रधानसूत्रम् –लिङ्याशिष्यङ् ।

– लौकिकप्रयोगः.**34**दृश्येयम्।तत्र वैदिकप्रयोगः –पितरं च दृशेयं मातरं च ।विशेषः –अत्र दृशि धातोः आर्शीलिङि अकादेशः ।प्रधानवार्त्तिकम् दृशेरग्वक्तव्यः । -

– लौकिकप्रयोगः.**35** वर्धयन्तुशुश् ,रुवुः। तत्र वैदिकप्रयोगः –वर्धन्तु त्वा सुष्टुतयः । ससृवांसो विशृण्विरे । बभ्रिर्वज्रम् पपिः सोमं ददिर्गाः । जग्मिर्युवा । जघ्निर्वृत्रममित्रियम् । जज्ञिः । ततुरिः । जगुरिः ।विशेषः – अत्र धात्वधिकारे उक्तप्रत्ययाः सार्वधातुकाः , आर्धधेतुकाश्च ोभयथा भवन्ति । प्रधानसूत्रम् –छन्दस्युभयथा ।

.**36**लौकिकप्रयोगः –वक्तुं– सोतुम् । तत्र वैदिकप्रयोगः ,कर्तुं ,जीवितुं ,वक्षे रायः । ता वामेषे । शरदो जीवसेधाः [16]। प्रेषे । गवामिव श्रियसे । जठरं पृणध्यै । आहुवध्यै । राधसः सह मादयध्वै । वायवे पिबध्यै । दातवाउ । सूतवे । कर्तवे ।विशेषः – अत्र तुमर्थे धातोः से , ,तवैङ् ,तवै ,शध्यैन् ,शध्यै ,कध्यैन् ,कध्यै ,अध्यैन् ,अध्यै ,कसेन् ,क्से ,असेन् ,असे ,सेन् तुमर्थे - तवेन् इत्येते पञ्चदश प्रत्ययाः विधीयन्ते ।प्रधानसूत्रम् सेसेनसेऽसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः ।-

**.37**लौकिकप्रयोगः –प्रयातुं[17]अव्यथितुम् ,रोढुम् ,। तत्र वैदिकप्रयोगः –प्रयै । रोहिष्यै । अव्यथिष्यै । विशेषः – अत्र तुमर्थे प्रयै अव्यथिष्यै इत्येते शब्दाः निपात्यन्ते । ,रोहिष्यै , प्रयै रोहिष्यै अव्यथिष्यै । - प्रधानसूत्रम्

**.38**लौकिकप्रयोगः –द्रष्टुं– विख्यातुम् । तत्र वैदिकप्रयोगः ,दृशे विश्वाय सूर्यम् । विख्ये त्वा हरामि । विशेषः – अत्र दृशे विख्ये इत्येतौ शब्दौ तुमर्थे निपात्येते। प्रधानसूत्रम् – दृशे विख्ये च ।

– लौकिकप्रयोगः.**39**विभक्तुम् ,अपलोप्तुम् । तत्र वैदिकप्रयोगः –विभाजं नाशकत् , – अग्निं वै देवा विभाजं नाशक्नुवन् । अपलुपं नाशकत् । विशेषःअत्र शक्धातूपपदे तुमर्थे धातोर्णमुल्कमुलौ प्रत्ययौ । प्रधानसूत्रम् –शकि णमिल्कमुलौ ।

**.40**लौकिकप्रयोगः –विरचितुं – विलेखितुम् । तत्र वैदिकप्रयोगः ,ईश्वरो विचरितो । ईश्वरो विलिखः ।विशेषः –अत्र ईश्वरशब्दोपपदे तुमर्थे धातोः तोसुन्कसुनौ प्रत्ययौ ।प्रधानसूत्रम् –ईश्वरो तोसुन्कसुनौ ।

**.41**लौकिकप्रयोगः –न म्लेच्छितव्यम् कृत्यम् । तत्र ,दिदृक्षणीयः ,अवगाहितव्यम् , –वैदिकप्रयोगःन म्लेच्छितवै । अवगाहे । दिदृक्षेण्यः । भूर्यस्पंष्ट कर्त्वम् ।विशेषः –अत्र कृत्यार्थे कृत्यानामर्थो भावकर्मणी तवै– त्वन् एते प्रत्ययाः । प्रधानसूत्रम् ,केन्य ,केन् ,कृत्यार्थे तवैकेन्केन्यत्वनः ।

**.42**लौकिकप्रयोगः – अवख्यातव्यम् । तत्र वैदिकप्रयोगः –रिपुणा नावचक्षे । विशेषः – अत्र अवपूर्वात् चक्षिङ्धातोः एश्प्रत्ययो निपात्यते। प्रधानसूत्रम् –अवचक्षे च ।

**.43**लौकिकप्रयोगः – सीदितुम् विजनितुम्। ,आतमितुं ,प्रचरितुम् ,अपकर्तुं ,उदेतुं , – तत्र वैदिकप्रयोगःआसंस्थातोः सीदन्ति । उदेतोः । अपकर्त्तोः । प्रवदितोः । प्रचरितोः [18] । होतोः । आतमितोः [19] । 'काममाविजनितोः संभवामः [20]' ।विशेषः – अत्र भावलक्षणे स्था , जनि एतेभ्यो धातुभ्यः तुमर्थे तोसुन् प्रत्ययो विधीयते । ,तमि ,हु ,चरि ,वदि ,कृञ् ,इण् भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् ।- प्रधानसूत्रम्

**.44** लौकिकप्रयोगः सर्पितुम् –। तत्र वैदिकप्रयोगः –पुरा क्रूरस्य विसृपो विरप्शिन्। पुरा जत्रुभ्य आतृदः। विशेषः – अत्र भावलक्षणे सृपि तृद आभ्यां धातुभ्यां तुमर्थे कसुन् प्रत्ययः।प्रधानसूत्रम् सृपितृदोः कसुन्। -

**उपसंहारः**– तदेवं वैदिक्याः प्रथमद्वितीयतृतीयाध्यायानां वैदिकप्रयोगान् सङ्कलय्य तेषां लौकिकप्रयोगाँश्च समुद्धृत्य तत्रत्यं विशेषञ्च विनिर्देश्य तत्रत्यं प्रधानसूत्रञ्च शोधपत्रेऽत्र समुपनिबद्धम्। अष्टस्वध्यायेषु एव एतादृशः प्रयासः करणीयो यतः सन्देहस्यावसरः अपसरेत्।

**सन्दर्भः-**

1. वैदिकी प्रक्रिया – पृ. - 3
2. वैयाकरणसिद्धान्तकौमुदी –पृष्ठम् 381
3.काशिकावृत्तिः –पृष्ठम् 441
4. ऋग्वेदः - 1/31/17
5. काशिकावृत्तिः – पृ. 525
6. वैयाकरणसिद्धान्तकौमुदी – पृ. 382 , का.- 325
7. काशिकावृत्तिः – पृ. 614
8. ऋग्वेदः – 3/45/1
9. ऋग्वेदः – 1/32/5
10. वाज. 13/3
11. ऐत. ब्रा. – 33/2
12. ऋग्वेदः - 7/104/21
13. महाभाष्यम् – पृ. 306
14. सा. वे. 1/1/1
15. काशिकावृत्तिः – पृ. 461
16. ऋग्वेदः – 3/36/10
17. वैदिकीप्रक्रिया – पृ. 39

18. गोपथब्राह्मणः – 2/2/10
19. तै. ब्रा. – 1/4/4/2
20. तैत्ति. सं. – 2/5/1/5

उपयुक्तसंसाधनम्–

1.धातुरूपाणि

2.वाचस्पत्यम् ।

3.शब्दकल्पद्रुमः ।

***

# न्यायविभागः

# विलक्षणं सिद्धान्तलक्षणम्

ना.रा. श्रीधरन्
सहायकाचार्यः न्यायविभागः
रा.सं.सं. मा.वि. गुरुवायूर् परिसरः

श्रीरस्तु। प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणात्यन्ताभावप्रतियोगितानच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं हेतौ व्याप्तिः इति सिद्धान्तलक्षणमुक्तम्। तदपक्षेया प्रतियोग्यसमा नाधिकर-हेतुसमानाधिकरणाभावभिन्नाभावप्रतियोगितावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यं हेतौ व्याप्तिः इति कथनेन वह्निमान् धूमात् इत्यादौ प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणाभावः घटाभावः तद्भिन्नाभावः साध्या (वह्नय) भावः तत्प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं धूमे इति लक्षणसमन्वयसंभवात् अनवच्छेदकत्वानुसरणं व्यर्थम् इति चेत् उ च्यते, घटः वाच्यः ज्ञेयत्वात् इत्यत्र हेतुसमानाधिकरणपटत्वाभावभिन्नसाध्या (वाच्यत्वा) भावस्य अप्रसिद्ध्या समवायितया वाच्यत्वाभावमादाय अर्थात् सा ध्याभावप्रसिद्धिसंपादनेऽपिव्याप्यवृत्तिसाध्यकव्याप्तौ हेतुसमानाधिकरणाभावीय प्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वस्य निवेशेन तस्य लक्षणस्य धूमवान् वह्ने इत्यत्र अतिव्याप्तिः। हेतुसमानाधिकरणसमवायसंबन्धावच्छिन्न - प्रतियोगिताकाभावभिन्नसंयोगसंबन्धावच्छिन्नधूमत्वावच्छिन्नप्रतियोगिताकाभावीयप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके धूमत्वेसत्वात्। लघुधर्मसमनियतगुरुधर्मस्य अभावप्रतियोगितानवच्छेदकत्वपक्षे प्रमेयवह्निमान् धूमात् इत्यत्र अव्याप्तेश्च धूमाधिकरणपर्वतनिष्ठघटाभाव - भिन्नप्रमेयवह्न्यभावस्य हेतुसमानाधिकरणाभावभिन्नाभावपदेन उपादातुमशक्यतया अभावभिन्ना - भावप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके प्रमेयवह्नित्वे असत्वात्।

यद्यपि अभावभिन्नाभावकल्पेऽस्मिन् (विलक्षणसिद्धान्तलक्षणे) पटः-घटाभावभिन्नः – पटत्वात् इत्यत्राव्याप्तिः – प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणघटाभावस्तद्भेदस्य घटाभावभेदाभावे साध्याभावे असत्वात्। भेदाभावस्य भेदीयप्रतियोगित्वरूपत्वमितिपक्षे घटाभावघटाभावभेदाभावयोरैक्यात्। न च तादृशाभाववृत्यनुयोगिताभिन्नानुयोगिता

प्रतियोगितावच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति विवक्षणे न निरुक्तदोषः निरूपकप्रतियोगितयोर्भेदेन घटाभावत्वघटभावभेदाभावत्वयोः अनुयोगितयोः भेदात् इति वाच्यम्। एवं सति पटः संयोगसंबन्धावच्छिन्नवाच्यत्वाभावभिन्नः वाच्यत्वात् इत्यत्रातिव्याप्तेः प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरण-साध्याभावत्वरूपानुयोगितानिरूपितत्वस्य साध्याभावीयप्रतियोगितायां स त्वात्। संयोगसंबन्धावच्छिन्नवाच्यत्वाभावभिन्नाभावस्य (संयोगसंबन्धावच्छिन्नवाच्यत्वाभावभेदाभावस्य) साध्याभावरूपस्य वाच्यत्वाभावत्वरूपतया तस्य च (वाच्यत्वाभावस्य च) तादृशानुयोगिता (हेतुसमानाधिकरणप्रतियोग्यसमानाधिकरणसाध्या - भाववृत्यनुयोगिता) भिन्नत्वात्। भेदाभावस्य स्व (भेद) प्रतियोगितावच्छेदकरूपत्वात्। संयोगसंबन्धावच्छिन्नवाच्यत्वाभावभेदस्य प्रतियोगितावच्छेदकं वाच्यत्वाभावत्वं तत्स्वरूपतो वाच्यत्वाभावभेदाभाव इति ज्ञेयम्।

तथापि प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणाभाववृत्यनुयोगिताभिन्नानु-योगिताविशिष्टा या, प्रतियोगितातदवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतौ व्याप्तिरिति विवक्षणेनादोषात्। वैशिष्ट्यं च स्वनिरूपितत्व, स्वनिष्ठानुयोगित्वानिरूपितत्वोभय - संबन्धेन। भेदाभावश्च भेदप्रतियोगितारूप इति यावत्। एवं च पटः संयोगसंबन्धावच्छिन्नवाच्यत्वाभावभिन्नः– वाच्यत्वात् इत्यत्र नातिव्याप्तिः।

यदपि – उक्तलक्षणानां व्याभिचारज्ञानाप्रतिबध्यत्वेन न व्याप्तित्वम् – व्यभिचारज्ञानप्रतिबध्यत्वस्यैव व्याप्तित्वात्। व्याभिचारो प्रतियोग्यसमानाधिकरणहेतुसमाना - धिकरणाभावप्रतियोगितावच्छेदकं साध्यतावच्छेदकम् इति, हेतौसाध्याभाववद्वृत्तित्वम् इति वा। अर्थात् तद्वत्ताबुद्धिं प्रति तदभाववत्ताबुद्धेः प्रतिबन्धकत्वात्। उक्तव्यभिचारज्ञानस्य अभावभिन्नाभावघटितव्याप्तिज्ञानं (विलक्षणसिद्धान्तलक्षणं) प्रति न प्रतिबन्धकत्वम् इति।

तदपि न युक्तम् व्यभिचारस्य व्याप्त्यनुसारेण वक्तुं शक्यत्वात्। असमानाकारकयोरपि व्याप्तिज्ञानव्यभिचारज्ञानयोः प्रतिबध्यप्रतिबन्धकभावाङ्गीकाराच्च। कथमन्यथा प्रतियोगिता - धर्मिकोभयाभावादीनां व्याप्तिघटकत्वं दीधितिकाराद्यनुमतं सङ्गच्छेत। कथं वा व्याप्तिग्रहविचारे चिन्तामणिकृता साध्याभाववद्वृत्तित्वस्य व्यभिचारत्वं व्यापकसामानाधिकरण्यस्य च व्याप्तित्वं वक्ष्यते। इत्थमेव व्याप्यवृत्तिसाध्यकस्थले हेत्वधिकरण -निरूपितवृत्तितावच्छेदकभिन्न-

वृत्तितावच्छेदकत्वाभावत्वनिरूपितप्रतियोगितावच्छेदकसाध्यतावच्छेदकावच्छिन्नसामाना- धिकरण्यं हेतौ व्याप्तिरित्यपि निरस्तमिति। वाच्यं ज्ञेयत्वात् इत्यत्राव्याप्तेः। स्वरूपसंबन्धावच्छिन्न - वाच्यत्वत्वावच्छिन्नप्रतियोगिताकाभावस्य अप्रसिद्धेः। अन्येषामभावानां हेत्वधिकरणवृत्तित्वात्। प्रमेयवह्न्यभावी-गुरुधर्मावच्छिन्नप्रतियोगिताया अप्रसिद्ध्या तदृशाभावीयसाध्यनिष्ठप्रति - योगित्वस्य अप्रसिद्ध्या अव्याप्तिरिति।

तथा च विलक्षणं सिद्धान्तलक्षणं (अभावभिन्नाभावकल्पः) उपेक्षणीय इति।

अयं निबन्धः श्रीवैकुण्ठे भगवत्कैङ्कर्यनिरतानांमान्यानां आर् .देवनाथमहाशयानां मत्सतीर्थ्यानां षष्ट्यब्दपूर्तिमहोत्सवसमये तदङ्गस्मारकपत्रिकायां लेखनीयः इति चिन्तितं, परन्तु अनुशोचनपत्रिकायां लिख्यते इति वयं नितरां दूयामहे। इत्थं भवदीयः ना.रा. श्रीधरन्।

***

# साहित्यविभागः

# राजकुमारमिश्रप्रणीतभारतभूषणकाव्यस्य पर्यालोचनम्

**डॉ. कृपाशङ्करशर्मा**
साहित्यविभागः
रा. सं. सं. एकलव्यपरिसरः,
अगरतला, त्रिपुरा।

आधुनिकसंस्कृतकाव्यधारायां स्वनामधन्या: काव्यकारा: स्वकीयकाव्यप्रतिभाबलेन ज्ञानेन च कालिदासादीनां प्रभृतीनां महाकविनां नवोत्कर्षशालिनीनां काव्यपरम्परां संवर्धयन्ति पोषयन्ति च। अस्यां परम्परायां रामकरणशर्मा-बच्चूलालअवस्थी-जगन्नथापाठक-श्रीनिवासरथ-शिवजीउपाध्याय-रमानाथमिश्र-रेवाप्रसादव्दिवेदी-रमाकान्तशुक्ल-अभिराजराजेन्द्रमिश्र-राधावल्लभत्रिपाठि-मिथिलाप्रसादत्रिपाठि-प्रभुनाथव्दिवेदी-हर्षदेवमाधव-विन्ध्येश्वरीप्रसादमिश्र-भगवतीलालराजपुरोहित-देवर्षिकलानाथशास्त्रि-रमाकान्तपाण्डेय-जनार्दनप्रसादपाण्डेय-रमेशपाण्डेय-रामलखनपाण्डेय-सूर्यमणिरथ-प्रमोदचन्द्रमिश्र-हरेकृष्णशतपथीत्यादिप्रभृतय: सुप्रथिता: काव्यकलिता: कविमणय: परम्परां परिवर्धिताश्च । अस्यां आधुनिकसंस्कृतकाव्यपरम्परायां भारतभूषणकाव्यमिदं अभिनवाङ्कुरितेन कविना डॉराजकुमारमिश्रेण संग्रथितम्। काव्यमिदं सरसभावोज्ज्वलपूर्णं भारतीयपरम्परायां नक्षत्रेश इव राजते। काव्येऽमिन् चतुर्दशाधिकशतकानि काव्यकुडमलानि प्रस्फुटितानि जातानि। तानि काव्यकुडमलानि राष्ट्रचेतनायुक्तानि परम्परापोषकानि रसगङ्गाप्रवाहकारकाणि वर्तन्ते। कवि: काश्यां काव्यप्रतिभायुक्तानां स्वधर्मसेवारतानां ज्ञानगुणगरिष्ठानां शिष्यवात्सल्ययुक्तानां आचार्यरमानाथमिश्रवर्याणां शिवस्वरूपशिवजीउपाध्यायगुरुपादानां करकमलै: काव्यकारणिप्रतिभाया: ज्ञानार्जनं प्राप्तमिति। कवि: काव्ये स्वकीयराष्ट्रभावनां भारतमहिमानं कथं परिप्रकाशयति तद्यथा-

यत्र सत्यं शिवं सुन्दरं राजते यत्र धर्मो नरीनृत्यते प्रत्यहम्।
यत्र रम्या कथा दिव्यरामायणी संस्कृताप्लावितं भारतं तद् भजे।। १।।

कवि: कथयति यत्र सत्यं-शिवं-सुन्दरञ्चेति त्रिविधं धर्माश्रितं नरीनृत्यते। अस्माकं देशे वा अखिले विश्वे दिव्यरामायणी कथाया: भावसम्भार: संस्कृताप्लाविता: वर्तन्ते। तै: संस्कृताप्लावितै:

भावसंभारै: भारतीया: भारतं भजन्ति तथैव अहमपि मदीयं सत्यं-शिवं- सुन्दरं भारतं भजामि। कविमिश्रवर्येण सैन्यसाहसं त्यागं राष्ट्राराधनमपि काव्ये वर्णितम्। तद्यथा-

वीरपूजा सदा काव्यधारा तथा सैनिकास्तत्परा देशसंरक्षणे।
मातृभूमिं नमत्सज्जनानां गण: तन्नुमो भारतं धीरवीरान्वितम्॥ २॥

अस्माकं देशे वीराणां पूज्यपूजाभाव: दृश्यते , सर्वदा काव्यधारा प्रवहति , सैनिका: राष्ट्रसेवायां रक्षायां सन्नध्दा: भवन्ति।मातृवन्दनायां सत्पुरुषा: सर्वदा संलग्ना: दृश्यन्ते , तादृशं भारतं भजामि। भारतीयपुराणवाङ्मये विष्णुधर्मोत्तरपुराणम् भारतीयपरम्पराया: संस्कृतेश्च समुज्ज्वलं चित्रणं चित्रयति। तत्र भारतवर्षस्य महिमा सुमनोहरै: भावै: प्रकटिता जाता।यथा-

गायन्ति देवा किलगीतकानि धन्यास्तु ते भारतभूमिभागे।
स्वार्गापवर्गास्पदहेतुभूते भवन्ति भूय: पुरुषा: सुरत्त्वात्॥

भारतीया: जना: देवाऽधिका: श्रेष्ठा: संसूचिता: सन्ति। भारतभूमि: सर्वदा अमृतवर्षिणी कविराजकुमारमिश्र: भावमेनं अवलम्ब्य लिखति यत्-

नित्यपीयूषपानप्रियास्तेऽमरा आमनन्तीव नाकस्य निस्सारताम्।
सत्कथाया: सुधाया: कृते मेदिनीमाश्रयन्ते सदा भारताख्यामहो॥३॥

भारतवर्ष: सनातनकालदैव अमृताप्लावितकथां सहृदयसंवेद्यानां अन्त:करणे आस्वादनं कारयति। एतादृशीं भारतभूमिं प्रणमामि। भारतवर्षे सांस्कृतिकस्वरूपस्य दर्शनं तु ऐतिहासिकशिल्पानां दर्शनेनैव जायते। कवि: सांस्कृतिकराजधानीकाशी प्रेमस्नेहप्रतीक: ताजमहल इत्येषां स्थलानां रूपांकनमपि स्वकाव्यकलेवरे स्थापयति।यथा-

यत्र काशी पवित्रा प्रिया राजते मन्दिराणां चय: सर्वत: शोभते।
आगरानागरं ताजहर्म्यं महद् दिव्यकाश्मीरभू: स्वर्गभूषायते॥४॥

सर्वधर्मसम्भावयुक्तभावोऽपि अस्माकं राष्ट्रं वर्तते तमाधारिकृत्य कविना विश्वबन्धुत्त्वभावना काव्यकलिकया प्रतिपादितम्। तद्यथा-

हिन्दवो मुस्लिमा: सिक्खबौध्दादयो यत्र देशे वसन्ति प्रसन्ना मिथा:।
व्यावहरन्तो निजोपास्यदेवं ध्रुवं निर्भया लोकयात्राप्रसारोद्यता:॥६॥

अपिच- ज्ञानदानप्रकाशनेन विश्वम्भरं विश्वबन्धुत्त्वसद्भावनाभावितम्।

सच्चिदानन्दसन्दोहसम्भूषितं भारतं भूतले भूयसा भासताम्॥ ५॥।
संस्कृतेरात्मा तु संस्कृतमेव वर्तते तद्विषयकमपि कविः  लिखति ।

यथा-
भारतीयैकसाधकं संस्कृतं विश्वबन्धुत्त्वसद्भावदं संस्कृतम्।
ज्ञानसन्दोहसञ्चारकं संस्कृतं सौभगं सौहृदं सुन्दरं संस्कृतम्॥१२॥
सद्गुणोत्थानसन्मार्गदं संस्कृतं दिव्यविद्याप्रदं प्राञ्जलं संस्कृतम्।
नीतिवाक्येन सम्पोषितं संस्कृतं तद्धि सत्यं शिवं सुन्दरं संस्कृतम्॥१३॥

लोकस्य सद्बुध्दिविस्तारकं संस्कृतभूषणं संस्कृतभाषा वर्तते। कविना निगदितं यत्-
लोकसद्बुध्दिविस्तारकं संस्कृतं सर्वविद्याप्रदं सुन्दरं संस्कृतम्।
लोकनिस्सारताबोधकं संस्कृतं बान्धवेष्वेकताकारकं संस्कृतम्॥१५॥

देवभाषा लोकस्य सत्प्रेरिका सद्गुणप्रदायिका  एक्यबौधकत्त्वदायिका अनेकतायां एकतायाः प्रकाशिकाश्च । सर्वमानवानां कृते कल्याणकारिणी च इयं संस्कृतवाणी अस्ति । अतएव कविवरमिश्रेण भणितं कीर्तिपुञ्जप्रतिष्ठापकं विश्वकल्याणनिष्ठाप्रदं भक्तिशक्तिप्रदानोद्यतं ज्ञानवैराग्यमोक्षप्रदञ्चेति। यथा-
कीर्तिपुञ्जप्रतिष्ठापकं संस्कृतं विश्वकल्याणनिष्ठप्रदं संस्कृतम्।
भक्तिशक्तिप्रदानोद्यतं संस्कृतं ज्ञानवैराग्यमोक्षप्रदं संस्कृतम्॥१६॥

लोकसद्भावबोधकमपि इयं भाषा कविना उक्तञ्च –
त्यागसन्तोषसेवाप्रदं संस्कृतं साधुसेवितं तुष्टिदं संस्कृतम्।
धर्ममार्गस्य सम्बोधकं संस्कृतं लोकसद्भावनाकारकं संस्कृतम्॥२०॥

अपिच- संस्कृतस्य ध्रुवं सेवनं जायतामत्र धारा सुधायास्ततः पीयताम्।
ज्ञानसारस्ततः केवलं धीयतां सुन्दरं संस्तुतं संस्कृतं गीयताम्॥२९॥

काव्यकारः स्वनामधन्यानां काव्यालापितानां कवीनां सम्बध्दं स्वभावनया लिखति यत्-
मिश्रोऽभिराजेन्द्रवाचस्पतियद्गुरुर्वल्लभरेवाप्रसादौ हविः।

वह्निरास्ते शिव:श्रीरथ:सत्समित् तध्दियज्ञस्वरूपं जयेत् संस्कृतम्॥८७

पद्येऽस्मिन् वचस्पतिरूपेण अभिराजराजेन्द्रमिश्र: ऋत्विजरेवाप्रसादव्दिवेदी हविष्यरूपोत्रिपाठिराधावल्लभ: शिवजीउपाध्यायोऽग्निस्फुलिंग: समिधत्त्वेन श्रीनिवासोरथ: सारस्वतयज्ञशालायां काव्यच्छायायाअं सुपुष्पिता: सन्ति। कविभावना वर्तमानकालिकं दृश्यमवलोक्य पीडिता जाता । ये भारतीयसंस्कृतिं विहाय पाश्चात्यसंस्कृतिमाश्रयन्ते तेऽपि रत्नमणिं त्यक्त्वा सामान्यपाषाणखण्डं काचोच्चरूपं स्वीकुर्वन्ति।कवि: स्वकीयवेदनां भणितम् यत्-

संस्कृतिं स्वां परित्यज्य ये मन्वते सभ्यतां शोभनां हन्त वैदेशिकीम्।
नो समत्त्वं व्दयोर्जायते जातुचित् क्वाथ रत्नोच्चय: कुत्र काचोच्चय:॥९३

यत्र देशेऽस्मदीये जना: सूरयो धर्मभावेन सम्पूजिता विश्रुता:।
विश्वबन्धुत्त्वभावप्रसारोद्यता: तत्र तद्वैपरीत्यं कुतो जायते॥९५

देशेऽस्मिन् विव्दत्तल्लजा: धर्माचरणव्याप्रिया आसन् विश्वबन्धुत्त्वसन्देशवाहकाश्च सन्। परन्त्वत्र कथं वैपरीत्यभावमागतमिति चिन्तनीयं भारतीयानां कृते संसूचितम्। भारतं विशालसभ्यतासंस्कृतियुतं देशं वर्तते। अस्य देशस्य राज्यव्यवस्थायां कुशलप्राशासनिका: राजनेतार: उत्कोचग्रस्ता: जाता इत्यपि कविना काव्ये वर्णितम्।यथा-

अर्थलोभान्मुखा देशसञ्चालका: कापथो नेतुमिच्छन्ति ते भारतम्।
स्वार्थकौटिल्यनीत्यादियुक्ताऽध्वना नैव सम्भाव्यते राष्ट्ररक्षाऽधुना॥९८

पूर्वत: पश्चिमदिक्भागं उत्तरत: दक्षिणदिशं यावत् सम्पूर्णभारतं प्रेमस्नेहसौहार्द्रपूर्णपुष्पिकाग्रथिता मालाकारं प्राप्नोतु तदैव अस्माकं राष्ट्रं समुन्नतिपथं गमिष्यति। अतएव वेदे या ऐक्यभावना ऋषिभि: पर्यालोचिता तां भावनामवम्ब्य राष्ट्राराधने एक्यतायां परिबध्दा: भवन्तु मे भारतवासिन इति भावं भणितं काव्यकारेण मिश्रवर्येण। यथा-

प्रेमभावान्वितामेकतामन्तरा मातृभूरक्षणं नैव सम्भाव्यते।
सर्वतो दुर्दशया प्रभावैर्भृशं चीत्करोति क्षतं सम्भृतं भारतम्॥

अखिले विश्वे आतङ्कवादस्य विकटा समस्या व्यापृता जाता। अस्या: समस्याया: निवारणं कथं भवेदिति चिन्तनस्य विषय:। एनां समस्यां कवि: उद्घाटयति।यथा-

नित्यमातङ्कवादस्य बीजाङ्कुरसर्वतो वर्धते कल्मषोद्भावित:।

चौरचौर्यैस्तथा वञ्चनैर्लुण्ठनैर्भारतान्तर्दशा कम्पमाना स्थिरा॥ १००

कल्मषभावेन भाविता आतङ्कवादस्य भावना लोके बीजाङ्कुरिता जाता। तस्काराणां चौर्यवृत्ति: परिवर्धिता वञ्चकानां वञ्चकत्त्वं लुण्ठकानां लुण्ठकत्त्वं निरन्तरं वर्धमानमिति। तस्मात् कारणात् भारतभूमिकम्पिता जाता। अपिच-

नेतृवृन्दं मिथो हाऽद्य वित्तार्जने कामलो भातुरं स्वार्थसिध्दौ रतम्।
न स्त्रियामादर: साम्प्रतं दृश्यते शासनस्य व्यवस्थाऽनवस्थाङ्गता॥ ९४

प्रकृतिच्छेदनस्य समस्याऽपि सम्प्रतिविकासधारायां वर्धिता जाता। तेन कारणेन प्राकृतिकवातावरणं दूषितं सञ्जातमिति। परस्परप्रेमस्नेहसौहार्द्रभावनाऽपि नष्टप्राय जायते वैमनस्योत्पन्नमपि वर्धितश्चेति। यथोक्तं कविना-

कम्पमाना धरा साम्प्रतं दृश्यते पादपोन्मूलनात् काननोच्छेदनात्।
राजनीतिर्विपन्नाऽद्य दुर्नायकैवैरभावश्च सार्वत्रिको वर्धते॥९६

कवि: परस्परप्रेमस्नेहसौहार्द्रवर्धनाय राष्ट्रशक्तिसमुन्नतये स्वकीयां भावनां जनसमक्षं प्रदर्शयति। यथा-

भ्रातरोऽप्यद्य संयुध्यमाना मिथ: तेन राष्ट्रं ध्रुवं जायते।
शक्तिहीनत्त्वमालोक्य वैदेशिका देशमाक्रन्तुकामा भवन्त्युद्यता:॥९७

हे बान्धव:! वयम् परस्परं संयुध्यमाना: भवामश्चेत् राष्ट्रं दुर्बलतामाप्नोति। शक्तिहीनत्त्वमवलम्ब्य वैदेशिका: आक्रान्तार: अस्माकं राष्ट्रस्योपरि आक्रमण् कृतवन्त:। धनलोलुपा: स्वार्थपरायणा: कुटिला: जना: राष्ट्रसेवां रक्षाञ्च न कर्तुं प्रभवन्ति। भारतीयसंस्कृतौ गोपूजनं गोसेवाव्रतं च महत्पूर्णं आदर्शमूलकं कार्यं मन्यते। तं गोव्रतसेवनकार्यं आश्रित्य कविलेखनी सञ्चरतां याति-

धेनुसंसेवया सम्बभूव स्वयं सूर्यवंशावतंसो दिलीपो महान्।
सर्वसौभाग्यभू: सर्वकामप्रदा सौरभेयी कृपा कल्पवल्लीयते॥१०६

गोसेवाव्रतया सूर्यवंशीराज्ञोदिलीप: अभीष्टमनोरथानां अभिलषितानां संकल्पानां सिध्दिमाप्नोति। कविना यदुक्तम्-

यत्र कृष्णो दिलीपो महीपोऽथवा नैकशो धेनुपूजाव्रतं चक्रिरे।
तत्र हा भारते या गवां दुर्दशा सा परं चित्तदु:खस्पदं दृश्यते॥१०७

अस्माकं देशे गोपूज्या वर्तते। कामधेनुरूपाया: हिंसाऽपि दुराचारिणा: कुर्वन्ति। अनया दुर्घटनया कविहृदय: पीडितो जात:।स: भारतभूषणकाव्ये भावविदीर्णघटनामुद्घाटित:। गोसेवाव्रतोच्छेदनात् परं राष्ट्रोन्नतिपथं न गच्छति। अतएव अस्माकं समेषां दायित्त्वऽस्ति यत् गोसेवाव्रतं धारणीयं पालनीयमिति-

गोव्रतोच्छेदनादर्भकनिर्बला: चेत्कथं जायतां तदा राष्ट्रोन्नति:।
सत्वरं लोकसद्भावनाराधकैरक्षणीयो गणोऽयं गवां यत्नत:॥१०८

अपिच-

गोव्रतं पाल्यते पूर्वजैर्यत्र सा सुप्रथाक्षीयतेभारतात् साम्प्रतम्।
नैवपूजाविचारोऽधुना कस्यचिद् गोवधो वर्धमानोऽनिशं दृश्यते॥१०९

उत्सवानामपि अस्माकं काचिद् विशिष्टा परम्परा विद्यते। भारतीया: उत्सवप्रिया एव भवन्ति। अत्र दीपावली-रक्षाबन्धनं-होलिकोत्सवादिसांस्कृतिकोत्सवा: जनेषु प्रेमस्नेह-सौहार्द्र समत्त्व-भावनामुत्पादयति।कवि: स्वकाव्यभावनया प्रतिपादयति यत्-

शुभ्रदीपावली मंगलोद्भाविनी भ्रातृरक्षाव्रतं पर्वसम्मोद्म्।
किञ्च होलोत्सव: सर्वलोकप्रियो भारते भान्तु सर्वोत्सवा: सर्वत:॥११०

भेदभावसम्मर्दिनाभावनाया: निवारणाय कविलेखनी काव्यं स्पन्दयति-

पादसम्मर्दितोद्यानदूर्वा न किं देवतानां लसन्मस्तके स्थाप्यते।
ज्ञाततथ्यैर्न दीनेऽपक्ष्येऽधने वैषमी दृग्विधेया सदासज्जनै:॥११३

प्रत्येकं जन: परब्रह्मण: साक्षात्कृतिरस्तीति कविना निगदितम् यत्-

हे प्रभो! संविधेयं पुनस्तादृशं यत्र वेदध्वनिर्विप्रपूजा भवेत्।
निर्भया: सुप्रन्न भवेयु: स्त्रियो वैभवेनोन्नतं सुन्दरं भारतम्॥११४

अतएव अस्माकं भारतदेश: सत्यं शिवं सुन्दरं समुन्नतं भारतमिति अभिनवाङ्कुरितेन काव्यकारेण मित्रमणिराजकुमारमिश्रेण काव्यकलिकया संसूचितं सन्दर्शितञ्चेति। प्रस्तुतोऽयं आलेख: भारतवर्षस्य स्वनामधन्यानां विविधविद्याविचक्षणानां विश्रुतकीर्तिप्रथितानां पुण्यश्लोकानां देवभूतानां आचार्यरामानुजदेवनाथनमहोदयानां स्मृतौ मया सश्रध्दं समर्प्यते इति शम्।

# ध्वन्यालोकलोचनाभ्यां प्रकाशितं कलातत्त्वम्

**डा. नारायणन्. ई. आर्.**
रा. सं. सं. क. जे. सोमैयासंस्कृतविद्यापीठम्,
विद्याविहारः, मुम्बई।

## 1. कलायाः स्वरूपम्

**कल गतौ संख्याने च** [1] इत्यस्माद्धातोः चुरादिणिच्प्रत्यये कलयति स्वरूपमावशयति इत्यस्य गायन-वादन-नर्तन-नटन-आलेखन-तक्षण-वास्तुविद्या-भेदाद्यर्थे **नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः** (पा.सू. 3-1-134) [2] इति पचादित्वादचि अजाद्यतः टापि **कला** इति रूपम्। तत्र गीतवाद्यादिनैपुण्यस्य शिल्पमिति व्यवहारः। तथा चामरसिंहः – **कला शिल्पे**[3] इत्याह। एवं गीतम्, वाद्यम्, नृत्यम्, नाट्यम्, आलेख्यम्, तत्रणम्, वास्तुविद्या, मानसी काव्यक्रिया, नेपथ्ययोगाः, प्रतिमा, प्रहलिका, भूषणयोजनम्, इन्द्रजालम्, मणिभूमिकाकर्म, रूपरत्नपरीक्षा, गन्धयुक्तिः इति कलाप्रकाराः बहवः [4]। कलास्वरूपं च मनोभावाश्रितमास्वादनापेक्षितमिति सहृदयानामनुभवसिद्धम्। आस्वादनं हि कलानां चरमं लक्ष्यम्। कला नाम विविधानामुपायानामाश्रयो येनानन्दावबोधः फलम्। आसु च कलासु रसाः, भावा. अभिनयाः, धर्मिणःवृत्तयः प्रवृत्तयच्च, सिद्धिः, स्वराः, आतोद्यम्, गानं रङ्गः इति नाट्यं संगृहीतम्।[5] उक्तं च –

**रसा भावा ह्यभिनया धर्मिवृत्तिप्रवृत्तयः।**
**सिद्धिः स्वरास्तथातोद्यं गानं रङ्गच्च संग्रहः।। इति।**

### कलानां प्रकाशनम्

ध्वन्यालोको नाम ध्वनिसिद्धान्तग्रन्थो यत्र ध्वनिं काव्यात्मानमानन्दवर्धनो मनुते। लोचनं नाम तद्व्याख्यानमभिनवगुप्तप्रणीतं च।

**स्वेच्छाकेसरिणः स्वच्छस्वच्छायायासितेन्दवः।**
**त्रायन्तां वो मधुरिपोः प्रपन्नार्तिच्छिदो नखाः।।**[6]

इत्यस्मिन् नखानां स्वच्छत्वं स्वच्छायायासितेन्दुत्वं चालेख्यरुपं कलाशिल्पमाविष्करोति। [7]
लोचनेऽपि बालचन्द्ररुपं वक्रं हृद्यं च वस्तु चित्रितम्। बालचन्द्रस्य खेदानुभवप्रसङ्गे नाट्यकलानां

आलस्यदैन्यामर्षादीनां व्यञ्जनमपि सिद्धम्। [8]सहृदयमनःप्रीतिः ध्वनिप्रयोजनमिति कथनावसरे कलानां स्वभावतयाऽऽनन्दस्वरुपत्वात् तासां महाविषयस्य ध्वनेश्च साधर्म्यम्। अर्थचारुत्वं ध्वनौ चारुत्वस्वरुपं च कलानां प्रसिद्धम्। कलासु विचक्षणताप्रदानं प्रीतिदानं च काव्यप्रयोजनत्वेन भामहोद्धरमपूर्वकं लोचने प्रकाशितम्।[9]

**गीतारूपा कला**

ध्वन्युदाहणप्रसङ्गे गीतस्परूपाणां गाथानां प्रयोगा गीतकलाप्रकाशनस्यो – दाहरणत्वेन गृह्णीयाः। यथा[10]-

**भम धम्मिअ वीसत्थो सो सुणओ अज्ज मारिओ देण।**

**गोलाणइकच्छकुडङ्गवासिणा दरिअसीहेण।।** इति।

तथा च -[11] **अत्ता एत्थ णिमज्जइ, कस्स व ण होई रोसो** [12]इत्यद्यः गाथाश्च। स्वरश्रुत्यादिलक्षणं हि गान्धर्वलक्षणम्। इति ध्वन्यालोके। लोचने[14]-

**स्वराः षड्जादयः सप्त। श्रुतिर्नाम शब्दस्य वैलक्षण्यमात्रकारि यद्रूपान्तरं तत्परिमाणा स्वरतदन्तरालोभयभेदकल्पिता द्वाविंशतिविधा। आदिशब्देन जात्यंशकग्रामरागभाषाविभागान्तर-भाषादेशीमार्गा गृह्यनेत्। इति चोक्तम्।**

**अभिनवगुप्तो**ऽभिनवभारत्यामपि नाट्यशास्त्रस्य पञ्चमाध्यायव्याख्यानावसरे[15]-

**गीतवाद्यगीतोभयप्रधाना क्रमेण चित्रादयो वृत्तिमार्गाः। लयो द्रुतादिः। तालाः शम्यादिविशिष्टाः त्र्यश्रचतुरश्रो मिश्रश्च इत्याह।**

**रसभावादिकलाङ्गाः**

ध्वन्यालोके **शोकः श्लोकत्वमागतः** [16]इति करुणस्थायिभावस्य शोकस्य निर्देशन रसभावाद्यभिनयकलाऽपि व्यङ्गार्थसंस्पर्शवती सहृदयानां मनःसु कामपि कमनीयतामादधाति। विभावानुभावव्यभिचारिणां भावानां रसं प्रति हेतुतया नाट्यस्य च कलान्यतमत्वेन रसभावादीनां कलाङ्गत्वं सिद्धमेव।

**नृत्यकलाव्यञ्जनस्योदाहरणं यथा17** –

**तरङ्गभ्रूभङ्गा क्षुभितविहगश्रेणिरशना**

**विकर्षन्ती फेनं वसनमिव सरम्भशिथिलम्।**

**यथाविद्धं याति स्खलिमभिसन्धाय बहुशो**
**नदीरूपेणेयं ध्रुवमसहना सा परिणता।।** इति।

अत्र नदीप्रवाहस्य नृत्यद्रूपाया नायिकायाः स्वरूपमुलक्षयता पुरूरवसा नृत्यन्ती नायिकोर्वसी विभाविता। एतच्च व्यङ्ग्यभङ्ग्या कालिदासेलोपरचितं ध्वन्यालोकेऽपि समुदाहृतम्।

**स्मितं किञ्चिन्मुग्धं तरलमधुरो दृष्टिविभवः**
**परिस्पन्दो वाचामभिनवविलासोर्मिरसः।**
**गतानामारम्भः किसलयितलीलीपरिमलः**
**स्पृशन्त्यास्तारुण्यं किमवि हि न रम्यं मृगदृशः।।**इति।[18]

तथा च दृष्टिविभवो वाक्यपरिस्पन्दः, अभिनवविलाश्च नृत्यकलाङ्गाः।

**नाट्यस्याभिनयात्मकस्वरूपस्य कलाप्रकारस्योदाहरणं लोचने यथा**[19]-

**त्वां चन्द्रचूडं सहसा स्पृशन्ती प्राणेश्वरं गाढवियोगतप्ता।**
**सा चन्द्रकान्ताकृतिपुत्रिकेव संविद्विलीयापि विलीयते मे।।** इति।

**आतोद्यकलाव्यञ्जनं यथा**[20]–

**हंसानां निनदेषु यैः कवलितैरासज्यते कूजता-**
**मन्यः कोऽपि कषायकण्ठलुठनादाघर्घरो विभ्रमः।**
**ते सम्प्रत्यकठोरवारणवधूदन्ताङ्कुरस्पर्धिनो**
**निर्याताः कमलाकरेषु बिसिनीकन्दाग्रिमग्रन्थयः।।**इति।

**नाट्ये भावकलाव्यञ्जनं यथा**[21]-

**दृष्टिर्नामृतवर्षिणी स्मितमधुप्रस्यन्दि वक्त्रं न किं**
**नोर्ध्वाद्रं न चन्दनरसस्पर्शानि चाङ्गानि वा।**
**कस्मिन् लब्धपदेन ते कृतमिदं क्रूरेण पीताग्निना**
**नूनं वज्रमयोऽन्य एव दहनस्तस्येदमाटेष्टितम्।।** इति।
**अतिक्रान्तसुखाः कालाः प्रत्युपस्थितदारुणाः।**
**श्वः श्वः पापीयादिवसा पृथिवी गतयोवना।।** इति।[22]

**प्रायच्चतोच्चैः कुसुमानि मानिनी विपक्षगोत्रं दयितेन लम्भिता।**
**न किञ्चिदूचे चरणे केवलं लिलेक बाष्पाकुललोचना भुवम्।।** इति।[23]

**आलेख्यकलाव्यञ्जनस्योद्गाहरणं यथा[24]–**

**स्निग्धश्यामकान्तिलिप्तवियतो वेल्लद्बलाका घना**
**वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः।**
**कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वे सहे**
**वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव।।** इति।

अत्र स्निग्धश्यामलकान्त्या विलिसं वियद्बलाकालिप्तं चेति प्रकृतिचित्रणं वायङ्ग्यतयाऽऽलेख्यकलया चोपदर्शितम्।

**कण्ठाच्छित्त्वाक्षमालावलयमिव करे हारमावर्तयन्ती**
**कृत्वा पर्यङ्कबन्धं विषधरपतिना मेखलाया गुणेन।**
**मिथ्यामन्त्राभिजापस्फुरदधरपुटव्यञ्जिताव्यक्तहासा**
**देवी सन्ध्याभ्यसूयाहसितपशुपतिस्तत्र दृष्टा तु वोऽव्यात्।**।इति।[25]

अत्रापि हारावर्तनं, मालाधारणं, पर्यङ्कबन्धनं चालेख्यकलां व्यङ्ग्यतयोपरचयति।
इत्थं च गीतवाद्यनृत्यनाट्यालेख्यादिकलानां स्वत एव ध्वन्याद्युदाहरणप्रसङ्गे व्यञ्जनोपरञ्जनं सहृदयानामालोचनामृतं सम्पद्यते। यतोऽपि वाच्यतया न काचित् तादृशी प्रतीतिरपि तु सर्वाश्च कला यदा व्यङ्गसंस्पर्शवत्य एव सहृदयानां हृदयमावर्जयितुं समर्था इति ध्वन्यालोकलोचनादिसहृहयग्रन्था एव प्रमाणम्। किं बहुना, सर्वेषामपि काव्यप्रकाराणां यथाकथञ्चिद्व्यङ्ग्यसंस्पर्शेण कलात्वं तु सिद्ध्यत्येव।

1. पाणिनीयधातुपाठः-1866
2. पा.सू.3-1-134.
3. नामलिङ्गनुशासनम्-2731-III-5.पृ.135
4. वाचस्पत्यम्, भागः तृतीयः, पृ.1789-1790.
5. नाट्यशास्त्रम्, VI-10, पृ.90.
6. ध्वन्यालोकः, मङ्गलपद्यम्, पृ.4.

7. तत्रैव, पृ.7.
8. ध्वन्यालोकः, श्लोकः -1, पृ.9
9. तत्रैव, लोचने, पृ.40.
10. गाथासप्तशती -2-76.
11. तत्रैव, 7-67.
12. ध्वन्यालोकः, पृ.76
13. तत्रैव, पृ. 94.
14. लोचने, पृ. 94-96.
15. नाट्यशास्त्रम्, अभिनवभारती, V-31-32. पृ. 599.
16. ध्वन्यालोकः, कारिका -5, पृ.851.
17. ध्वन्यालोकः, 2-5. पृ. 201.
18. ध्वन्यालोकः, पृ. 523.
19. ध्वन्यालोकः, 3-20, पृ. 397.
20. ध्वन्यालोकः, पृ. 540.
21. ध्वन्यालोकः, 3-14. पृ. 343.
22. ध्वन्यालोकः, पृ. 350.
23. ध्वन्यालोकः, पृ. 482.
24. ध्वन्यालोकः, पृ. 167.
25. ध्वन्यालोकः, 3-24, पृ. 383.

**उपयुक्तग्रन्थसूची**


1. Amarakosa of Amarasimha :PandurangJawaji, Bombay, 1918.
2. A Novel View to the Indian Poetics :Manohar kale, NamanPrakashan, New Delhi, Vol. 1-2000, Vol. 2- 1999.
3. Arts in the Natyasastra of Bharata :Bharatendu Mishra, PratibhaPrakashan, Delhi, 2007.

4. Dhvanyaloka with Locana and Balapriya :PattabhiramaShastri, Chowkhamba Sanskrit Series 135, Varanasi, 1940.
5. Kavyamimamsa of Rajasekhara : R. A. Sastry, Oriental Institute, Baroda, 1934.
6. Natyasastra of Bharatamuni, Ed. Kedarnath, Reprint Edn. RashtriyaSanskrit Sansthan, New Delhi, 2002.
7. Natyasastra with the Abhinavabharati : Ravi Shankar Nagar, Parimal Publications, Delhi, Second Edn. 1988.
8. PrakritGathasaptasati complied by Hala :RadhagovindaBasak, The Asiatic Society, Calcutta, 1971.
9. Siddhantakaumudi with Tattvabodhini :JnanendraSarasvati, Chowkhamba Sanskrit Pratishtan, Delhi, Reprint Edn. 1994.
10. The Aesthetic Experience According to Abhinavagupta :RanieroGnoli, Chowkhamba Sanskrit Series Office, Varanasi, 1985.
11. Vacaspatya of TaranathTarkavacaspati, Chowkhamba Sanskrit Pratishthan, New Delhi, Reprint Edn. 2002.

***

# आलङ्कारिकाभिमता व्यङ्ग्यबोधिनी व्यञ्जना

**-डा. एम्. सुदर्शनचिपळूणकरः**
सहायकाचार्यः,साहित्यविभागः,
रा. सं. संस्थानम् , क. जे. सोमैयासंस्कृतविद्यापीठम्,
विद्याविहारः, मुम्बई।

व्यक्तिमर्षणकान्तिगत्यर्थकेन अञ्जूधातुना [१] निष्पन्ना, ध्वननगमनप्रत्यायनाद्यपरपर्याया व्यञ्जनावस्त्वलङ्काररसात्मना त्रिधा भिन्नस्य सकलसत्काव्योपनिषद्भूतस्य अभिधेयाद्यतिरिक्तस्यार्थस्य ख्यापनाय काव्यार्थभावनासमुन्मीलितलोचनैः सहृदयैः अङ्गीक्रियते। तत्र चोच्यते कविराजेन विश्वनाथेनसाहित्यदर्पणेद्वितीयपरिच्छेदे यथा-

**विरतास्वभिधाद्यासुययार्थोबोध्यतेपरः।**
**सावृत्तिर्व्यञ्जनानामशब्दस्यार्थादिकस्यच**[२]।।इति।

स्वमर्थं बोधयित्वा अभिधालक्षणातात्पर्याख्यासु तिसृषु वृत्तिषु विरतासु सत्सु , यया वृत्त्या वाच्याद्यतिरिक्तः वस्त्वलङ्काररसलक्षणोऽर्थः बोध्यते सा शब्दस्य अर्थादिकस्य च वृत्तिर्व्यञ्जना इति अस्यार्थः। तच्च काव्यप्रकाशकार: ब्रूते यथा-

**वक्तृबोद्धव्यकाकूनांवाक्यवाच्यान्यसन्निधेः।**
**प्रस्तावदेशकालादेःवैशिष्ट्यात्प्रतिभाजुषाम्।**
**योऽर्थस्यान्यधीहेतुर्व्यापारोव्यक्तिरेवसा**[३]।। इति।

एतेन रसादीनां बोधार्थम् अभिधाद्यतिरिक्ता व्यञ्जना अङ्गीकृता भवति। किञ्च एवम्भूतायाः व्यञ्जनायाः अङ्गीकारे सन्ति बहवो हिआक्षेपा :। तत्र च कैश्चिदुच्यते**व्यङ्ग्यप्रतीतिर्नैमित्तिकी, नैमित्तिकानुसारेण निमित्तानि कल्प्यन्ते इति न्यायेन निमित्तान्तरानुपलब्धेः शब्द एव निमित्तं, तच्च बोध्यबोधकरूपनिमित्तत्वं वृत्तिं विना न सम्भवति, सा च वृत्तिः अभिधैव** इति। किन्तु सङ्केतितार्थमात्रबोधनविरताया : अभिधायाः वस्त्वलङ्काररसादिव्यङ्ग्यबोधनेक्षमत्वाभावान्मतमिदमग्राह्यम्।

तत्र च ब्रूते मम्मटः यत् **नाभिधा समयाभावात्** [४] इति। अपि च अभिधाबोध्यस्य शकुन्तलादिविभावादेः तदभिव्यङ्ग्यस्यशृङ्गारादेश्च एकरूपत्वाभावान्नासावभिधेयः।अत एव शृङ्गाररसोऽयमित्यत्र न रसप्रतीतिः। पुनश्च शब्दस्य अर्थज्ञापकत्वरूपनिमित्तत्वं व्यापारसापेक्षमेव। यथा वाच्यलक्ष्ययोः अभिधालक्षणे व्यापारौ तद्वदत्रापि कश्चिद्व्यापारः अवश्यमभ्युपगन्तव्य एव।अन्यथा नैमित्तिको व्यङ्ग्यार्थ इत्यपि अपास्तं स्यात्। **सोऽयम् इषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः**[५] इति **यत्परः शब्दः स शब्दार्थः**[६] इति च वदन्तः**भट्टलोल्लट**प्रभृतयस्तु यथा तीरबोधनेच्छया उच्चरितः गङ्गाशब्दः तीरं बोधयति, तथारसादिबोधनेच्छयाउच्चरिताः काव्यशब्दाःव्यङ्ग्यार्थं बोधयन्तीति व्याच्यवृत्तिरेवव्यङ्ग्यवृत्तिरिति अभिप्रयन्ति, किन्तु नेदं विचारसहम्। यतो हि यत्परः शब्दः इत्यत्र वाक्यान्तर्वर्तिपदार्थेषूपस्थितेषु सिद्धरूपाणां प्राप्ततया विधानमनर्थकमिति साध्यरूपस्यैव विधेयत्वं यस्य च विधेयत्वं तत्रैव तद्वाक्यस्य तात्पर्यम्, यस्मिंश्च तात्पर्यं स एव वाक्यार्थस्तदर्थबोधनायैव तद्वाक्यं प्रयुक्तं तदंशस्य प्रमाणान्तराप्राप्ततया तदंशे एव तद्वाक्यस्यानवगतार्थबोधकत्वेन प्रामाण्यनिर्वाहः इति मीमांसकमतम्।

अतःउपात्तशब्दैःप्रतिपाद्येषुअर्थेषुयदंशेविधेयत्वंतत्रवाक्यतात्पर्यम्, यत्रतात्पर्यंसशब्दार्थः इत्यर्थः। **लक्षणाबोध्य एवायं व्यङ्ग्यार्थः** इति लक्षणावादिनां मतम्। परं लक्षणायां मुख्यार्थबाधादिहेतुसद्भावात् व्यङ्ग्यबोधिन्यां वृत्तौ च तदभावात् मतमिदं न युक्तियुक्तम्। तदुक्तमाचार्यमम्मटेन**हेत्वभावान्नलक्षणा**[७]इति। ध्वन्यालोककारश्च ब्रूते यथा-

**भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः।**

**अतिव्याप्तेरथाव्याप्तेः न चासौ लक्ष्यते तया** [८] ॥

**कस्यचित् ध्वनिभेदस्य सा तु स्यादुपलक्षणम्** [९]॥ इति। अत्र च आनन्दवर्धनः भक्तिध्वन्योः पर्यायवत् ताद्रूप्यमिति, भक्तिः ध्वनेः लक्षणमिति, देवदत्तगृहकाकवदुपलक्षणमिति च विकल्पत्रयमुपस्थापयति। न हि लोके भिन्नरूपयोः द्वयोः एकत्वं सम्भवति। तद्वत् भक्तिध्वन्योः एकत्वमपि न सम्भवति। वाच्यवाचकाभ्यां वाच्यभिन्नस्यार्थस्य तात्पर्येण यत्र प्रकाशनं तत्र व्यङ्ग्यप्राधान्ये ध्वनिः। भक्तिस्तूपचारमात्रम्। अतोऽत्र न भक्तिध्वन्योः पर्यायवत् ताद्रूप्यम्। नापि भक्तिः ध्वनेः लक्षणम् अतिव्याप्तेरव्याप्तेश्च। **कृशाङ्ग्याः सन्तापं वदति**

**बिसिनीपत्रशयनम्**[१०] इत्यत्र अचेतनस्य बिसिनीपत्रस्य वाग्व्यापारः न सम्भवतीत्यतः लक्षणया प्रकाशरूपोऽर्थः बोध्यते। अतोऽत्र अतिव्याप्तिः। ये च सौन्दर्यादौ निरूढाः लावण्याद्याः शब्दाः, तत्र ध्वनेः गन्धोऽपि नास्ति परमस्ति भक्तीत्यतः अव्याप्तिः। अतः यत्र ध्वनिरस्ति तत्र क्वचित् भक्तिरप्यस्ति इत्येतावताऽस्तु भक्तिर्ध्वनेरुपलक्षणमिति अत्र आनन्दवर्धनस्याशयः।

व्यक्तिविवेककारः महिमभट्टः ब्रूते यत् **यापिविभावादिभ्योरसादीनांप्रतीतिः, साऽनुमाने एवान्तर्भवितुमर्हति**[११] इति। शब्दाभिनयसमर्पितं रामादिगतरागज्ञानमेव रसश्चेत्सोऽनुमानवेद्यो भवितुमर्हति। किन्तुतद्भावनयासहृदयैः भाव्यमानस्य स्वप्रकाशानन्दरूपस्यैव रसस्य सर्वालङ्कारिकसम्मतत्वाद्व्यञ्जनयैव। साहित्यदर्पणकारः विश्वनाथः वदति यत्-

**नानुमानंरसादीनांव्यङ्ग्यानांबोधनक्षमम्।**
**आभासत्वेन हेतूनां स्मृतिर्न च रसादिधीः**[१२]**॥**

पुनश्च अनुमानवादिनां मतानुसारं **भ्रम धार्मिक विश्रब्ध** [१३] इत्यत्र गृहे श्वनिवृत्या विहितं भ्रमणं गोदावरीतीरे सिंहोपलब्धेः अभ्रमणमनुमापयति।

किन्त्वत्रश्वभीरुःधार्मिकःसिंहभीरुर्भवेदित्यत्रनिश्चयाभावात्सिंहवत्वहेतुरसिद्धः। तत्र च मम्मटाचार्यः ब्रूते यत्- **भीरुरपि गुरोः प्रभोर्वा निदेशेन, प्रियानुरागेण, अन्येन चैवम्भूतेन हेतुना सत्यपि भयकारणे भ्रमतीत्यनैकान्तिको हेतुः, शुनो बिभ्यदपि वीरत्वेन सिंहान्न बिभेतीति विरुद्धोऽपि गोदावरीतीरे सिंहसद्भावः प्रत्यक्षादनुमानाद्वा न निश्चितः, अपि तु वचनात् न च वचनस्य प्रामाण्यमस्ति अर्थेनाप्रतिबन्धादित्यसिद्धश्च, तत्कथमेवंविधाद्धेतोः साध्यसिद्धिः**[१४]इति।

तस्मात्सहृदयहृदयाह्लादकारिणः व्यङ्ग्यार्थस्य बोधनार्थम् अभिधाद्यतिरिक्ता अभिधालक्षणामूलादिनैक-विधविशिष्टा व्यञ्जनावृत्तिःआलङ्कारिकैरङ्गीकृतेति सिद्ध्यति।

**सन्दर्भाः**

१.पाणिनीयधातुपाठः १४५९

२.साहित्यदर्पणः २.१२-१३

३.काव्यप्रकाशः ३.२१-२२

४.काव्यप्रकाशः २.१५

५.इषोरिव दीर्घदीर्घव्यपारो नवमदशमशताब्दमध्ये जयन्तभट्टेन न्यायमञ्जर्यां प्रथममुल्लिखितो दृश्यते। पुनरस्योल्लेखो दशमशताब्देऽभिनवगुप्तकृतलोचनग्रन्थस्य प्रथमोद्योतस्य चतुर्थकारिकाव्याख्यायां प्राप्यते / द्र.मीमांसायां काव्यशास्त्रे च शब्दशक्तिः/ विरूपाक्ष वि.जड्डिपाल्

६.यत्प्रतिपादनपरो हि शब्दस्स शब्दार्थः/ पूर्वमीमांसासूत्राणि ३.१.१

७.काव्यप्रकाशः २.१५

८.ध्वन्यालोकः १.१४

९.ध्वन्यालोकः १.१९

१०.परिम्लानं पीनस्तनजघनसङ्गादुभयत-
स्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम्।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः
कृशाङ्ग्याः सन्तापं वदति बिसिनीपत्रशयनम् ॥ / रत्नावली२.१२

११.सचत्रिविधः।वस्तुमात्रमलङ्कारारसादयश्चेति।तत्राद्यौवाच्यावपिसम्भवतः।अन्यस्त्वनुमेयएवेति / व्यक्तिविवेकः-प्रथमविमर्शः

१२.साहित्यदर्पणः ५.४

१३.भ्रम धार्मिक विश्रब्धः स शुनकोऽद्य मारितस्तेन।
गोदावरीनदीकच्छकुञ्जवासिना दृप्तसिंहेन ॥/ गाथासप्तशती२.७५

१४.काव्यप्रकाशः ५/ अनुमानवादिनां खण्डनम्

**आकरग्रन्थाः**

१.पाणिनीयधातुपाठः

२.साहित्यदर्पणः

३.काव्यप्रकाशः

४.ध्वन्यालोकः

५.मीमांसायां काव्यशास्त्रे च शब्दशक्तिः

६.पूर्वमीमांसासूत्राणि

७.रत्नावली

८.व्यक्तिविवेकः

९.गाथासप्तशती

***

# ज्योतिषविभागः

# राष्ट्र के निर्माण में ज्योतिषशास्त्र की भूमिका

**प्रो. भारतभूषण मिश्र**
अध्यक्ष – ज्योतिष विभाग
राष्ट्रिय संस्कृत संस्थान, मुम्बई परिसर, मुम्बई।

भारतीय जन मानस की सोच सदैव से समग्रवादी दृष्टिकोण वाली रही है। इसी कारण हम "**वसुधैव कुटुम्बकम्**"[1] का उद्घोष भी करते हैं। भारतीय धर्म दर्शन ,समाजशास्त्र ,अध्यात्म , ज्योतिष आदि के कारण ही हमारी समृद्धि लोक विश्रुत है। मित्रों जो , वैदिक गणित ,अर्थशास्त्र कभी प्रमाद उसके ह्रास का कारण बनता- संस्कृति या समाज जितना विकसित होता है उसमें कभी है, इसलिए हमें अपनी संस्कृति व शास्त्र की रक्षा के लिए निरन्तर संघर्ष करना चाहिए तभी हम संस्कृति की उन्नति में सहयोगी बने रहने के अधिकारी होंगे। संयम संयुक्त ,सद्भावना ,सदाचार , सोलह संस्कार आदि भारतीय गौरवशाली परम्परा विश्व में श्रेष्ठतम सार्वभौमिक वैज्ञानिक ,परिवार संस्कृत‍ि के रूप में विख्यात रही है। "**सा प्रथमा संस्कृतिर्विश्ववारा** "[2] यह यजुर्वेद का सन्दर्भ हमारी प्राचीन संस्कृति का बोधक है। विभिन्न देश भारत ,वर्मा ,नेपाल ,अफगानिस्तान ,पाकिस्तान , श्रीलंका सहित एशिया महाद्वीप में बसे सभी लोगों के पूर्वज एवं ,मारीशस ,बांग्लादेश उनकी संस्कृति जिसके कारण भारत चक्रवर्ती साम्राज्य के रूप में , सभ्यता व दर्शन एक जैसा ही था , दिखाई देता था। मध्यकाल में भौगोलिक व सांस्कृतिक विभाजन हुआ और लोग अनेक सम्प्रदायों किन्तु तात्विक ,मुस्लिम आदि बनें ,सिक्ख ,जैन ,बौद्ध ,एवं मजहबों मे बट कर हिन्दूदृष्टि से देखे तो हमारे खून में भिन्नता नहीं होने के कारण हम कह सकते हैं कि हमारे पूर्वज एक थे। यही कारण है कि ज्योतिषशास्त्र में वर्णित सोलह संस्कारों में प्रथम गर्भाधान संस्कार समग्र रूप में अपनायी जाने वाली विधा एक जैसी ही होती है। चूंकि गर्भधारण के बाद प्रसव कब होगा इसको जानने के लिए आज समाज मशीनी जाँच के चक्कर में कितना सारा धन खर्च करता है लेकिन हम थोड़ी सतर्कता , बरतें और आधान के समय को जानकर ज्योतिषीय सलाह लें तो आर्थिक कष्ट से बच सकते हैं। जैसे उदाहरण के रूप में वृहद्दैवज्ञरंजनकार लिखते हैं कि आधान के समय चन्द्रमा स्थिर राशि में हो

तो दिन में 281 दिन में तथा द्विस्वभाव राशि में हो तो 287 चर राशि में चन्द्रमा हो तो ,दिन में 292 – प्रसव होता है। यथा

**आधानं यदि दृश्यते स्थिरगते चण्डीशचूड़ामणौ,**
**नारीणां प्रसवस्तदा खलु भवेद्युग्मांकपक्षे दिनैः। 292**
**सप्ताशीत्यधिकैश्च पक्षसहितै ,स्तस्मिंश्चरक्षेत्रगे 287**
**चन्द्राष्टाश्वि र्वा द्विस्वभावे विधौ।। 276 दिनै रसातलभुजै 281**[3]

जन्म के अनन्तर बनने वाली जन्मकुण्डली को देख कर बच्चे के भविष्य तथा उसके द्वारा किये जाने वाले कार्य का विश्लेषण ज्योतिषशास्त्र के द्वारा ही किया जा सकता है कि यह बालक , समाज के किस क्षेत्र में जायेगा और किस तरह से लोकोपयोगी बनेगा। मनुष्य एक जैसा शारीरिक अवयव से सम्पन्न होने के बावजूद भी अनेकों भिन्नताएँ उसमें दिखाई पड़ती हैं। चूँकि ग्रहस्थिति को हम कारण मानते हैं क्योंकि व्यक्ति से ही राष्ट्र निर्माण की स्थिति बनती है और मनुष्य के ग्रह , समृद्ध बनाने में वह सफल भी हो पाता ह (राष्ट्र को) प्रभाव के कारण ही उसको ै। प्रथम दृष्ट्या दैवज्ञ विचार करते हैं कि कोई व्यक्ति समाज के लिए क्या करेगा इसको देखने के लिए ? बली , क्योंकि लग्नभाव पुष्ट , ज्योतिषशास्त्र उस व्यक्ति के लग्नभाव को देखने का निर्देश करता है होगा तो ही व्यक्ति शारीरिक रूप से कोई भी कार्य करने में समर्थ होग ा ,तथा लग्नभाव बलहीन , ऐसा व्यक्ति राष्ट्र के , पीड़ित हो तो वह व्यक्ति स्वयं के लिए कुछ कर सकने में समर्थ नहीं हो पाता लिए अथवा समाज के लिए क्या कर सकता है। आचार्य गणेशदैवज्ञ प्रतिपादित श्लोंको से स्पष्ट भी – हो जाता है। यथा

**देहाधीशः स पापो व्ययरिपुमृतिगश्चेत्तदा देह सौख्यं,**
**न स्याज्जन्तोर्निजर्क्षे व्ययरिपुमृतिपस्तत्फलस्यैव कर्त्ता।**
**मूर्तौ चेत् क्रूरखेटस्तदनु तनुपत्तिः स्वीयवीर्येण हीनो,**
**नानातङ्काकुलः स्याद् व्रजति हि मनुजो व्याधिमाधिप्रकोपम्।।**
**अङ्गाधीशः स्वगेहे बुधगुरुकविभिः संयुतः केन्द्रगो वा,**
**स्वीये तुङ्गे स्वमित्रे यदि शुभभवने वीक्षितः सत्वरूपः।**
**स्यान्नूनं पुण्यशीलः सकलजनमतः सर्वसंपन्निधानं,**

**ज्ञानी मन्त्री च भूपः सुरुचिरनयनो मानवो मानवानाम्।।**[4]

क्योंकि जातक के पुष्ट होने की स्थिति देखकर ही उस व्यक्ति या किसी व्यक्ति को राष्ट्र निर्माण के लिए उपदेशक , सलाहकार (मन्त्री) , राजकार्य का निर्वहण करने और मनुष्यों को अभिप्रेरित करके श्रेष्ठमानव निर्माण की दिशा को अग्रेसित करने वाला अथवा सहायक माना जा सकता है, क्योंकि व्यक्ति से समाज और समाज से राष्ट्र निर्माण की स्थिति बनती है। ज्योतिष कालज्ञापक शास्त्र माना जाता है और काल का अर्थ होता है समय , इसलिए कौन सा समय अनुकूल होगा, इसका विश्लेषण करके किया जाने वाला कार्यसम्पादन समाज और राष्ट्र के लिए हितकर होगा। लगता है यही कारण होगा कि जन्म से पूर्व भी ज्योतिष की उपयोगिता राष्ट्र के निर्माणार्थ अच्छे योग्य नागरिक अन्वेषण की दिशा में प्रयास करते हुए आधान लग्न का निर्धारण दैवज्ञों द्वारा ग्रहचार एवं अनुकूल परिस्थिति के मेल जोल से यशस्वी सन्तति उत्पन्न करने के लिए मुहूर्त्त का चयन कर आचार्य के बताएँ निर्देश के अनुसार आधान यज्ञ का अनुष्ठान होता था और उसके प्रतिफल रूप में उत्पन्न हुए जातक समाजिक सुरक्षा और राष्ट्रनिर्माण में अपनी महती भूमिका प्रदर्शित करते थे। उत्तम संस्कारवान् पुत्र की कामना से पुत्रेष्टियज्ञ का विधान हमारे शास्त्रों में विहित है। मित्रों समाज में आज की स्थिति कुछ भयावह सी लग रही है , क्योंकि मनुष्य का मनुष्य से लगाव न होकर कुत्सित भावना का प्रायः दर्शन हो रहा है। परिवार के सदस्यों में वह आदर का भाव नहीं रहा जो पहले था। क्रमशः ह्रास का अनुभव सभी कर सकते हैं। इसमें कारण यह है कि हमारा समाज ज्योतिष की सलाह से परे होता जा रहा है। यहाँ एक बात अवश्य कहना चाहूँगा कि ज्योतिष का भ्रामक प्रचार खूब-जोरों से चल रहा है ,या चलाया जा रहा है उन लोगों के द्वारा जिन्हें ज्योतिष के आरम्भिक ज्ञान (बेसिक) का भी बोध नहीं है , उनकी दुकानें चल रही हैं, और वे लोग मीडिया के माध्यम से अपना रोजगार चला रहे हैं , लेकिन वे लोग जिन्होंने परम्परा से ज्योतिष का अध्ययन किया है, और पठन-पाठन में लगे हैं , उन्हें कम लोग जानते हैं , तथा उन्हें मीडिया से भी कोई लेना देना नहीं । मित्रों ज्योतिष एक अत्यन्त गूढ़ और प्रभावकारी शास्त्र है जिसके लिए अधिकारी अन्वेषक विद्वान् या अध्येता कौन होगा इसे आप सभी आचार्य वराहमिहिर द्वारा रचितग्रन्थ बृहत्संहिता के सांवत्सरसूत्राध्याय में देख सकते हैं।[5] इतना ही नही महर्षि गर्ग का उल्लेख भी अत्यन्त महत्त्वपूर्ण प्रतीत होता है समाज के लिए। यथा –

**कृत्स्नाङ्गोपाङ्गकुशलं होरागणितनैष्ठिकम्।**
**यो न पूजयते राजा स नाशमुपगच्छति।।**
**अधिकृत्य ग्रहर्क्षादि जगतो येन निश्चयः।**
**तदङ्गमुत्तमं विन्द्यादुपाङ्गं शेष मुच्यते।।**
**नासांवत्सरिके देशे वस्तव्यं भूतिमिच्छता।**
**चक्षुर्भूतो हि यत्रैष पापं तत्र न विद्यते।।**[6]

कहने का आशय यह है कि सही मायने में जो ज्योतिषशास्त्र के अध्ययनाध्यापन में रुचि रखनें वाला होगा वह निश्चित संध्यावन्दन करने वाला और देवाराधन प्रिय होगा , तभी उसकी बुद्धि स्थिर और स्वस्थ्य होगी। जिसके कारण समाज की भलाई और उन्नति के लिए अपने शास्त्रसाधना के अनुसार अपना उपदेश देगा और उसके बताएँ अनुरूप कार्य करने वाला मनुष्य समाज और राष्ट्र की उन्नति हो , इस भावना से कार्य सम्पादित करेगा , ज्योतिषशास्त्र के अध्ययन में रुचि नहीं लेने और बाहर के लोगों द्वारा इसका अध्ययन कर प्रचार-प्रसार करने से कुछ विषयों के प्रति भ्रम भी फैला है कि यह शास्त्र विदेशी लोगों के द्वारा पल्लवित है , जबकि यह पूर्णतया निराधार कहा जा सकता है, क्योंकि ज्योतिष वेदाङ्ग है। इसे वैदेशिक भी मानते हैं। तो कैसे कोई कह सकता है कि गुरुत्वाकर्षण अथवा शून्य कहीं बाहर से आया है। हमारा अध्ययन के प्रति रुचि कम होना कारण हो सकता है। हमारा वेद जिसे अपौरुषेय की संज्ञा प्राप्त है उसमें सबकुछ है , हम सभी अध्ययन करें, तो इसे जान सकते हैं। और इस प्रकार के उत्तम ज्ञान के अध्ययन और अवबोध से जहाँ इस ज्योतिष विद्या का विकास होगा ही, समाज और राष्ट्र निर्माण में इस शास्त्र की भूमिका भी प्रतिष्ठापित होगी। मित्रों पाँचवी शताब्दी में पृथ्वी के आकार और गति का उल्लेख हुआ था , लेकिन विश्वास कालान्तर में हुआ। उसी प्रकार ग्रहण के विषय की महाभारत में भी चर्चा मिलती है , जिससे भारतीय ज्योतिष शास्त्र की प्रामाणिकता स्पष्ट होती है। मित्रों आज की परिस्थिति में भी ज्योतिष के महत्त्व को प्रमाणित किया जा सकता है , लेकिन सुविधा पूर्व की भाँति हो तो दैवज्ञ निरन्तर शास्त्रसाधना के द्वारा समाज को कुछ नया देने में समर्थ हो सकता है। निष्कर्ष के रूप में कह सकते हैं कि ज्योतिषशास्त्र का ठीक प्रकार से अध्ययन और अध्यापन हो तभी ऐसे उत्कृष्टशास्त्र के द्वारा समाज की भलाई के विषय में सोचा जा सकता है , तथा समाज जब जाग्रत और समृद्ध होगा तो ही

राष्ट्र की भलाई हो सकेगी। आज समय की भी मांग है कि हम सभीनिजस्वार्थ , संकीर्णता और रूढ़ीवादी दुराग्रहों को छोड़कर मानवीय मूल्यों और संवेदनाओं को आधार मानकर धर्मादि की व्याख्या करें। ज्योतिष और धर्म का कुछ ऐसा स्वरूप बनाया जाना चाहिए, जिसे अपनाने में किसी को कष्ट न हो, क्योंकि हमारा ज्योतिष इतना उदार है, जिसकी विशेषता का गुणगान निम्न श्लोक के द्वारा प्रमाणित भी हो जाता है। यथा –

**म्लेच्छाहि यवनास्तेषु सम्यक् शास्त्रमिदं स्थितम्।**
**ऋषिवत्तेऽपि पूज्यन्ते किं पुनर्दैवविद्द्विजः।।**
**यद्दानवेन्द्राय मयाय सूर्यः शास्त्रं ददौ सम्प्रणताय पूर्वम्।**
**विष्णोर्वसिष्ठश्च महर्षिमुख्यो ज्ञानामृतं यत्परमाससाद।।**
**पराशरश्चाप्यधिगम्य सोमाद् गुह्यं सुराणां परमाद्भुतं यत्।**
**प्रकाशयाञ्चक्रुरनुक्रमेण महर्षि सन्तो यवनेषु तन्ते।।**[7]

इसप्रकार आचार्य वराहमिहिर द्वारा प्रतिपादित उद्धरणों के आलोक में कह सकते हैं कि अच्छे दैवज्ञ से राष्ट्र और समाज की भलाई सम्भव है। यथा –

**न तथेच्छति भूपते पिता जननी वा स्वजनोऽथवा सुहृत।**
**स्वयशोऽभिविवृद्धये यथा हितमाप्तः सबलस्य दैववित्।।**[8]

## सन्दर्भ सूची

1. पंचतन्त्र – 5.38
2. यजुर्वेद – 7-14
3. बृहदैवज्ञरंजन – पृष्ठ – 4, श्लोक – 18, मोतीलाल बनारसी दास प्रकाशन वारणसी।
4. भावाध्याय- पृ. 10-12, श्लोक – 2-3, प्रकाशक – कृष्णदास अकादमी वाराणसी।
5. सांवत्सर सूत्राध्याय – पृष्ठ – 4, अध्याय – 2, प्रकाशक – चौखम्भा विद्याभवन, वाराणसी।
6. बृहत्संहिता – गर्गवचन- सांवत्सरसूत्राध्याय, पृष्ठ – 13, श्लोक 27 – प्रकाशक – चौखम्भा विद्याभवन, वाराणसी।

7. बृहत्संहिता सांवत्सर सूत्राध्याय – पृष्ठ – 14, श्लोक 30 , प्रकाशक – चौखम्भा विद्याभवन , वाराणसी।
8. बृहत्संहिता सांवत्सर सूत्राध्याय – पृष्ठ – 16, श्लोक 39 , प्रकाशक – चौखम्भा विद्याभवन , वाराणसी।

***

# मिथिला के शाक्त परम्परा में राजनगर के मन्दिरों का वास्तु विन्यास

डा. आशीष कुमार चौधरी
ज्यौतिषविभागः,
राष्ट्रियसंस्कृतसंस्थानम्, भोपालम्।

अनन्तकोटि ब्रह्माण्डात्मक प्रप ञ्च की अधिष्ठानभूता सच्चिदानन्दरूपा भगवती ही सम्पूर्ण विश्व को सत्ता स्फूर्ति तथा सरसता प्रदान करती है। सम्पूर्ण प्रपञ्च उन्हीं से उत्पन्न होता है और उन्हीं में लीन हो जाता है। मैथिल प्रदेश उनकी जन्म स्थली के रूप में विश्व प्रसिद्ध है। इसी कारण यहाँ की भूमि को ही फ्शक्ति पीठय् की संज्ञा दे दी जाती है, तो मन्दिरों की बात ही क्या? अनगिनत संख्या में यहाँ देवी के मन्दिर हैं , जिनको विविध नामों से जाना जाता है यहाँ शक्ति को शिव-पत्नी , दुर्गा, श्यामाकाली, उग्रतारा आदि अनेक रूपों में कल्पना की गई है। ऋग्वेद में चालीस देवियों के नाम प्राप्त हैं - उषा, रात्रि, पृथ्वी, अदिति, सरस्वती, रुद्राणी, इला, गौरी, उर्वशी आदि। तैत्तिरीय ब्राह्मण , शतपथ ब्राह्मण में देवी को शरद्काल के रूप में स्वीकारा गया है। बौधायन गृह्यसूत्र , मनुस्मृति में दुर्गा तथा ज्येष्ठा के रूप में काली अर्थात् शक्ति को चित्रित किया गया है। उपनिषदों में शक्ति को ब्रह्म या ईश्वर के रूप में स्वीकार किया गया है। श्वेताश्वतरोपनिषद् में शक्ति को माया तथा शिव को मायिन् कहा गया है। मुण्डकोपनिषद् में देवी के भिन्न-भिन्न नाम मिलते हैं , काली, कराली, मनोजवा आदि को सृष्टि की माता माना गया है। वहीं प्रकृति , पुरुष और जीवात्मा को बनाने वाली कभी-कभी प्रकृति और माया के रूप में भी चित्रण प्राप्त होता है। केनोपनिषद् में शक्ति को उमा-हेमवती कहा है। रामायण में शिव की पत्नी के रूप में उनका स्वरूप उमा , गिरिजा और पार्वती नाम से प्रसिद्ध है। महाभारत में इनके लिए कुमारी , कराली, कपाली, महाकाली, चण्डी, कात्यायनी, उमा आदि विशेषण हैं। देवीभागवतपुराण में शक्ति को ब्रह्म विद्या , महामाया और सर्वचैतन्यरूप माना गया है। यह प्रधान प्रकृति है , जो तीनों लोकों का कारण है। मार्कण्डेय पुराण में वर्णित शक्ति देवी-महात्म्य और दुर्गा सप्तशती नाम से विख्यात है। देवी ही पुण्यवानों की लक्ष्मी , पापियों की दरिद्रता, बुद्धिमानों की बुद्धि , सत्पुरुषों की श्रद्धा और कुलीनों की लज्जा है। शिवपुराण में शक्ति को शिव के रूप में आश्रित माना गया है और इन्हें ज्ञान शक्ति , क्रियाशक्ति, इच्छाशक्ति स्वीकारा

गया है। वायुपुराण में सम्पूर्ण शक्ति अर्थात् देवियों से व्याप्त माना गया है। लि ङ्ग और वायुपुराण में इनके पचास से ज्यादा नामों का उल्लेख है। वैष्णवपुराण में शक्ति विष्णु के अधीन है , इन्हें वैष्णवी कहा गया। यह विष्णु से अलग होने पर यह माया कहलाती है। ये सिंहवाहिनी , श्यामवर्णा, चार भुजाओं वाली , लाल आंखों वाली कालिकापुराण में वर्णित है। गरुणपुराण में घोर , रौद्र और अनुग्रह शक्तियों का उल्लेख मिलता है, इसी पुराण के अनुसार शक्ति देवी की पूजा महानवीं के दिन विधिवत की जाती है। अग्निपुराण के अनुसार अग्नि परा शक्ति है , जो सारे ब्रह्माण्ड में व्याप्त है। अग्निपुराण में प्रतिमाओं मन्दिरों और पूजा पद्धति पर विशेष प्रकाश डाला गया है। शक्ति संगम तन्त्र के अनुसार शिव और शक्ति अभिन्न हैं , ये उसी प्रकार अपृथक्‍ हैं जिस प्रकार अग्नि से गर्मी और चीनी से मीठापन। तन्त्रें में इनका स्वरूप दशमहाविद्या रूप में वर्णित है। दुर्गा, राजनगर देवी दुर्गा का नाम सुनते ही उनके दो रूप सामन आते हैं - सौम्य एवं उग्र जो सम्भवतः देवी की प्रतिमा का प्रकार ही है। उग्र देवियों की मूर्तियाँ अष्ट दस , बारह अथवा अठारह भुजी तैयार की जाती है। राजनगर-दुर्गा के हाथ में पाश, अंकुश, शंख, खड्ग, माला, बाण, धनुष आदि देखने को मिलता है , ऐसा स्वरूप हमें आगम ग्रन्थों में प्राप्त होता है। यहाँ की दुर्गा उग्र स्वभाव की प्रतीत हो रही है , कुछ हाथ वरद् तथा अभय मुद्रा में भी दिखाई पड़ता है। प्राचीनतम काल से ही इनकी पूजा निर्बाध रूप से होती चली आ रही है। महाभारत के भीष्मपर्व में आया है कि देवी-दुर्गा के आशीर्वाद से पाण्डवों ने विजय प्राप्त की। दुर्गासप्तशती में भी ऐसा ही वर्णन प्राप्त होता है। भागवतपुराण के अनुसार श्री बलराम अपनी तीर्थ यात्र के क्रम में आशीर्वाद लेने एक कन्या के पास गए थे जो दुर्गा थी। अपराजितपृच्छा के अनुसार इनका स्वरूप इस प्रकार है।

| क्रम | आगमिक | पौराणिक | अपराजित |
|---|---|---|---|
| 1- | नीलकण्ठी | रूद्रचण्डा | महालक्ष्मी |
| 2- | क्षेमंकरी | प्रचण्डा | नन्दा |
| 3- | हसिद्धि | चण्डोग्रा | क्षेमंकरी |
| 4- | वनदुर्गा | चण्डा | महारण्डा |
| 5- | अग्नि दुर्गा | चण्डवती | भ्रामरी |

6- जय दुर्गा चण्डरूपा सर्वमंगला

7- विन्ध्यवासिनी अतिचण्डिका रेवती

गर्भ-गृह में जगती पर पाँच फीट ऊँचे महिषासुर-मर्दिनी की प्रतिमा के ठीक सामने ही बली यन्त्र, शान्ति कलश है। विशिष्ट कोटि के पत्थर से निर्मित दुर्गा प्रतिमा के अतिरिक्त यहाँ सूर्य , गणेश, कार्तिकेय की प्रतिमा विद्यमान है। 30ग15फीट के गर्भ-गृह का पूर्वी भाग खुला है , गर्भ-गृह का आन्तरिक भाग मण्डलाकार है , 'प्रासादमण्डनम्' के अनुसार प्रसाद की सौमचौरस भूमि के दस भाग करके उनमें से दो-दो भाग की दोनों तरफ की दीवार और बाँकी छह भाग का गर्भ-गृह बनाना चाहिए। दो भागों में विभक्त मण्डप की जगती का मान क्रमशः 22ग30 एवं 25ग35फीट है , जिसका द्वार पूर्णतः खुला ही है। गर्भ-गृह के आगे चौकी वाला त्रिमण्डप एवं उसके आगे नृत्यमण्डप है, गर्भ गृह के आगे गूढमण्डप , इसके आगे चौकी वाले त्रिमण्डप और इसके आगे नृत्यमण्डप , बनाने का वास्तु ग्रंथ में निर्देश है , जिसका राजनगर दुर्गा मन्दिर में भव्य चित्रण हुआ है। प्रासाद के दसवें, ग्यारहवें अथवा बारहवें भाग के बराबर स्तम्भ का विस्तार रखना चाहिए तथा चार , आठ, बारह, बीस, कोने वाला और गोल ऐसे पांच प्रकार के स्तम्भ बनाने चाहिए। अपराजितपृच्छा में इन स्तम्भों के विविध नाम हैं जो अधोलिखित हैं -

1- चार कोने वाला - चतुरस्त्र

2- भद्र वाला या संयुत - भद्रक

3- प्रतिरथ वाला - वर्धमान

4- आठ कोन वाला - अष्टास्त्र

5- आसनोर्ध्वभद्र आठ कोने - स्वतिक

प्रांगण में ही हनुमान मन्दिर है, ऐसी किम्वदन्ति है कि ऐसा हनुमान मन्दिर पूरे भारत में कम ही देखने में मिलता है। एक हनुमान विराजित आशीर्वाद रूप में और दूसरे सुप्तावस्था में हैं। यहाँ की दुर्गा मिथिला में प्रसिद्ध है। प्रतिदिन मेले जैसी भीड़ रहती है, यहाँ। मन्दिर अतिप्राचीन है, चारों ओर वास्तुकला का स्वरूप दृष्टिगोचर होता है। मन्दिर का बाहरी भाग जीर्णोद्धार करने योग्य प्रतीत होता है। वर्तमान में यह देवस्थल न्यास बोर्ड के अधीन है। राजनगर की काली इस ब्रह्ममयी की असंख्य रूपों में उपासना होती है , कभी काली के नाम से तो कभी वागीश्वरी , शिवमयी, विमला, चण्डिका,

एक जटा, कुल सुन्दरी आदि असंख्य नाम हैं इनके असंख्या त्रिपुरा देवी असंख्याता च कालिका। जगत का संहार करने वाला इनका स्वरूप महाकाल का है। 12 फीट ऊँचे मण्डलाकार जगती पर इस महाकाल का स्वरूप प्रतिष्ठित है। प्रासादमण्डनम् के अनुसार सोमचौरस , आठ कौन वाली गोल और लम्बे प्रासाद जैसा आकार हो वैसी ही जगती ' बनाने का विधान है। संगमरमर से निर्मित लगभग 60-65 फीट ऊँचे इस काली मन्दिर का निर्माण कार्य तन्त्र विज्ञ महाराज 'रामेश्वर सिंह' द्वारा 1856 ई॰ में कराया गया। मिथिला प्रसिद्ध राजनगर का यह मन्दिर तान्त्रिक दृष्टि से अत्यन्त महत्वपूर्ण है। द्वादश लिङ्गोभद्र से आच्छादित 22 ग 22 फीट के नृत्यमण्डप के जगमोहन के चारों कोणों का स्वरूप इस प्रकार है -

इशान कोण - एक लिङ्गोभद्र

आग्नेय कोण - चतुर्थ लिङ्गोभद्र

नैऋत्य कोण - अष्ट लिङ्गोभद्र

वायव्य कोण - द्वादश लिङ्गोभद्र

मध्य में सर्वतोभद्र दाहिने में त्रिदेव प ञ्चदेवता, बाएँ भाग में नवग्रह , पूर्व में सूर्य पश्चिम में चन्द्र है। मण्डप पर ही तारा यन्त्र द्रष्टव्य है। 22 फीट के मुख्य मण्डप द्वार की पीठिका पर भिन्न-भिन्न तन्त्र प्रतीक उद्धृत हैं। 16 फीट ऊंचा द्वार वाला नृत्य मण्डप एवं गर्भ-गृह के द्वार की ऊंचाई 12 फीट है। गर्भ-गृह एवं नृत्य मण्डप और गर्भ-गृह एवं मुख्य मण्डप के बीच एक छोटी सी दीवार है। प्रासादमण्डनम् के अनुसार यदि गर्भ-गृह और मण्डप के बीच में यदि मित्ति (दीवार) का अन्तर हो तो मण्डप में स्तम्भ, पट्ट और तल ये समविषम किया जाए तो दोष नहीं होता। नृत्य मण्डप एवं गर्भ-गृह में प्रवेश केवल राजघराने के लोग एवं पण्डितों का ही होता है। आम लोग मुख मण्डप से ही देवी का दर्शन करते हैं। गर्भ-गृह के मध्य देवी काली , भगवान् शंकर के अतिरिक्त बटुक भैरव , गणेश, शान्ति कलश स्थापित है। मुख्य द्वार पर मछली का प्रतीक चिन्ह दृष्टिगत है , जिसमें तीर लगा हुआ है। प्रांगण में ही मण्डलाकार होम कुण्ड एवं बली-यन्त्र भी है। 125 एकड़ में फैला हुआ मन्दिर परिसर का यह क्षेत्र राजनगर-पैलेस नाम से ज्ञापित होता है। सम्पूर्ण मन्दिर काली-यन्त्र परसुप्रतिष्ठित है।






काली यन्त्र




काली राजनगर

***

# ज्योतिष-वास्तुशास्त्रयोः दिग्ज्ञानवैशिष्ट्यम्

**डा. अनिरुद्ध नारायण शुक्लः**
सहायकाचार्यः, ज्योतिषविभागः,
क. जे. सोमैया संस्कृत विद्यापीठ, मुम्बई।

भारतीयज्योतिश्शास्त्रे वास्तुशास्त्रे च दिग्ज्ञानस्य अतीवमहत्त्वं वर्णितमस्ति। दिग्साधनं विनैव उभयोः शास्त्रयोः स्वल्पमपिकार्यं न भवितुं शक्यते। अतः ग्रहाणां गणितसाधने देशान्तरादिसाधने वेध कर्मसु तथा वास्तुशास्त्रे गृहमन्दिरभवनादिनिर्माणे तथा संहिताशास्त्रे आकाशादिपरीक्षणाय यात्रादिमुहूर्ते ज्योतिषशास्त्रस्य वेदाङ्गमूर्ते सति यग्ज्ञादिषु मण्डपादिनिर्माणे हवनकुण्डनिर्माणे तथा व्यवहारिकजीवने च दिग्ज्ञानमपरिहार्यमस्ति। अत एव दिग्ज्ञानस्य विधिः ज्योतिषशास्त्रे विशेषरुपेण सिद्धान्तस्कस्य त्रिप्रश्नाधिकारे दृश्यते। न केवलमेतावदेव अपित्वाधुनिकविज्ञाने अपि दिग्ज्ञानविनैव किमपि कार्यं न सिध्यति। तद्दिग्ज्ञानं अस्मद्प्राचिनाः आचार्याः सूर्यछायावशात् ग्रहनक्षत्राणां दर्शनवशात् वा क्रियते। तद्यथा –

**यत्रोदितोर्कः किल तत्र पूर्वा तत्रा परायत्र गतः प्रतिष्ठाम्।**
**तन्मत्स्योऽन्ये च ततोऽखिलानामुदक्स्थितो मेरूरितिप्रतिष्ठाम्।।**[1]

इति वचनानुसारेण आचार्यभास्करैः यत्र सूर्यः उदेति तत्पुर्वा यत्रास्तं गच्छति तत्प्रतीचि भवति। पुनश्च आभ्यां दिग्भ्यां मस्यचापेन याम्योत्तरदिग्ज्ञानं भवति। परन्तु एषविधिः स्थूलः वर्तते। यतोहि प्रतिदिनं सूर्यस्य क्रान्तेः वैलक्षण्यात् स्वक्रान्तितुल्यसूर्यः वामे दक्षिणदिग्गतः भवति। अतएव सूर्यः प्रतिदिनं एकस्थानात् न उदयास्तौ करोति।

सूक्ष्मदिग्ज्ञानार्थं यदरवि अयनद्वयगतः (सायनमिथुनान्तधनुरन्तयोरन्तरगतः) स्यात्तदा क्रान्तिशून्यते सति तद्दिने जलवद् सुसमीकृतायां भूमौ वा शिलाखण्डे अर्थात् समतलभूमौ उपरि मध्याह्नकालिकछायातोपरधिकैः व्यासार्धैः (द्वादशाङ्गुलसमैः) समतलं वृत्तं लिखेत्। वस्तुतः यस्य कस्यपि इष्टशङ्कुना निर्मितवृत्ते मध्याह्नकालिकशङ्कुछाया तद्वृत्तान्तरस्थः तद्शङ्कुनाल्पः वा भवति। अतः द्वादशसमै अङ्गुलैः यदिवृत्तंलिखेत्तदा तद्वृत्तस्थमध्याह्नकालिकतद्शङ्कुछाया स्थास्यति, अस्मात् करणात् मध्याह्नकालिकशङ्कुछायातो... अल्पैः शङ्वगुंलैः समुत्पन्ने वृत्ते

छायाग्रगतं सूत्रं तद्वृत्ताद् बहिः स्थास्यतीति तदानीं दिग्ज्ञाने वैषम्यापत्तेर्मध्याह्नकालिकछायाधिकाङ्गुलानामेव ग्रहणामिति। लिखितसमतलवृत्तकेन्द्रे इष्टद्वादशाङ्गुलशङ्कुनिवेश्य रवेश्छायायाःपरीक्षणं कार्यम्। उदयास्तकाले शङ्कोछायावृत्ताद् बहिरन्तरं यावत् गच्छति, ततश्चोदयान्तरं क्रमेणोर्ध्वोर्ध्वगते पूर्वकपालस्थे सवितरि मध्याह्नं यावत् छाया पश्चिमकपाले उत्तरोत्तरमपचीयमाना मध्याह्ने चाल्पतरा भवति। सूर्यस्य खमध्यासन्नगमनेन नतांशानां क्रमशोऽपचीयमानत्वात्। अथ च खमध्यात् पश्चिमकपालगतेऽर्के नतांशानां क्रमेण उपचयात् छाया वृद्धया प्राग्विभागे वृत्तपरिधि मतिक्रम्य बहिर्गच्छति। सूर्योदयास्तं यावत् शंकोच्छायायाः ह्रास-वृद्धिक्रमेऽस्मिन् परार्धे-पूर्वार्धे च छायायाः प्रवेशनिर्गमस्थलक्ष्ये वृत्तपरिधौ चिह्नं विधाय तद्बिन्दुद्वान्तगता रेखा कार्या। इयं सूर्यसिद्धान्तदिशा क्षितिजकेन्द्रगतावास्तवपूर्वापररेखायाः समानान्तरा पूर्वापरानुरूपा भवति। अत्र एकस्मिन् दिने स्वलपान्तरात् शून्यमितं क्रान्तिचलनं स्वीकृत्य दिग्ज्ञानं कृतं वर्तते। सायनमकरादि कर्कादि विन्दावपि स्वलपान्तरेण क्रान्तिगत्येत्यल्पत्वाद्दिग्ज्ञानं सूक्ष्मासन्नं भवति। परन्तु वास्तविकरुपेणेयं पूर्वापरसूचिकारेखा क्रान्तिः पतिक्षणं चलत्वात् सूर्यस्थ याम्योत्तरचलनेन छायाप्रवेश निर्गमकालिकनतांशयोः साम्येऽपि तत्कालिन् छायाग्रपूर्वापरसूत्रयोर्मध्यगतभुजयोः समत्वात् पूर्वापररेखासमानान्तरा न भवति अतः भुजान्तरप्रदेशयोरन्तरं ज्ञात्वा छायानिर्गमचिह्नस्यायनदिशि चालनेन पूर्वोक्तसूत्रस्य वास्तविकं पूर्वापरत्वं सिद्ध्यति। यथोक्तं श्रीपतिता –

**यति भानुरपमण्डलवृत्ताद्दक्षिणोत्तरदिशोरनुवेलम्।**
**तेन सा दिगनृजुः प्रतिभाति स्याहजुः पुनरपक्रममौव्या।।**[2]

**दिग्ज्ञानार्थं भारद्वाजऋषिणा प्रकल्पितं शङ्कुयन्त्रम्** –

वैदिककालादारभ्य भारद्वाजऋषेः समुल्लेखः प्राप्यते। वैदिकसूत्रग्रन्थेषु भारद्वाजश्रौतसूत्रं भारद्वाजगृह्यसूत्रं चोपलभ्यते। ज्योतिषशास्त्रे संहिताजातकयोः ग्रन्थटीकासु क्वचित् क्वचित् भगवतो भारद्वाजस्य वचनानि उद्धृतानि।[3] भारद्वाजस्मृतौ एकोनविंशत्याध्यायाः सन्ति। द्वितीयाध्याये दिग्ज्ञानविषयकं वैज्ञानिकं वर्णनमस्ति।

अत्र दिग्ज्ञानवर्णनं कुर्वन् भारद्वाजो ब्रवीति यत् यस्मिन् सूर्यः उदेति तद्दिक्प्राची, यत्र सूर्योस्तमेति तद्दिग्प्रतीची। वामे उत्तरदिक्दक्षिणे दक्षिणदिक् भवति। एवं चतस्रो दिशः भवन्ति।

द्विदिशोरन्तराले एकैका दिशा कल्पनीया। [4] एवं दिक्सङ्ख्याष्टौ भवन्ति। पुनश्च ऊर्ध्वाभ्यन्तराधो दिग्भेदनं दिशां सम्मिलिततया सङ्ख्यैकादश विद्यते –

**अभ्यन्तरं तदूर्ध्वमुपरि स्मृतम्।**
**तदधस्तादधो दिक् स्यात् एकादशदिशः स्मृताः।।**[5]

सामान्यरूपेण सर्वत्र दिशां सङ्ख्या दश कथिता, किंत्वात्र तासां सङ्खेकादश निगदिता, इति वैशिष्ट्यं महर्षेभरद्वाजस्य। भारद्वाजेन दिग्ज्ञानार्थं शङ्कुनिर्माणं व्रणितम्। भारद्वाजस्मृतौ शङ्कुनिर्माणमुक्त्वा तेन प्रमाणीकृतं यद् यः भरद्वाजो धर्मशास्त्रस्याचार्यः स एव ज्योतिर्विज्ञानस्य वैज्ञानिक आसीत्।

**दिग्ज्ञानाय शङ्कुयन्त्रनिर्माणम्** –

दिग्ज्ञानाय शङ्कुनिर्माणार्थं मातङ्गश्रृङ्गखादिरशमीचन्दनतिन्दुककरकादिरवृक्षाणामेकस्य कस्यचिद् वृक्षस्य काष्ठमादाय पञ्चविंशतिमात्रं लम्बं शङ्कुं कारयेत्। अस्य मूर्धा चतुरङ्गुलप्रमाणेन् भवितुमर्हति। शङ्कोरष्टादशाङ्गुलात्मके द्वे नाभिक्षिते निर्मातव्ये। शङ्कुमध्ये सप्तादशाङ्गुलप्रमाणं न स्यान्नाभिप्रमाणम्।।[6]

यत्र नाभिक्षेत्रं द्वादशाङ्गुलात्मकं भवति स कनिष्ठः शङ्कु कथ्यते –

**यत्याश्च नाभौ भवतः द्वादशैकादशाङ्गुलौ।**
**कनिष्ठोसौ समाख्यातः शङ्कुच्छायावलोकने।।**

दिग्ज्ञानाय शङ्कुः सदैव निर्वर्णः स्निग्धः छत्रशीर्षश्च भवेत्। खदिरक्षीरिणीसालमघूखादिर काष्ठैर्निर्मिता शङ्कवो उत्तमाः कथिताः –

**खदिराशीरिणासालामधूखदिरास्तथा।**
**ख्याता शङ्कुत्तमा प्रोक्ता अथवा सालभूरुहा।।**[7]

**दिग्ज्ञानार्थं शङ्कुप्रयोगविधिः** –

भारद्वाजौ लिखति यदेते शङ्कव एकादशाङ्गुलादेकविंशव्यङ्गुलदीर्घा पूर्णमुष्टिप्रमाणात्मक नाभिद्वययुताश्च निर्मियन्ते। शङ्कुमूलं सूचिसदृशं करणीयम्। [8] वृषराशिस्थे सूर्योदये कन्यास्थे वार्कोदये शङ्कुर्मण्डले स्थापनीयः। शङ्कोच्छाया यत्र गच्छति सा प्रतीची दिशा तत्समुखे प्राची दक्षिणवामयोर्दक्षिणोत्तराशे ज्ञातव्ये। [9] अत्र भारद्वाजः केषाञ्चिदाचार्याणां

संस्कारमतमुपन्यस्तवान्। मेषे तुलायां मिथुने सिंहे च द्वयङ्गुलम्, कर्कवृश्चिकमीनेषु चतुरङ्गुलम्, धनुकुम्भयोः षड्गुलम्, मकरे चाष्टङ्गुलं छाययां शोधयित्वा सूत्रमापनकर्मणा दिशोर्मध्यमां ज्ञातव्यम्।[10] तत् खलु कतिपमानामाचार्याणां मतं भारद्वाजस्मृतौ सूष्टूक्तम्।

द्वयो राश्योर्मध्यमज्ञानार्थं भारद्वाजेनावोचि यद् मेषस्य सूर्योदये अथवा तुलाराशिस्थे सूर्योदये शङ्कुस्थापनां विधाय शङ्कोच्छाया यत्र निपतति तत्र छायान्ते बिन्दुं दद्यात् ततश्चापराह्ने शङ्कोः स्थापनं कृत्वा तच्छायान्ते बिन्दुं विधाय सूत्रं प्रसारयेद् यत्र तत्समो बिन्दु भवेत्त देव मध्यमं विजानीयात्।[11] एवं पूर्वपश्चिमयोर्दक्षिणोत्तरयोश्च मध्यमदिसा ज्ञातव्या। तद् यथा भारद्वाजेनोक्तम् –

**एवं मध्यमं ज्ञात्वा ततो विन्दुद्वयं क्षिपेत्।**
**ततो द्विविन्दुमध्ये तु समं सूत्रं प्रसारयेत्।।**
**एवं प्राचीप्रतीच्योस्तु जानीयान्मध्यमं बुधः।।**

एवं शङ्कुसूत्रयोः प्रयोगेण द्वयोर्दिशोर्मध्यदिशा ज्ञातुं शक्या। एतत्सङ्क्षिप्ततयात्र समुदितं वर्तते। एतन्मध्यमज्ञानं वास्तुशास्त्रे नगरग्रामगृहादिनिर्माणे परमोपयोगी विद्यते। भारद्वाजस्मृते द्वितीयेध्यायेङ्गुलकिष्कुवितस्ति-हस्तादिपरिमाणमपि सष्ठुतया निगदितम्। दिग्ज्ञानार्थं शङ्कुयन्त्रनिर्माणं प्रयोगात्मकं ज्योतिषशास्त्रस्यास्य च विज्ञानमभिधातुं शक्यते। महर्षिणा भारद्वाजेन वैज्ञानिकं शास्त्रं व्यधायि। वैमानिकशास्त्रकार एव भारद्वाजः स्मृतिधर्मशास्त्रकारोपि भवितुमर्हति, यतोहि तेन स्वकीयदिग्ज्ञानार्थं शङ्कुयन्त्रस्य निर्मितिः कृता।

**दिशाज्ञानदृष्ट्या वास्तुशास्त्रदृष्ट्या च दिशायाः महत्त्वम्** –

परिक्षितां भूमिं समं कृत्वा भूमौ वृत्तं विरच्य तस्य केन्द्रे स्थापितस्यद्वादशाङ्गुलशङ्कोः छाया पूर्वाह्णे वृत्तस्य यं बिन्दुमधिकृत्य प्रविशति वृत्तस्यास्थितं तद् बिन्दुः पश्चिमे वा अपराह्णे छायानिर्गमविन्दुनिष्ठवृत्तविन्दुं पूर्वदिशायां जानीयात्। तन्मध्ये (पूर्वपश्चिमयोर्मध्ये) मत्स्योत्पादनेन दक्षिणोत्तररेखा भवति। पूर्वबिन्दुकेन्द्रात् बिन्दुद्वयान्तःपातिरेखा त्रिज्ययोत्पन्नं वृत्तमेकं च पश्चिमबिन्दुकेन्द्रात् विन्दुद्वयान्तः पाति रेखा त्रिज्ययोत्पन्नं वृत्तमनयार्योगेन मध्यगतं शकलं मत्स्याकारं भवति, तन्मत्स्यमुखपुच्छविन्दुद्वयगता रेखा पूर्वापरद्वयान्तः पातिरेखायाः मध्यगता तदुपरिलम्बरुपा च भवति, सा रेखा दक्षिणोत्तररेखा लिखितवृत्ते यत्र विन्दुद्वये (उभयदिशि) लगति ते वास्तवदक्षिणदिशौ स्तः।

यतो दिक्साधनं विना निर्मितगृहं कुलनाशकं भवति। अतः विश्वकर्मामतानुसारेण प्रासादस्य, सदनस्य, अलिदस्य, द्वारस्य, भित्ते निर्माणे दिक्मूढात् कुलनाशः जायते। यथा –

**प्रासादे सदनेऽलिन्दे द्वारे कुण्डे विशेषतः।**

**दिङ्मूढ़े कुलनाशः स्यात्तस्मात्संशोधयोद्दिशः।।**[13]

वास्तुपुरुषोऽयं तृतीयमासाभ्यन्तरे दिशापरिवर्तनं करोति। यस्मिन् मासे वास्तुपुरुषस्य दृष्टिः यस्यां दिशायां भवति तथा तस्य पादः यस्यां दिशायां भवति तस्यां दिशायां वापीकूपतडागभवनप्रासादीनां निर्माणं वर्ज्यम्।

भाद्रपद – आश्विन – कार्तिक मासेषुवास्तुपुरुषस्य शिरः पूर्वदिशायां, पादः पश्चिमदिशायां, दृष्टिः दक्षिणदिशायां भवति। मार्गशीर्षपौषमाघमासेषु दक्षिणदिशायां शिरः, उत्तरदिशायां पादः, पश्चिमदिशायां दृष्टिः, भवति। फाल्गुनचैत्रवैसाखमासेषु क्रमशः पश्चिमदिशायां शिरः, पूर्वदिशायां पादः, दृष्टिः उत्तरदिशायां भवति। ज्येष्ठआषाढश्रावणमासेषु उत्तरदिशायां शिरः, दक्षिणदिशायां पादः, पूर्वदिशायां दृष्टिः भवति।

**रात्रौ दिक्साधनविधिः** –

भवनदेवालयोः निर्माणे दिग्ज्ञानस्यावश्यकतास्ति। दिग्ज्ञानाय रात्रौ दीपं सूत्रं ध्रुवतारं च एकस्मिन्नेवसूत्रे नीत्वा (स्थाप्य) दक्षिणोत्तर रेखा कार्या, दक्षिणोत्तरेण पूर्वपश्चिमरेखा कार्या (दक्षिणोत्तररेखायाः ऊर्ध्वगामी रेखा पूर्वापररेखा) दिने इकसारभूमौ शङ्कुस्थाप्य आतपे तच्छाया आधारेण रेखोत्पादनेन दिक्संज्ञा भवति। यथा –

**रात्रौ दिक्साधनं कुर्याद्दीपसूत्रध्रुवैक्यतः।**

**समे भूमिप्रदेशे तु शङ्कुनादिवसेऽथवा।।**[14] इति

**सन्दर्भग्रन्थाः-**

1 सिद्धान्तशिरोमणिः गोलाध्यायः भूवनकोशे श्लोक सं. 45

2 सिद्धान्तशेखरः त्रिप्र. श्लो. सं. 2 / 1

3 भारतीय ज्योतिष पृ. 631

4 भरद्वाजस्मृतौ – 2/2-3

5 भरद्वाजस्मृतौ – 2/4-5

6 भरद्वाजस्मृतौ – 2/28-30

7 भरद्वाजस्मृतौ – 2/42-43

8 भरद्वाजस्मृतौ – 2/43-44

9 भरद्वाजस्मृतौ – 2/38-39

10 भरद्वाजस्मृतौ – 2/40-42

11 भरद्वाजस्मृतौ – 2/23-26

12 भरद्वाजस्मृतौ – 2/74-75

13 ज्योतिर्निबंद्धे पृ. 166

14 प्रासाद मण्डनं, मिश्रकलक्षणम् – श्लो. 23

# वेदान्तविभागः

# श्रीसुरेश्वराचार्याणामाभासवादः

**डॉ. भगवानसामन्तरायः**
विभागाध्यक्षः, अद्वैतवेदान्तविभागः,
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)
वेदव्यासपरिसरः, बलाहरः, हिमाचलप्रदेशः।

आचार्यशङ्करभगवत्पादप्रतिष्ठापितस्याद्वैततत्त्वस्य प्रवाहः कालान्तरे विविधैराचार्यैः धारायितः दृश्यते। विष्णोश्चरणाम्बुजनिर्गता गङ्गा यथा महीतलं प्राप्य बहुधा बहुभिश्चोपकृता। तथैवाद्वैततत्त्वमिदं विविधाचार्याणां भूयो भूयः परिशीलनेन परिष्कृतं पुष्टञ्चाभवत्। अद्वैततत्त्वस्य परिपुष्टौ परिष्कृतौ वा सुरेश्वराचार्याणामाभासवादस्य विवरणाचार्याणां प्रतिबिम्बवादस्य आचार्यवाचस्पतिमिश्राणाम् अवच्छेदवादस्य च भूमिकाया अतीव महत्त्वं वरीवर्ति।

वेदान्तेषु तत्र तत्र जीवस्वरूपनिरूपणावसरे अन्तःकरणावच्छिन्नं चैतन्यमिति, ब्रह्मणः प्रतिबिम्बो जीव इति ब्रह्मणः आभासो जीव इति च त्रयो वादाः शास्त्रकारैः उल्लिख्यन्ते। तत्र सर्वेऽपिइमे वादाः श्रुतिमूलकाः भाष्यमूलकाश्च भवन्ति। तद्यथा –

**यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः।**
**सर्वे लोकाः, सर्वे प्राणाः, सर्वाणि भूतानि व्युच्चरन्ति।।** इति।(वृ.2/1)
**यथा सुदीप्ताः पावकादिस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः।**
**तथाक्षराद् द्विविधाः सौम्यभावाः प्रजायन्ते तत्र चैवापियन्ति।।** इति। (मु. 2/1)

विस्फुलिङ्गः यथा अल्पकाष्ठावच्छिन्नोऽग्निः, तथा जीवोऽपि अल्पान्तः करणावच्छिन्न इति ज्ञायते। स्मृतावपि-

**ममैवांशो जीवलोके जीवभूतः सनातनः इति भगवद्गीतावचनम्।** (भ.गी. 15/7)एवं चावच्छिन्नवादस्य श्रुतिस्मृतिमूलकत्वं प्रतिपादितम्। प्रतिबिम्बवादश्च यथा –यथा ह्य यं ज्योतिरात्मा विवस्वान्नपो भिन्ना बहुधौकोऽनुगच्छन् उपाधिना क्रियते भेदरूपः देवः क्षेत्रेष्वेवमजोऽयमात्मा।।

**एक एव हि भूतात्मा भूते भूते व्यवस्थितः।**

**एकधा बहुधा चैव दृश्यते जलचन्द्रवत्।।** (ब्र. वि. 12) इति श्रुतिः

भागवतं च वचनं यथा – यद्यज्जनो भगवते विदधीत मानं तच्चात्मने प्रतिमुखस्य यथामुखश्रीः इत्येवं प्रकारेण प्रतिबिम्बवादः अभिज्ञायते।

**मायाभासेन जीवेशौ कथेति.......**(श्वेता)

**एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च** (का. 2/2/9)

**स एव इह प्रविष्टः** इति (बृ.1/4/7)

इत्याद्या श्रुत्या आभासवादोऽपि प्रतीयते।

अत्र बहूनां शङ्का जायते यत्, प्रतिबिम्बशब्द एव आभासपदेन प्रयुज्यते। तस्मात् प्रतिबिम्बवादः एवाभासवादः नातिरिक्तः इति वक्तुं शक्यते। बिम्ब एव हि प्रतिबिम्बः नातिरिक्तः, यतो हि दर्पणप्रतिहतैर्नयनरश्मिभिः परावृत्य बिम्बस्यैव ग्रहणात् बिम्बे चक्षुस्संयोगाभावः इति न शङ्कनीयः। अत्रैव आभासवादस्यारम्भः शङ्कायाः समाधानपुरस्सरम्। तथाहि प्रतिबिम्बः बिम्बाद् भिन्नः प्रातीतिकश्च। यथा शुक्तौ रजतमध्यस्तम्। एवमेव दर्पणेऽपि बिम्बः प्रतिबिम्बरूपेणाध्यस्तः। तस्य चाधिष्ठानज्ञाने सत्यपि यावद्दर्पणसान्निध्यं तावत् सत्त्वम्, दर्पणापनयने नाश इत्यभ्युपगमः।

आचार्यश्रीमच्छङ्करभगवत्पादैस्तु **पर एवात्मा देहेन्द्रियमनोबुद्ध्युपाधिभिः परिच्छिद्यमानो बालैः शारीर इत्युपचर्यते** (ब्र.सू.भा.1/2/3) इत्यादौ अवच्छेदवादः अङ्गीकृतः।**आभास एव जीवः परस्यात्मनो जलसूर्यकादिवत् प्रतिपत्तव्यः** (ब्र.सू.भा.2/3/40) इत्यादौ प्रतिबिम्बवादः स्वीकृतः। तत्रैवाभासपदप्रयोगादाभासवादोऽपि परिगृहीतः। यद्यपि तत्र प्रतिबिम्बस्थाने आभासपदं व्यवह्रियते, परं तूपदेशसाहस्र्यामाचार्यैः आभासवादः स्पष्टतयैव व्यवहृतः। तद्यथा – **आभासासत्त्वमेव च** (ब्र.सू.2/18/43), **आभासस्याप्यवस्तुतः** इति (ब्र.सू.2/18/44)।

अयमाभासवादः श्रीविद्यारण्यमुनिभिः पञ्चदश्यां चित्रदीपप्रकरणे **कूटस्थो जीवब्रह्मेशौ इत्येवं चिच्चतुर्विधा** (प.द.6/18) इत्यारभ्य कूटस्थदीपप्रकरणे आभासवादस्य सुस्पष्टं परिकल्पनं कृतम्। तत्रैव च आभासस्यावस्तुत्वे **तत्त्वमस्यादि** वाक्यात् जीवेश्वरयोरैक्यप्रतिपत्तिः कथं युज्यते? इत्याशङ्क्य **नेदमभेदे सामानाधिकरण्यम् अपि तु बाधायाम्**। यत् **त्वम्** इत्यभिमतं तत् तथा न,

अपि तु ब्रह्मैव। यथा यः स्थाणुः स पुमान् इतिवत्। तत्रैव कूटस्थदीपप्रकरणे आभासवादविषये काचन शङ्का उत्थापिता। सा च इत्थम् –

**ननु परागर्थप्रमेयेषु या फलत्वेन संमता।**

**संवित् सैवेद्य मेयोऽर्थः वेदान्तोक्तिप्रमाणतः।।** इति। (प.द.8/11)

अर्थात् इदं वार्त्तिकं आभासवादस्य विरुद्धं प्रतिपादयति। अस्मिन् हि वार्त्तिके फलत्वेन संमता संवित् चिदाभास एव न तु शुद्धं चैतन्यम्। तस्य प्रागपि सत्वेन फलत्वासम्भवात्। तथा च आभासस्य शुद्धब्रह्मणाऽभेदः खल्वत्र प्रतिपाद्यते। एवं चायमाभासवादः वार्त्तिकविरुद्धः इति आशंक्यते।

तत्र पञ्चदशीकारः विद्यारण्यमुनिः एवं समादधाति, यथा –

**इति वार्त्तिककारेण चित्सादृश्यं विवक्षितम्।**

**ब्रह्मचित्फलयोर्भेदः साहस्र्यां विश्रुतो यतः।।** (प.द.8/12)

इति श्लोकेन वार्त्तिककारैः कृतः **सैव मेयोऽर्थः** इति प्रयोगः सादृश्यात् गौणः इति पञ्चदशीकारैस्समाहितम्। वार्त्तिककाराः हि बृहदारण्यकभाष्यवार्त्तिके **स एव इह प्रविष्टः** इति श्रुतिवाक्यव्याख्यानावसरे आत्मनः बुद्ध्यादौ प्रवेशः **प्रवेशो मुखबिम्बवत्** इति वदन्तः आदर्शे मुखप्रवेशवत् प्रतिबिम्बतयेति समादधुः। प्रतिबिम्बस्य मुखाभिन्नतया तस्य ग्रहणे चक्षुः संयोगः कथमुपपादनीय इति शङ्कायाम् –

**दर्पणाभिहता दृष्टिः पर्यावृत्या स्वमाननम्।**

**व्याप्नुवन्त्यविभागेन भ्रान्ति नो जनयेद्यथा।।** इति। (वृ.भा.वा.1/4/618)

प्रतिबिम्बवादिभिः उक्तमेव समाधानमप्यूचुः वार्त्तिककाराः वार्त्तिके चिदाभासपदप्रयोगो बहुशः अभ्यस्तः इति कृत्वा सुरेश्वराचार्यस्य आभासवादः एवेति सम्मतं बहूनां भ्रान्तिमजनयत्। किं च आभासपदस्य प्रतिबिम्बे एव रूढिः। अत एव **आभास एव च** इति सूत्रे प्रतिबिम्बे आभासपदं प्रयुयोज भगवान् सूत्रकारः। एवं च प्रतिबिम्बवादाद् भिन्न श्रीसुरेश्वराचार्याणामयमाभासवादः।

प्रातस्स्मरणीयानामाचार्यचरणानां डॉ. देवनाथाचार्याणां शृङ्गगिरावस्थानकाले आचार्यश्रीमच्छङ्करभगवत्पादेषु विशिष्य तच्छिष्यप्रथमपीठाधीश्वरेषु आचार्यश्रीसुरेश्वरभगवत्पादेषु

तेषामहैतुकी श्रद्धा भक्तिर्वा मया पर्य्यलक्षि। सर्वदा श्रीसुरेश्वराचार्याणां वैदिकविद्वत्ताविषये मां व्यबोधयन्। अतस्तेषां संस्मरणे मदीयं श्रद्धाभक्तिपुष्पमिदं चरणस्पर्शि भवतु इति शम्।।

**अनुशीलितग्रन्थसन्दर्भाः-**

1.अद्वतवेदान्तदर्शनम् – प्रो. राममूर्ति शर्मा

2.वेदान्तशास्त्रेतिहासः – आर्. तङ्गास्वामी

3.बृहदारण्यकभास्यवार्त्तिकम् – श्रीसुरेश्वराचार्य, दक्षिणामूर्ति प्रकाशन

4.ब्रसूत्रशाङ्करभास्यम् – चौखम्बा संस्कृत सिरिज

5.एकादशोपनिषद (शाङ्करभास्यसंहिता) – मोतीलाल बनारसीदास

6.पञ्चदशी – श्रीविद्यारण्यमुनिप्रणीता

7.वेदान्तसारः – श्रीसदानन्दयतिप्रणीत

8.श्रीमद्भगवद्गीता – शाङ्करभाष्योपेता, गीताप्रेस, गोरखपुर

9.सिद्धान्तलेखसङ्ग्रहः – श्रीमदप्पय्यदीक्षितः

10.रत्नप्रभा भामती कल्पतरु –मोतीलाल बनारसीदास

# आधुनिककाले भगवद्गीतायाः प्रासङ्गिकता

**डा. एसच्चिदानन्दमूर्त्तिः .**
सहायकाचार्यः, शिक्षाविभागः,
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

भगवता श्रीकृष्णेन गीतमिदं श्रीमद्भगवद्गीताशास्त्रं महाकविव्यासप्रणीतस्य महाभारतस्य अङ्गत्वेन विराजते। गीतेयं श्रीमन्महाभारते भीष्मपर्वणि पञ्चविंशदारभ्य द्विचत्वारिंशदध्यायपर्यन्तं व्याप्य वर्तते। भगवद्गीता नाम -

भगवता गीता।
भगवतः गीता।
भगवती गीता।

भगवद्गीतायाम् अष्टादशाध्यायाः सन्ति। सप्तशतं श्लोकाः समुपलभ्यन्ते। इयं च गीता कर्म -भक्ति-ज्ञानमिति षट्कत्रयरूपेण विभक्तमस्ति।

**गीतासुगीता कर्तव्या किमन्यैशास्त्रविस्तरैः।**
**या स्वयं पद्मनाभस्य मुखपद्माद्विनिश्रुता।।**

साक्षात् श्रीकृष्मपरमात्मनः मुखारविन्दात् आविर्भूता गीता एका एव पर्याप्ता मानवजीवनविकासाय साफल्याय भवति।

सम्प्रति मनुष्यः स्वबुद्ध्या विवेकेन च समग्रममुं प्रपञ्चं करतलामलकवत् नियमितुं प्रभवति। किन्तु न स्वात्मानम्। मानवदृष्टिः बाह्यविषयेष्वेव प्रसरति न स्वात्मनि। तस्मादेव समाजे अशान्तिः अनुदिनं प्रवर्धते। नैतिकमूल्यानि नष्टं गतानि। 'ज्ञानं हि तेषामधिकोविशेषः इति प्राणिकोटिषु मानवस्य विशेषता। परन्तु अयं मनुष्यः कामक्रोधादिभिराविष्टस्सन् युक्तायुक्तं , धर्माधर्मं, कर्तव्याकर्तव्यं च परित्यज्य " सर्वं स्वार्थं समीहते। इति वत् स्वार्थायैव प्रवर्तते। अनेन मनुजस्य बाह्योन्नतिः सिध्यति न तु आत्मोन्नतिः। मनुजस्य बाह्योन्नतिः आत्मोन्नतिः भगवद्गीतया सिध्यते।

प्राचीनशास्त्राणि निवृत्तिमार्गमेव उपदिशन्ति। परं गीताशास्त्रं प्रवृत्तिधर्मं निवृत्तिधर्मं च समन्वयं कुर्वत् मानवजीवनादर्शान् निरूपयत् नित्यजीवने आदर्शग्रन्थत्वेन समजायत।

भगवद्गीता धर्मशब्देन समारभ्यते। धर्मस्तु मानवसमाजस्य उद्धारको भवति। पामरैः आश्रितम् अस्वर्ग्यम् अकीर्तिकरं मनोव्याकुलत्वम् , अधैर्यं माऽप्नोतु। तस्माद् क्षुद्रं मनोदुर्बलत्वं परित्यज्य उत्तिष्ठ। कर्तव्यरतो भव। यथा -

**कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्।**
**अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन।।**
**क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते।**
**क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ट परन्तप।।** इति। भगवद्गीता२/२ -,३

एतत् श्लोकद्वयं समाजे विषमस्थितैः विद्यमानस्य पुरुषस्य हृदयदौर्बल्यं दूरीकृत्य स्वकर्तव्यतां बोधयति।

**विद्याविनयसम्पन्ने ब्रह्मणे गवि हस्तिनि।**
**शुनिचैव स्वपाके च पण्डितास्समदर्शिनः।।** भगवद्गीता१८/५ -

उपर्युक्तविषयेषु समं ये पश्यन्ति तादृशाः समदर्शिन एव पण्डिताः भवन्ति इति भावः।

आधुनिकसमाजे अस्मास्वपि पण्डिताभिधेयाः नैके भवन्ति। परं तेषां मानवेष्वेव समदृष्टि नैव भवति किमु अन्यप्राणिषु। सम्प्रति भेददृष्टिः अभिवर्धते। परोपकारदृष्टिस्तु क्षीयते। तस्मादेव अस्माकमशान्तिः। तस्मात् अस्माभिः एतेषु विषयेषु आत्मावलोकनं कर्तव्यम्।

**काम एष क्रोध एष रजोगुणसमुद्भवः।**
**महाशनो महापाप्मा विध्येनमिह वैरिणम्।।**भगवद्गीता३७/३ -

रजोगुणात् समुत्पन्नाः कामक्रोधादयः त्वां बलात् पापकर्मसु नियोजयन्ति अस्माकं नित्यजीवनेऽपि एतादृशा प्राग् पदे पदे समुद्भवन्ति। असत्यं न वक्तव्यम् , अधर्मं न चरितव्यम् , धूमपानं सुरापानं च न कर्तव्यम् इति नित्यं चिन्तयन्त एव वयं तेष्वेव कर्मसु बलात् प्रवर्तामहे। भगवतः वचनं यदि सम्यगवगच्छामः, तर्हि अवश्यं वयं कामक्रोधेभ्यः दूरे तिष्ठामः।

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।**
**मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि।।** इति। भगवद्गीता४७/२ -

फलाशक्त्या यदि कर्म क्रियते , तर्हि कदाचित् प्रारब्धवशात् फलं नैव लभ्येत। तदा खिन्नो भवति। निष्कामभावनया यदि कर्म करोति , तर्हि फलाभावेऽपि दुःखं नैव भवति। फलं भवति चेत्

सानन्दम् अनुभवति। लोके कश्चित् क्रीडाकारः फलमपेक्ष्य क्रिकेट् क्रीडति , कदाचित् सः पराजितो भवति। तेन चिन्तितं फलं सः नैव लभते। ततश्च खिन्नो भवति। अपरस्तु कश्चित् कर्तव्यबुध्या फलमनपेक्ष्यैव क्रिकेट् क्रीडति सः पराजितः चेदपि व्याकुलो न भवति। यदि समीचीनं फलमायाति उभयोरपि समानम्। किन्तु निष्कामकर्मिणः मनसः निर्मलत्वं भवतीति विशेषः।

"One Man's God is another's devil "एनां पद्धतिं निराकरोति भगर्वीता। यथा -

**यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति।**

**तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्।।** इति। भगवद्गीता २१/७ -

सम्प्रति समाजे मानवः स्वकर्तव्यपरिपालने उद्वेगमनुभवन् दृश्यते। तदर्थमेव इदानीं Stress Management नाम्ना सर्वत्रापि विद्वांसः कार्यशाला निर्वहन्ति। एतदर्थं भगवता श्रीकृष्णेन गीतायां बहूनि साधनानि निर्दिष्टानि। यथा -

**तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः।**

**उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये।।**

**समं कायशिरोग्रीवं धारयन्नचलं स्थिरः।**

**सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्।।**इति। भगवद्गीता १२/६ -,१३

अद्यतनकाले बहूनाम् महती समस्या भवति मानसिकसमस्या। अर्जुनस्यापि तादृशी स्थितिरेव आसीत्। अस्मदनुभवमेव अर्जुनः प्रतिनिधित्वेनात्र स्पष्टयति -

**चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्।**

**तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्।।** इति। भगवद्गीता ३४/६ -

इयं च समस्या अस्माकं समेषामपि वर्तत एव। अर्जुनस्यैव मनसः संयमनं वायोरिव सुदुष्करं चेत्। किमु वक्तव्यम् अस्मद्विषये। वयं मनसा एव बलात् निन्द्यकर्मस्वपि प्रवर्तामहे। कर्तव्याकर्तव्ये प्रमादमनुभवामः। वासुदेवस्य वचनमनुसृत्य अभ्यासेन शनैः शनैः मनसः निग्रहः कर्तव्यः। तेन लक्ष्यसाधने समर्थो भवामः।

आधुनिककाले IT Bhoom प्रति बहवः आकर्षिताः। ये स्वधर्मं त्यक्त्वा गताः ते प्रत्यागताः। स्वधर्माचरणश्रेष्ठत्वं गीतायां सुष्टु प्रतिपादितं यथा-

**श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्।**

**स्वधर्मे निधनं श्रेयः परधर्मो भयावहः।।** इति। भगवद्गीता३५/३ -

स्वानुष्ठितपरधर्मापेक्षया स्वधर्म एव श्रेष्ठतमः। स्वधर्माचरणे मरणमपि भवतु उत्तममेव परं स्वभावविरुद्धं परधर्माचरणं तु भयास्स्पदं भवति।

**अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः।**

**यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः।।** इति। भगवद्गीता१४/३ -

अन्नात् प्राणिनः जायते , अन्नं पर्जन्यात् समुत्पद्यते। पर्जन्यः यज्ञाद्भवति यज्ञः कर्मणः समुद्भवति। वैज्ञानिकाः अपि यागाद्यनुष्ठानम् अत्यन्तं फलदायकमित्युच्यन्ते। यागाद्यनुष्ठानेन वृष्टिः, वातावरणनैर्मल्यं, इष्टसिद्धिश्च भवति।

समाजे श्रेष्ठः ज्येष्ठः यद्यदाचरति इतरेऽपि तदेवाचरति। सः यत् प्रमाणमिति स्वीकरोति तदेव प्रमाणमिति सर्वेऽपि लोकाः अनुसरन्ति। मानवजीवनम् आदर्शमयं स्यादिति गीताचार्यः बोधयति। यतोहि तमेव अनुसरति अनुयायिणः। प्रपञ्चे आदर्शजीवनाय मनुष्य एक एव योग्यो भवति। युक्तायुक्तविलक्षणत्वात्। यथा-

**यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।**

**स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।।** इति। भगवद्गीता२१/३ -

अद्यतनकाले बहुत्र Communication Skills इत्यस्मिन् कार्याशालाः निर्वहन्ति। परं गीतायां सम्प्रेषणोपायाः सुष्टु प्रतिपादिताः। यथा -

**अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।**

**स्वाध्यायाभ्यसनं चैव वाङ्मयं तपोच्यते।।** इति। भगवद्गीता१५/१७ -

आधुनिकसमाजे यान्त्रिकजीवने जितेन्द्रियाः मृग्याः एव भवन्ति। येषामिन्द्रियादीनां निग्रहः न भवति। तेषां तु स्थिरबुद्धिः नैव भवति। तेन सततम् उद्वेगः अनुभूयते। तद् निवारणार्थं गीतायाम् उपायमुक्तम्। यथा -

**उद्धरेदात्मनात्मानात्मानामवसादयेत्।**

**आत्मैव ह्यात्मनो बन्धुः आत्मैव रिपुरात्मनः।।** इति।

आत्मना आत्मानम् उद्धरेत्। आत्मानमात्मना न नाशयेत् यतः आत्मनः आत्मैव बन्धुः आत्मनः आत्मैव रिपुश्च भवति। वस्तुतः स्वस्य उन्नतेर्वा अवनतेर्वा कारणं स्वयमेव भवति।

प्राच्यपाश्चात्यविद्वांसः महापुरुषाः भगवद्गीता एव सकलजीवकोटीनां परमतत्त्वार्थबोधिनी इति मुक्तकण्ठम् उद्घोषयन्ति। गीतायाः विश्वप्रियत्वं कथयन् महर्षिः एवमुक्तवान्।

**भारतामृतं सर्वस्वं विष्णोर्वक्त्राद्विनिसृतम्।**
**गीतागङ्गोदकं पीत्वा पुनर्जन्म न विद्यते।।** इति।

***

# संस्कृतवाङ्मये भक्तितत्त्वानि

**डॉ. विनोद कुमार शर्मा**
संविदाध्यापकः
(रा. सं. सं. मुम्बईपरिसरः )

भक्तिशब्दः भज् धातोः क्तिन् प्रत्यये कृते सति सम्पद्यते। पदस्य अर्थः भवति सेवायाम् उपासनायाम् च। भक्तिस्तु अनन्या भवत्यैव। नामस्मरणेन जनाः पुनीताः भवन्ति। भगवता विष्णुना अपि उक्तम् –

**मद्भक्ताः यत्र गायन्ति तत्र तिष्ठामि नारद।**

भक्तिस्तु नवधा अस्त्यैव। तथापि इष्टदेवभेदेन सम्प्रदायभेदेन सम्प्रदायभेदेन आत्मभेदेन भक्तिः क्रियते जनैः। प्रसिद्धेन पुष्पदन्तेन उदाहरणमेकं प्रदत्तम् –

**रूचीनां वैचित्र्यादृजुकुटिलनानापथजुषाम् ।**

**नृणामेको गम्यस्त्वमसि पयसामर्णव इव।।**

यानि भक्तितत्त्वानि सन्ति तेषु श्रीमद्भागवतपुराण-महाभारत-शाण्डिल्यभक्तिसूत्रःनारदभक्तिसूत्रादीनामपि पर्याप्तं योगदानं दृश्यते। वास्तवे भक्तिसम्प्रदायस्तु वैष्णवभक्तानामन्वेषणमस्ति। भक्तिरसस्य मूलस्रोतोऽस्ति श्रीमद्भागवतपुराणम्। भारतीयवाङ्मये भक्तितत्त्वानि प्रसृतानि सन्ति –

वाग्गदगदा द्रवते यस्य चित्तं , विलज्ज उद्गायति नृत्यते च।
रुदत्यभीक्ष्णं हसति क्वचिच्च , मद्भभक्तियुक्तो भुवनं पुनाति।।

सर्वेषु अपि भक्तिसम्बद्धग्रन्थेषु नवधाभक्तेः वर्णनं प्राप्यते न्यूनाधिकम्।

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सौख्यम् आत्मनिवेदनम्।।

यथार्थे सर्वदेशव्याप्तस्य निखिलकालसम्बद्धस्य नित्यसुखस्वरूपस्य परिपूर्णस्य परमेश्वरस्य द्रवीभूतेन चेतसा ग्रहणे सति कृतकृत्यतायां न किञ्चित् कर्त्तव्यम् अवशिष्यते सैव भक्तिः। भक्तिः भगवदाकारवृत्तिः भवति। अत्र उच्चनैतिकचेलना, जीवनस्य आनन्दः, श्रेष्ठाः

संस्काराः,पुरुषार्थचतुष्टयस्य साधिका अस्ति। भक्तिभाव अन्येषां भावानाम् अपेक्षया उत्कृष्टतरः बलवत्तरः चास्ति। भक्तेः लक्षणम् –

क्लेशघ्नी शुभदा मोक्षलघुताकृत् सुदुर्लभा।
सान्द्रानन्दविशेषात्मा श्रीकृष्णकर्षिणी च सा।।
अन्याभिलाषिताशून्यं ज्ञानकर्माद्यनावृत्तम्।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा।।
भुक्ति मुक्तिस्पृहा यावत् पिशाची हृदि वर्तते।
तावत् प्रेम-सुखस्यात्र कथमभ्युदयो भवेत्।

भक्तिरसाचार्यास्तु न जीवगतानन्दांशमात्रमेव लक्ष्यीकृतम् , अपितु आनन्दराशिभगवद्गतानन्दस्य आस्वादनमेवास्ति तेषां लक्ष्यम्। पुष्कलानन्दरसास्वादस्तु तदैव उद्भवति यदा परमानन्दस्वरूपो भगवान् स्वयमेव मनो गतो भवेत्।

यदा भक्त्या भक्तस्य चित्तं नित्यं पूर्णबोधं सुखात्मकं च परमात्मानं नितरां समाश्लिष्यति तदा किमन्यत् कर्त्तव्यं नावशेषतया अवतिष्ठते। यथा –

भगवन्तं विभुं नित्यं पूर्णं बोधसुखात्मकम्।
यद्गृणाति द्रुत्तं चित्तं किमन्यदवशिष्यते।।

**श्रीमद्भगवद्गीतायां** द्वादशोऽध्याये कतिपयैः श्लोकैः भक्तेः स्वरूपं भक्तस्य लक्षणानि स्पष्टानि भवन्ति –

**अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च। निर्ममो निरंहकारः समदुःखसुखः क्षमी।।**
**संतुष्टः सततं योगी यतात्मा दृढनिश्चयः । मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः।।**
**यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः। हर्षमर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः।।**
**अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः। सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः।।**
**समः शत्रौ च मित्रे च तथा मानापमानयोः। शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः।।**
**यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति। शुभाशभपरित्यागी भक्तिमान्यः स मे प्रियः।।**
**तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येन केनचित्। अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः।।**

**वेदेषु भक्तितत्त्वानि-** आचार्यसायणेन प्रोक्तं यत् –**"इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः।"** तथा च,

प्रत्यक्षेणानुमित्या वा यस्तुपायो न बुध्यते।
एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता।।[2]

**ऋग्वेदे-**कश्चनपुरूषः सुमतये विष्णुं प्रार्थयति यत्-

महस्ते विष्णो सुमतिं भजामहे उर्वो गभीरा।
सुमतिष्टेऽस्तु देवानां भद्रा सुमतिर्ऋजूयताम्।।[3]
संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।
देवा भागं यथापूर्वे सञ्जानाना उपासते।।[4]

**यजुर्वेदे-** यदा पिपेष मातरं पुत्रः प्रमुदितो धयन्।
एतत्तदग्नेऽनृणो भवाम्यहतौ पितरौ मया।।5

**अथर्ववेदे-**अनुव्रतः पितुः पुत्रो मात्रा भवति संमनाः।
जायापत्ये मधुमतीं वाचं वदतु शन्तिवाम्।।
मा भ्राता भ्रातरं द्विक्षन् मा स्वसारमुत स्वसा। सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया ।।[6]
समानी व आकूति समाना हृदयानि वः। समानमस्तु वो मनो यथा वः सुसहासति।।[7]

**उपनिषत्सु भक्तितत्त्वानि -** उप, नि इत्युपसर्गपूर्वक्-षद्लृ-विशरणगत्यवसादनेषु इत्यस्माद्धातोः उपनिषच्छब्दः निष्पद्यते। यद्यपि सर्वमपि उपनिषत्साहित्यं ज्ञानभक्तिपरकमेव तथापि साक्षात्मूल्यपरककथनानि उपलब्धानि।तानि क्रमशः सन्ति-

**तैत्तिरीयोपनिषद्-** गुरुभक्त्युदाहराणि अत्र निर्दिष्टानि। अस्याः प्रक्रियायाः नाम विद्यादर्शनमिति निरूपितम्। अस्मिन् दर्शने उक्तं यत् – संहितायाः प्रथमः वर्णः आचार्यः। अन्तिमवर्णः शिष्यः। विद्या सन्धिः। प्रश्नोत्तररूपे निरूपणं सन्धानम्। यथा- आचार्यः पूर्वरूपम् । अन्तेवास्युत्तररूपम्। विद्या सन्धिः। प्रवचनं सन्धानम्। इत्यधिविद्यम्। अत्रापि बहुविधोपदेशाः प्रदीयन्ते। अस्याः उपनिषदः ज्ञानविज्ञानं शिक्षकान् अध्यापकान् बहूपकरोति। किं बहुना – १. धार्मिकभावना २. सत्यवचनम् ३. तपः४. संयमः ५.शान्तिः ६. नित्यनैमित्तिकहवनम् ७. अतिथिसत्कारः८. मातृपितृवन्दनम्९. स्वाध्यायः १०. आचार्यवन्दनम् ११. आत्मानुशासनम् १२. मानवता १३. चरित्रम् १४.

उत्तमनागरिकता १५. सन्तानोत्पत्तिः १६. अध्यापनम्। लिखितम् च - **"यान्यनवद्यानि कर्माणि। तानि सेवितव्यानि। नो इतराणि । यान्यस्माकं सुचरितानि। तानि त्वयोपास्यानि। नो इतराणि। श्रद्धया देयम्।अश्रद्धयाऽदेयम्।ह्रिया देयम्।**
**भिया देयम्। संविदा देयम्।"**

**१.९. ३. कठोपनिषद्-** पितृभक्त्युदाहराणानि अत्र स्पष्टानि सन्ति -

**अनुपश्य यथा पूर्वे प्रतिपश्य तथाऽपरे।**
**सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते पुनः॥१।१।६**
**शान्तसङ्कल्पः सुमना यथा स्याद् वीतमन्युर्गौतमो माभि मृत्यो।**
**त्वत्प्रसृष्टं माभिवदेत् प्रतीत एतत्त्रयाणां प्रथमं वरं वृणे॥१।१।१०।**

अतिथेः सत्कारं कुर्वन् कथयति –

**आशाप्रतीक्षे सङ्गतं सूनृतां चेष्टापूर्ते पुत्रपशूंश्च सर्वान्।**
**एतद् वृङ्क्ते पुरुषस्याल्पमेधसो यस्यानश्नन् वसति ब्राह्मणो गृहे॥११८**

"येनेदं सर्वं विजानाति तं केन विजानीयात् " स भगवान् इदं जगत् सृष्ट्वा प्रजापतीन् प्रवृत्तिलक्षणं धर्मं ग्राह्यामास वेदोक्तम्। ततः अन्यान् स सनकसनन्दनादीन् उत्पाद्य निवृत्तिलक्षणं धर्मं ज्ञानवैराग्यलक्षणं ग्राह्यामास।जगतः स्थितिकारणं प्राणिनां साक्षात् अभ्युदयनिः श्रेयसहितुः यः सः धर्मो ब्रह्मणाद्यैः वर्णिभिः आश्रमिभिः च श्रेयोऽर्थिभिः अनुष्ठीयमानः।दीर्घेण कालेन अनुष्ठातृणां कामोद्भवात् हीयमानविवेकविज्ञानहेतुकेन अधर्मेण अभिभूयमाने धर्मे प्रवर्धमाने च अधर्मे,जगतः स्थितिं परिपिपालयिषुः स आदिकर्ता नारायणाख्यो विष्णुः भौमस्य ब्रह्मणो ब्राह्मणत्वस्यरक्षणार्थं देवक्यां वासुदेवात् अंशेन कृष्णः किल संबभूव। ब्राह्मणत्वस्य हि रक्षणेन रक्षितः स्यात् वैदिको धर्मः तदधीनत्वात् वर्णाश्रमभेदानाम्। स च भगवान् ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः सदा संपन्नः त्रिगुणात्मिकां वैष्णवीं स्वां मायां मूलप्रकृतिं वशीकृत्य अजः अव्ययो भूतानाम् ईश्वरो नित्यशुद्धबुद्धमुक्तस्वभावः अपि सन् स्वमायया देहवान् जातः इव च लोकानुग्रहं कुर्वन् इव लक्ष्यते। स्वप्रयोजनाभावे अपि भूतानुजिघृक्षया भक्ति अर्जुनाय शोकमोहमहादधौ निमग्नाय उपदिदेश गुणाधिकैः गृहीतः अनुष्ठीयमाना भक्तिः प्रचयं गमिष्यति इति। द्विधा हि भक्तिः सगुणनिर्गुणेति ।तां भक्तिं भगवता यथोपदिष्टं तथैव वेदव्यासः सर्वज्ञो भगवान् गीताख्यैः बहुभिः श्लोकैः उपनिबबन्ध।

तस्य गीताशास्त्रस्य संक्षेपतः प्रयोजनं परं निःश्रेयसं सहेतुकस्य संसारस्य अत्यन्तोपरमलक्षणम्। इमं द्विप्रकारकं धर्मं निःश्रेयसप्रयोजनं परमार्थतत्वं च वासुदेवाख्यं पर ब्रह्म अभिधेयभूतं विशेषतः अभिव्यञ्जयत्  विशिष्टप्रयोजनसम्बन्धाभिधेयवत् गीताशास्त्रम्। यतः तदर्थे विज्ञाते समस्तपुरुषार्थसिद्धिः भवति इति। इदं विदितमेवात्र भवतां भवतां वेदान्तसिद्धान्त ज्ञानामृतपारावारपारीणानां विमलधीविदग्धधुरीणानां यद्भारतभूभारनिर्हरणाय कृतावतारस्यार्जुनसखस्य भगवतो नन्दनन्दनस्याननननलिननिर्गतं भवतरङ्गिणीतरणभूतं निर्वाणप्रदं गीताशास्त्रमिति।   विश्वेऽस्मिन्  भारतीय-संस्कृतिविशेषाविश्ववन्द्याः सर्वग्राह्याश्च। अन्यदेशीया संस्कृतिर्नित्यमुत्पद्यते कालगर्भे विलीयते च,परमस्मद्देशीयसंस्कृतिरद्यापि स्वमूलरूपे विराजते,विश्वस्य संस्कृतिभ्यो भारतीयसंस्कृतिः प्राचीनतमा खलु। एतन्निर्माणं न केनापि कर्तुं शक्यते, न काले काले जायते विनश्यति वा।     नामसंकीर्तनं विष्णोः भक्त्यां प्रामुख्येन स्वीक्रियते। उक्तं च –

**यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु।**
**न्यूनं सम्पूर्णतां याति सद्यो वन्दे  तमच्युतम्॥**

**सन्दर्भग्रन्थाः -**

ऋ.सं.- १-८०-२

ऋ.१० मं.-१११-२

माध्य. सं.-१८-११

अथर्व.-३.३०.२-३

अथर्व.-६.६४.३

श्रीमद्भगवद्गीता

श्रीमद्भागवतपुराणम्

***

# शिक्षाविभागः

# श्रीमहेन्द्रनाथदत्तानां शैक्षिकं चिन्तनम्

एम्. जयकृष्णन्,
सहाचार्यः, शिक्षासङ्कायः,
श्रीलालबादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्,
नवदेहली- **110016**

**संक्षेपः-**

चिन्तनस्य प्राचुर्यम् इतरक्षेत्रेषु यथा तथा शिक्षायामपि भवति। जनानां सद्यःकल्याणकारिणां विचारविशेषाणां निधिरूपेण वरीवर्ति शिक्षाशास्त्रम्। एतन्निधिविशेषा द् ब हून्यनर्घरत्नानि बहिरानीतानि आनीतादधिकानि ति रोहितान्यपि। तादृशस्य कस्यचिद्विशिष्टस्य प्रस्तुतिरस्मिन्निबन्धे उद्दिष्टा।

अत्र प्रकटितचिन्तनानामुपज्ञाता स्वामिविवेकानन्दस्य अनुजो महेन्द्रनाथदत्तः ( **1869-1956)** विधिशास्त्राधीत्यर्थं विदेशं गतोऽप्येषमहाशयः, बाल्यादेव संप्राप्तायाः प्रपञ्चरहस्यजिज्ञासाया उपशान्तये प्राविशद् ग हनस्वाध्याये। तत्स्वाध्यायरूपतपःफलत्वेन विविधविद्यासु अनुपमं वैदुष्यमवाप्नोत्- यथा दर्शनं, मनोविज्ञानम्, समाजशास्त्रम्, नीतिशास्त्रम्, शिक्षाद्यासु च । महोदयस्यास्य शैक्षिकं चिन्तनं, यथावसरं दर्शन-मनोविद्याविषयकविचारैस्सह प्रकाशनाय निबन्धेऽस्मिन् उद्यमः। एतदर्थम् अस्य उपलब्धकृतीनां परिशीलनं कृतम्।

**उपोद्घातः-**

कालीघट्टनगर्यास्तत्कालीनप्रशस्ताधिवक्तुः विश्वनाथदत्तस्य भुवनेश्वरीदेव्याश्च पुत्रेष्वेक आसीत्महेन्द्रनाथदत्तः। वर्षेभ्यः पूर्वं परमपदमवाप्तस्यास्य महाशयस्य विचारौन्नत्यं स्वतन्त्राभिव्यक्तेः कालेऽस्मिन्नपि जनयत्याश्चर्यम्। विदेशवासपरिसमाप्त्यनन्तरं निरन्तरसाधनायां मग्नस्यास्य मते विश्वसारस्तावत्प्राणशक्ताविति। दत्तवर्यः पाश्चात्त्यानां व्यावहारिकविज्ञानस्य, एतद्देशस्य उत्तुङ्गाध्यामिकानुभूतेश्च समन्वयाय कृतचेष्टः।

**समाज-दर्शन-धर्मविषयकं महेन्द्रनाथचिन्तनम्-**

महाशयस्यास्य अभिप्राये प्रेम-स्वातन्त्र्य-सत्य-न्यायाख्यामूल्यचतुष्टयी समाजव्यवस्थाया आधारायते। एतन्मूल्यसाक्षात्काराय उपायोऽस्ति शिक्षा। पूर्वोक्तोत्तमविचाराः मानवजातिं नियमयन्ति। उत्कृष्टविचारहीना सामुदायिकी गतिरधोमुखी, तद्वृद्धौजना आप्नुयुर्दैविकताम्। स्वस्मिन्विद्यमानदिव्यतागाम्भीर्यं बालकेभ्यः बोधनीयमिति महेन्द्रनाथमतम्। धर्म-दर्शनयोः नास्ति किमपि प्रकटमन्तरमिति अभिप्रैति महोदयोऽयम्। यद्दर्शननाम्ना प्रथितं तद्धर्मसमानम्। यो धर्मस्तद्दर्शनं च। स्वाधिष्ठानतत्त्वरूपेण दर्शनं यदि न गणयति धर्मः तर्हि स्थातुं न प्रभवति सः। एतत्तत्त्वावगमवशात्भारतीयदार्शनिकाः, द्रष्टारः ज्ञानिनश्चेति विख्याताः। सत्यसाक्षात्काराय मार्गरूपेण भवति दर्शनमित्यपि दत्तवर्योऽभिप्रैति। मनोविकासोपकारकमस्ति दर्शनम्। दैविकताप्राप्तिरेतादृश-विकासोद्देश्यम्। मानसिकविकासस्य अवरोधकरूपेण यदि कोऽपि धर्मः (**Religion**) तिष्ठति स अन्धविश्वास एवेति विश्वसिति महेन्द्रनाथाचार्यः।

**मनोवैज्ञानिकं चिन्तनम्-**

**'Mind', 'Ego', 'Philosophy'** प्रभृतीन्विषयानधिकृत्य बहुत्र कृतेषु स्वप्रवचनेषु दत्तमहाशयस्य मनोविज्ञानविषयकं चिन्तनं व्याप्तमस्ति। मनःसम्बद्धेषु निगूढतत्त्वेषु यदि कश्चित् प्रविविक्षुः स अवश्यं शृणुयाद् माहेन्द्रं वचनम्! प्रायोगिकमनोविज्ञानस्य राष्ट्रियमनोविज्ञानस्य च विषये यद्व्याख्यानं स्पष्टीकरणं च दत्तवर्यैः कृतं (विशिष्य **'अहम्' Ego** इत्यस्य अहङ्कारस्य **Egotism**) तदखिलं भारतीयमनोविज्ञानदृष्ट्या महत्त्वपूर्णम्। किं च बालकानाम् आन्तरङ्गिकविकासाय मनोविज्ञानस्य नियमानाम् अनुप्रयुक्तिःअपेक्षिता।

**शैक्षिकविचाराः-**

महेन्द्रनाथदत्तवर्याणां शिक्षासम्बद्धविचाराः प्रायः दशोत्तरैकोनविंशतितमे वत्सरे बहुत्र प्रदत्तेषु भाषणेषु विकीर्णाः। ते यथाकालं सङ्गृहीता अभवत् **Lectures on Education** नाम्ना **1939** तमे वर्षे। एतदाधारेण अत्र प्रस्तुतिः। महोदयस्यास्य मते शिक्षायाः वास्तविकम् उद्देश्यं दिव्यतावाप्तिः। एतदर्थं मानवेन, विविधैः विविधरीत्या प्रतिपादितसिद्धान्तानां बन्धनाद् मुक्तेन भवितव्यम्। शिक्षायाः यथार्थं चैतन्यं आत्मज्ञानप्राप्तौ निहितमस्ति। दत्तवर्यः अध्यात्मज्ञानस्य व्यवहारज्ञानस्य च अन्तरं न स्वीकरोति। अनयोः पार्थक्यचिन्तनाद् ज नाः

जडधियः शुभाप्तिविश्वासशून्याश्च भवेयुः। शिक्षायाः प्रथमं तत्त्वं हृदयोद्घाटनम्। यदा हृदयं विशालं बुद्धिश्च विकसिता तदा मानवो भवति महामेधावी। शिक्षाव्यवस्थितौ उत्तमविचाराणां महत्त्वमस्तीति अभिप्रैति महेन्द्रनाथदत्तः। विचारकाणां प्रकारानपि दर्शयत्ययमार्यः। यथा- मौलिकविचारकाः मानवतायै चिन्तयन्ति। समग्रमानवकल्याणात्मकं चिन्तनं यः करोति तादृशस्य निर्माणं यदि कोऽपि देशः न करोति तर्हि तत्र स्वार्थपरायणानामाधिक्यं जायते। राष्ट्रियविचारकाः पृथग्राष्ट्ररूपेण भौतिकप्रगतिप्राप्त्यर्थम् एतेषां चिन्तनमुपकुर्युः। स्थानीयविचारकाः समुदाये विद्यमानदोषाणां निवारणाय समुदायकार्याधीक्षणाय च प्रवृत्तिं कुर्युः। ऐहिकविकासेषु सत्स्वपि पूर्वोक्तविचारकत्रिकं यदि देशेकस्मिंश्चिन्नस्ति, तर्हि तस्य मूल्यमेव न। एभिर्विचारकैः यत्प्रस्तुतं तत्क्रियान्वयनाय राजनीतिज्ञैः उत्साहो दर्शनीयः। किन्तु शिक्षासम्बद्धेषु कार्येषु राजनीतेः साक्षाद् ह स्तक्षेप अपि न भवेत्। राजनीतिज्ञानां धर्मेषु धनसद्विनियोग एकः।

शिक्षाविकासाय, प्राक्तनस्य आधुनिकस्य च ज्ञानस्य पारस्पर्यमपेक्ष्यत इति सूचयति दत्तमहाशयः। समाजे विविधभूमिकानिर्वहणार्थं शिक्षा उपकारिणी स्यात्। स्वविचारेषु एकत्र चतुःषि"कलानां पुनरुज्जीवनम् आवश्यकमित्यपि सूचयति महोदयोऽयम्। नागरिकाणां स्वकर्तव्यज्ञानाय देशोद्देश्यपरिज्ञानाय च संविधान ( **Constitution**) प्रचारः करणीयः। (स्वतन्त्रभारतस्य संविधाननिर्माणाद् बहुपूर्वमेव विचारोऽयं प्रस्तुत इति विशेषः) दत्तमहाशयेन अधीतविषयेषु गहनज्ञानमपेक्ष्यत इति पक्ष अश्रितः। युवत्वे सत्यपि कस्मिन्नपि विषये यदि अगाधवैदुष्यं नास्ति कस्यचित्, तर्हि स समाजस्य भारभूत एव।

जीवनात् जीवनसमस्याविशेषेभ्यश्च पृथक्स्थीयमानशिक्षायाः व्यतिरेकी आसीद् महेन्द्रनाथदत्तः। एवमेव पराश्रयप्रवृत्तेः अपि। जीवनसंग्रामे विजिगीषुणा युयुत्सुना च एकेन भवितव्यमित्युपदिशति महाशयोऽयम्।

देशस्य उत्तमविकासार्थं समन्वितवैद्यशिक्षा, **(Holistic Medical Education)** इतिहासस्य भौतिकविज्ञानानां च शिक्षा अपेक्षिता। व्यवसायीकरणमपि **(Industrialization)** आवश्यकम्। एतस्मिन्सन्दर्भे, विषादकारकं दर्शनमुपेक्ष्य स्फूर्तिदायकं तद्वर्धकं वा दर्शनं स्वीकर्तव्यमिति महाशयस्यास्य मतं स्मर्तव्यम्।

महेन्द्रनाथदत्तस्य अभिप्राये प्राथमिकशिक्षया जीवनस्य भविष्यकार्यक्षेत्रेषु संघर्षाय बालबालिकानां निर्माणं भवेत्। किन्तु तैः स्वीयमूलेप्रतिष्ठितैः भवितव्यम्। देशस्य स्थितिसंवर्धनाय, प्रायोगिकयावैज्ञानिकया च रीत्या प्रशिक्षिता जना अपेक्षिताः। नगरीयशिक्षायां (**Urban Education**) वास्तविकक्षेत्रे औद्योगिकं शिक्षणं देयम्। कृषिप्रशिक्षणं ग्रामीणक्षेत्रे च। आश्चर्यस्य विषयोऽयं वर्तते यत्प्रायः एकशतं वर्षेभ्यः पूर्वं प्रदत्तेषु भाषणेषु दत्तवर्यः, **Cattle & Poultry farming,** (गो-कुक्कुटादिसंरक्षणं जनोपयोगाय तज्जन्योत्पादवितरणं च) **Waste Management** (अपशि ष्टप्रबन्धनम्) सदृशानाम् उल्लेखमकरोदिति!।

महोदयस्य अस्य अभिप्राये, आधुनिकविचाराणां स्वीकरणे वनिताभिः प्रशिक्षिताभिः भाव्यम्। ताः यदिवीरतां प्रदर्शयति, तासां सन्ततय अपि वीराः भवेयुः। देशस्य नागरिकेषु न केनापि निरुद्योगिना भवितव्यम्। राष्ट्रक्षेमाय प्रत्येकं व्यक्तिविशेषेण स्वीयम् अवदानं करणीयम्।

स्वपोषणसमर्थां शिक्षां ( **Self Supportive Education**) स्तौति दत्तवर्यः। शिक्षासंस्थानां परस्परस्वीकार्यतामान्यता वा अपेक्षिता अस्ति यया एकस्मात् संस्थाविशेषात् अन्यत्र स्थानान्तरेण छात्रः शक्नुयात्। (यथा अधुना **Student exchange, credit transfer**) तद्वत्सांस्कृतिकपारस्पर्यमपि आवश्यकम्।

एष्याभूखण्डस्य कृते विशेषं महत्त्वं प्रदाय तदुन्नयनयोग्यशिक्षापद्धतिः महेन्द्रनाथवर्येण उपस्थापिता। एष्यातः भिन्नराष्ट्रेषु तेषामेव स्वीयविचारकाः समुपलभ्यन्ते तद्द्वारा तत्तद्राष्ट्रियसमस्स्यानाम्सुयोग्यपरिहारोऽपि भवितुमर्हति इति महोदयस्य अस्य मतम्। समाजदर्शनं केन्द्रीकृत्य 'एष्या'स्तरे नवीनानां प्रगतिशीलानां च विचारकाणामावश्यकतावर्तते। विविधभाषाणामध्ययनेन साकं विविधस्पर्धासु क्रीडासु च छात्रः भागं गृह्णीयुः। किन्तु समयस्य धनस्य च अपव्ययं विहाय तत्तत्प्रदेशानुगुणस्पर्धाः क्रीडाश्च परिगणनीया इति निर्दिशति दत्तमहाशयः।

**निष्कर्षः-**

शिक्षायाः क्षेत्रे विचारकदौर्लभ्यं नास्त्येव। तथापि ''एतद्देशप्रसूतस्यसकाशात्''अपि अस्माभिः बहुग्रहीतव्यम्। येन देशस्य व्यक्तिविशेषस्य च आनुकूल्यं भवति। महेन्द्रनाथमहोदयस्य या जीवनप्रेरणादात्री शिक्षा, सा नयत्वस्मानग्र इति मतमङ्गलम्।

**उपयुक्तग्रन्थाः**

**1. Dutt, Mahendranath- Lectures on Philosophy (1990 edn.)**

**2. Do Ego (1981 edn.)**

**3. Do Mind (1987 edn.)**

**4. Do Ethics (1975 edn.)**

**5. Do Lectures on Education (2006 edn.)**

(सर्वेग्रन्थाः 'महेन्द्रप्रकाशनसमितिः', **36/7,** साहित्यपरिषन्मार्गः, कोलकत्ता-**700006** द्वारा प्रकाशिताः। एतेष्वपि द्वित्रः, **3** गौरमोहनसरणीत अपि पूर्वं मुद्रिताः)।

***

# भारोपीयभाषापरिवारः संस्कृतञ्च

**डा. आरती शर्मा**

सहायकाचार्यः, शिक्षासंकायः,

श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम् (मा.वि),

नवदेहली -16

artisuneelsharma@gmail.com

इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वय ज्योतिरासंसारं न दीप्यते।।[1]

जगति यावन्तो वर्तमाना व्यवहारास्ते समे भाषानुपातिनः। यदि भाषाज्योतिर्न स्यात्तदा समग्रं भुवनत्रयमज्ञानान्धकारेण व्याप्तं भवेत्। परस्पराभिप्रायप्रकटनसाधनीभूतः सन्निवेशविशेषनिवेशितः शब्दसमूहो भाषा अर्थात् स्वाशयं स्पष्टं परेषु समनुभावयितुमारचित उपायविशषो हि भाषा। विश्वस्य यासां खलु भाषाणां शब्दसम्पत्तिर्व्याकृतिश्च समाने, तासां सर्वासामेक एव परिवार इति निश्चीयते। भाषायी सर्वेक्षणानुसारेण भारतदेशे नवसप्तत्युत्तरशतभाषाः एवं चतुस्चत्वारिंशत्युत्तरपञ्चशतोपभाषाः सन्ति। एता सर्वाः भाषा चतुर्षु परिवारेषु विभाजिताः। तद्यथा-

1. भारोपीयपरिवारः
2. द्रविडपरिवारः
3. आस्ट्रो एशियाई परिवारः
4. तिब्बत –चीनी परिवारः

भारोपीयपरिवारे संस्कृतम्, कश्मीरी, पंजाबी, हिन्दी ,उर्दू ,बंगाली, आसामी,उडिया, मराठी, गुजराती च इत्यादयाः भारतीयाः भाषाः विद्यन्ते। द्रविडपरिवारे तमिल, तेलगू- मलयालम – कन्नड इति चतस्त्रः दक्षिणभारतीयाः भाषाः समायान्ति। आस्ट्रोएशियाई परिवारे कतिपय आदिवासीनाम् उपभाषाः स्वीकृताः। तिब्बत –चीनी परिवारे आसाम – मेघालय – मिजोरम – नागालैण्ड - सिक्किमादि उत्तरपूर्वी भारत भूभागस्य उपभाषाः सन्ति।संस्कृतं वस्तुतः भारोपीय भाषा परिवारेण सह सम्बन्धिता वर्तते भाषावैज्ञानिकानामानुसारेण प्राचीना आर्य जातेः भाषा आर्यभाषा आसीत् ,

या आर्यजातेः मौलिक भाषा आसीत्, कालान्तरेण अनयैव भारोपीय परिवारस्य सर्वाः भाषाः उद्भूता। आर्यजातेः मूलस्थानं भारतम् अथवा मध्यएशिया अथवा उत्तरीधुव्रप्रदेशः इति अधुनाऽपि विवादास्पदं वर्तते परन्तु तथ्यमेतद् सुनिश्चितमस्ति यत् आर्य जाति भागद्वये विभाजिता पूर्वीपश्चिमीश्च। एतदनुसारेणैव मूल आर्य भाषाऽपि द्विभाषावर्गेषु विभाजिता। तदेव शतम् केण्टुम् वर्गश्च। भारोपीय भाषापरिवारस्य स्वरूपमेवासीत् -

**भारोपीयभाषापरिवारः**




**तालिका** 1.भारोपीय भाषा परिवारः

वस्तुतः भारोपीय परिवारे संस्कृताद्याः प्रत्नाः, पालीप्राकृताद्या मध्यकालीना, हिन्दीपञ्जाबी मराठीबंगलाद्या आधुनिकाश्च भारतीया भाषा, ईरानदेशीयपारसीकानां धर्मग्रन्थस्य अवेस्ताया आवेस्तिका ,प्रत्नपारसी,पहलवी,आधुनिका फारसी (दरी इत्यप्यस्यैवेकं रूपम् )चेत्येता ईरानीया भाषा, आर्मेनीय बुल्गारीय इति मध्य –एशिया भाषा रूसीलिथ्वानीयपोलीयाद्या रूसस्य तत्समीपरस्थदेशानां च भाषा ग्रीकलातिनायरीयांग्लजार्मण्यफ्रेञ्चेतालवीय - स्पेनीडेनीयनार्वीयायस्लेण्डीयाद्या यूरोपस्य नव्याप्रत्नाश्च भाषाः सम्मिलिताः सन्ति। यूरोपस्य जार्मण्यजातेरेव ट्यूटन ( Tauten) इत्यपरं नामधेयमास्ति-भाषावर्गीयविभाजनम् – अस्मिन् भाषापरिवारे सम्मिलिताश्च भाषा अधोलिखितेषु प्रमुख वर्गेषु विभक्ताः सन्ति –

1. आर्यवर्गः- भारतस्य ईरानस्य च भाषाः।
2. बाल्टोस्लावीयवर्गः- रूसीयबुल्गारीयाद्याः स्लावीया, लिथ्वान्याद्याश्च बाल्टिक्या भाषाः।
3. ग्रीकवर्गीया भाषाः –यूनानदेशस्य ग्रीकभाषा तस्या नैका विभाषाश्च।
4. लातिनवर्गीया भाषाः – कैथोलिक ख्रीष्टमतावलम्बिनां प्रमुख धर्मस्थानस्य वैटिकन इत्याख्ये नगरे सम्प्रत्यपि प्रयुज्यमाना, पुरा च समग्रेऽपि यूरोपे , विशेषत आंग्लदेशे राज्यभाषा,शिक्षितानां च भाषा इति रूपेण प्रचलिता लातिनभाषा तस्याश्चेतालवी फ्रान्सीयादया रोमांसविभाषाः, स्पेनीया च भाषाः
5. केल्टिकवर्गः – प्राधान्येन आयरलैण्डनिवासिभिः केल्टिक जनैः प्रयुक्ता आयरलैण्डस्य तत्तसम्बद्धप्रदेशानां च भाषाः।
6. जार्मण्य (ट्यूटानीय ) वर्गीया भाषाः – वर्गस्यास्य भाषाः निम्नोच्चजार्मण्यभेदाभ्यां वर्गद्वयगाः सन्ति।
   - (a) निम्नजार्मण्या ( lower Germanic languages ) - ये खलु England Scandenavian (Norway ,Danmark ,swedan) देशाःभूगोलस्योन्नत्तमे उत्तमे वा क्षेत्रे वसन्ति, तेषां देशानां भाषा निम्नजार्मण्या इत्युच्यते।
   - (b) अतो विपरीतं Germany, Austria इत्यादयो ये देशास्तेषां भाषां उच्चजार्मण्या higher Germanic इत्युच्यते।

भारोपीयभाषापरिवारविषये पद्यरूपेण एवं वक्तुं शक्नुमः –

यूरालाल्ताइकाद्याश्च भाषावंशा मता इह।
भाषावंशेषु विश्वस्य भारोपीयो महत्तमः।। [2]
संस्कृतग्रीकलातिन्या अन्याश्चैवास्य वंशजाः।
तुलनात्मकपद्धत्या सम्बन्धोऽत्र विनिश्चितः।।[3]
यूरोपस्य गिरस्तद्वद्भारतेरानयोरपि।
संस्कृतस्य सजातीयां भारोपीयकुलोद्भवाः।।[4]

भारोपीयभाषापरिवारस्य महत्ता- संस्कृतसजातीयभारोपीयो भाषापरिवारः सुमहान् वर्तते। अत्रैवतादृशाः अपि धातवो विद्यन्ते येषामेकत्र प्रकृतिरन्यत्र च विकृतिरेव प्रयुज्यते। अथचैतादृशा अपि धातवः शब्दाश्च सन्ति ये वेदष्वेवोपलभ्यते, लौकिकसंस्कृते त्वप्रयुक्ता जाता परं यूरोपे इराने वा तेऽद्यापि व्याह्रियन्ते। यथा- संस्कृत मृ प्रकृतेरांग्लयां Murder ,mortal इति, स्मृ इत्यस्य च memory memoir, वम् इत्यस्य च womit इत्याद्या विकृतयो दृश्यन्ते। वन्( वनषण् सम्भक्तौ ) लौकिक संस्कृतेत्वप्रयुक्तः परमांग्ल्यां win इति रूपेण ,वैदिको वश् च wish इति रूपेण ,सुप्रचलितः। एवमेव संस्कृते दुह * $dug_y h$ प्रकृतिस्तस्याश्च दुग्धम् ,दोग्धा , दुहितर् इत्यादयो विकृतयोऽपि विद्यन्ते। परं यूरोपीय भाषास्वीरान्यासु च 'दुहितर् ' इत्यस्या विकृतेः daughter जा. Tocher फा. दुहख्तर सदृशानि प्रतिरुपाण्येव प्रचलितानि। प्रकृतिस्तु संस्कृत एव सुरक्षिता। तथैव दह् * $deg_y h$ इति प्रकृतिस्तस्याश्च दाद्यः, दग्ध इत्याद्या विकृतोऽपि संस्कृते सुरक्षिताः। ,परं यूरोपे तु तस्याः आं. Day > जा. Tag (टाख् दिनम् ) फा. दाग इत्याद्या विकृतय एव सन्ति।

शतं वर्गे च तालव्यीभावाद् * ग्यः Gy, ग्व $g^w$e- i,y श्च संस्कृते जकारे परिणमति। अवेस्तापारस्यादिषु च क्वचिद् j क्वचिच्च संघर्षो ज z क्विचिच्च पदादौ दकारः संयुक्तव्यञ्जनयुक्तश्च शकारे परिणमति। आल्बेन्यामपि गो दकारे परिणमति। तालव्यस्वरयुक्तस्य गस्य ' ज ' इत्युच्चारणं क्रियते। तथद्या- संस्कृते ज्ञा jna * gyno, gyen जानाति janati, > ग्रीक – Ge- gno-sko लाति. Gnosco,nosco, गां. Kenn,आंग्ल- know।

केन्टु वर्गीयासु भाषासु भारोपीयो ग्यः GY तालस्वरयुक्तो ग्वः $G^W$ श्च प्रायशो गकार एवास्ति। त्रिविधोऽपि गो लातिन्यान्त्वनेकत्र वकारे परिणमति ग्रीक्याश्च क्वचिद् गकारः क्वचिद्धकारः क्वचिच्च बकारो जायते। आग्लंयांञ्च सर्वे अपि तृतीय वर्णाः प्रथमा जायन्ते।

अतएवाङ्गल्यां भारोपीयस्त्रिविधो अपि गकारः ककारे परिणमति- *गः g > कः K, Q.C CH वा जायते।

भारोपीयभाषा परिवारे मुख्यां भूमिकां निर्वहन्ता अस्याः संस्कृतभाषायाः सम्बन्ध अनेकाभिः यूरोपीयभाषाभिः सह जातम्। यथा उदाहरणरूपेण लट्लकार परस्मैपदस्य रूपाणि पश्यामः।

**अस् धातोर्वर्तमानेकाले लट्लकारे परस्मैपदे रूपाणि तालिका -[2]**

| भाषा | भारोपीयरूपम् | संस्कृतम् | अवेस्ता | फारसी | ग्रीक | लातिनी | गाँथिकी | लिथ्वनीया |
|---|---|---|---|---|---|---|---|---|
| **प्रथमपुरूषे** | | | | | | | | |
| एकवचम् | Esti | अस्ति, asti | Asti | ast | esti | Jists | ist | jests |
| द्विवचनम् | Stes | स्तः,stas | Sto | | | | | |
| बहुवचनम् | Senti,sonti | सन्ति, santi | And | Hasad and | Enti, eisi | sunt | sind | sat |
| **मध्यमपुरूषे** | | | | | | | | |
| एकवचम् | esi | असि, asi | Ahi | ei | Hom. | Ess. | is | jesi |
| द्विवचनम् | Sthes,stes | स्थः, sthas | | | | | sijuts | jesta |
| बहुवचनम् | ste | स्थ, stha | sta | aed | este | estis | sijuth | jeste |
| **उत्तमपुरूषे** | | | | | | | | |

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| एकवचम् | Esmi | अस्मि, asmi | ahm i | am | eimi | sum | im | jesm |
| द्विवचनम् | Swes | स्वः, svas | ussv ahi | | | | siju | jesee |
| बहुवचनम् | semos | स्मः, smas | mah i | aem | asme n | sumus | sijum | jesm |

वस्तुतः संस्कृतं न केवलंमार्यावर्तस्याधुनिकभाषाणामेवापितु यूरोपीयांग्लजार्मण्यादिभाषणामपि विकासज्ञानस्योद्गममस्त्रोतः। निष्कर्षरूपेण वक्तुं शक्यते।

भारोपीयासु सर्वाषु वाक्षु व्याप्तास्ति संस्कृता।
नैकनिदर्शनैरस्या महत्वं प्रतिपादितम्।। [5]

पादटिप्पणयः -

1. काव्यादर्शः – दण्डी 1.4
2. संस्कृतं यूरोपीया भाषाश्च –पृ.सं. 9 श्लोक सं. 44,45,46
1. संस्कृतं यूरोपीया भाषाश्च - पृ.सं. 14 श्लोक सं.106
2. सफाया रघुनाथ,सं.शि. तालिका 1.भारोपीय भाषा परिवारः पृ.सं. 16
3. संस्कृत यूरोपीया भाषाश्च –तालिका -2 पृ.सं. 157

सन्दर्भग्रन्थसूची

1. सफाया, रघुनाथ, संस्कृतशिक्षण, हरियाणा साहित्य अकादमी,पंचकूला 2011.
2. त्रिवेदः, भवानीशंकर , संस्कृत यूरोपीया भाषाश्च, आर्यभारती प्रकाशन,नई दिल्ली.
3. आप्टे ,वामनशिवराम– संस्कृत- हिन्दी कोश , चौखम्बा विद्याभवन,वाराणसी।
4. शुक्ल ,डाँ रमाकान्त अर्वाचीन संस्कृतम् ,चौखम्बा विद्याभवन,वाराणसी।
5. तिवारी ,डा. भोलानाथ भाषाविज्ञान ,किताब महल पब्लिसर्श नई दिल्ली।

# संस्कृतशिक्षणे नवीनता

**डॉ. सच्चिदानन्दमूर्त्तिः**
सहायकाचार्यः, शिक्षाविभागः
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

**उपोद्घातः**

**संस्कृते संस्कृतिर्ज्ञेया – संस्कृते सकलाः कलाः।**
**संस्कृते सकलं ज्ञानं संस्कृते किं न विद्यते॥**

इति उक्तेः संस्कृतं भारतीयसंस्कृतेः आत्मा इति प्रतिभाति। अस्माकं सभ्यता संस्कृतिश्च संस्कृतग्रन्थेष्वेव दृश्यते। अतः संस्कृतं अवश्यमेव पठनीयम्। संस्कृतपठनार्थं संस्कृतशिक्षणस्य आवश्यकता अस्ति। संस्कृतशिक्षणस्य उद्देश्यं महत्त्वं अवश्यमेव चिन्तनीयम्। प्रथमतः आधुनिकभारते संस्कृतशिक्षणस्य महत्त्वं किम् अस्ति ? काश्च उपयोगिता वर्तते एतत् ज्ञातव्यम्। परिवर्तमानासु परिस्थितिषु संस्कृतशिक्षणं रोचकं कथं स्यात् ? इति सन्दर्भे नवचिन्तनस्यावश्यकता अस्ति। यथोक्तम् – "पुराणमित्येव न साधु सर्वम् " वस्तुतः क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः भवति। अतः पुराणेऽपि किञ्चिद् ग्राह्यं, नूतनेऽपि च तथैव किञ्चिद् ग्राह्यम् उभयत्रापि किञ्चिद् श्रेयस्करं सुखावहं लोकोपकारि च। भारतस्य शिक्षेतिहासे आयोगानाम् आवलिः दृष्टा। बहवः आयोगाः एवं भिन्नविषयानामुपरि चर्च्चाः समभवन्। सत्सु अन्यतमः भवति संस्कृतशिक्षायोगः (1954-56)। प्रथमवारं अस्मान् सर्वानपि शिक्षाशास्त्रज्ञान् उद्बोधितं यत् पारम्परिकविद्यालयेषु एवं कलाशालासु च आधुनिकाध्यापकानां स्थानान्तरम् एवम् आधुनिकविद्यालयेषु पारम्परिकाध्यापकानां निर्वहणं भवतु इति।

ततः एव सर्वेषां मनसि काचित् विचारधारा उद्भूता यत् संस्कृतभाषायां पठनाय , प्रचारप्रसाराय च न केवलं भाषायां परं तस्यां शिक्षणपद्धतौ च नूतनता अपेक्षिता इति। तदारभ्य समाजाय वयम् अध्यापकाः नूतनत्वं सम्पादयितुं विभिन्नोपागमः , पद्धत्तयः, सूत्राणि च इत्येतेषां प्रयोगं सुष्टु कुर्मः।

तद्वत् वयं शिक्षाशास्त्रिणः संस्कृतक्षेत्रे संस्कृताध्यापने विभिन्ननूतनस्रोतसां प्रयोगः एवम् अभिज्ञानमपि सम्पादयामः। सम्प्रति संस्कृताध्यापनाय कक्ष्याशिक्षणे पठन-पाठनप्रक्रियया केषां स्रोतसां प्रयोगकर्तुं शक्यतेति जानीमः।

**संस्कृताध्यापनाय सङ्गणकसहकृतनिर्देशनस्य प्रयोगः –**

सङ्गणकस्य प्रयोगः कस्मिन् क्षेत्रे न क्रियते इति चिन्तनीयं यतः सर्वस्मिन् क्षेत्रे अस्योपयोगः अधिक एव। इदम् अवश्यं दृश्यं श्रव्यञ्च भवति। अनेन पठन-पाठनप्रक्रिया सुदृढा भवति।

- सङ्गणके कमपि पाठ्यांशं स्वीकृत्य तस्यैव बिन्दुशः ( **PPT)** माध्यमेन प्रस्तुतीकरणं भवितुम् अर्हति।
- ध्वनिमुद्रिकायाः ( **CD)** प्रयोगेन भाषणकौशलस्य विकासः भवति। पुनः पुनः श्रवणेन उच्चारणे स्पष्टता आयाति।
- सङ्गणके अद्यतनकाले **(E-Books)** पुस्तकानि उपलभ्यन्ते।
- अन्तर्जाले शब्दकोशाः सन्ति। यस्य कस्यापि पदस्य विवरणं ददाति।
- पुनः अनुवादकरणे सौलभ्यं महत् विद्यते। साक्षात् अनुवादितविषयाः समुपलभ्यन्ते।
- विकिपीडिया माध्यमेन अधिकाधिकविषयाः साम्प्रतिककाले साक्षात् संस्कृतभाषायामेव उपलभ्यन्ते। न केवलं तत् उपरि अपितु अस्माभिः नूतनविषयान् तत्र संस्थापयितुं शक्नुमः **(Upload).**

संस्कृतक्षेत्रे कृत अनुसन्धानानां विषये संग्रहः पूर्वमेव कृतः विद्यते। शोधगङ्गा इत्यत्र **INFLIBNET** माध्यमेन शोधकर्तारः इतोऽपि पूर्वानुसन्धानम् एवं भाव्यनुसन्धानाय च उपयोगं कुर्वन्ति।

तकनीकिशिक्षायाम् अत्यन्तं प्रधानं स्थानं निर्वहति दूरवाणी। चलदूरवाण्याः आगमनेन अस्माकं सर्वेषां जीवनम् एव परिवर्तितम् अभवत्।

**Technology** इत्यत्र बहूनि उपकरणानि अन्तर्भवन्ति। यथा – कक्ष्याशिक्षणे **Projector,** सङ्गणकयन्त्रम्, कदाचित् **Power point** इत्यादीनां प्रयोगः करणीयः। चलदूरवाण्याः उपयोगः सौलभ्येन कर्तुं शक्नुमः। यथा नूतन-नूतन **Applications** निर्माणं प्रचलति। निर्मितानाम् उपयोगः

सुष्टु करणीयः। यथा – शब्द-धातुरूपाणां प्रयोगः उपयोगश्च। असंस्कृतज्ञानां कृते अक्षर-शब्द-वाक्यानां निर्माणे सौलभ्यम्।

तत्र संस्कृतभाषातः इतरभाषायाः कोशाः सन्ति। झटित्येव तेषाम् उपयोगः कर्तुं शक्यते।

काव्यानाम् एवं श्लोकानां संग्रहः प्राप्यते। पठितुम् एवं कण्ठस्थीकर्त्तुम् उपयुक्तः भवति। दूरवाण्याम् अन्यः कश्चन विषयः प्रधानः भवति। तत् **Cloud** इत्युच्यते। यदा कदापि कुत्रापि सिद्धतां कृत्वा तत्र संरक्षणकर्तुं शक्यते। जनसामान्यविषयाणाम् अन्तर्भावः तत्र भवेत्। अनेन भाषायाः विकासः अवश्यं भवति।

एते उपर्युक्तविषयाः एव संस्कृताध्यापने उपयुज्यमानाः सन्ति , इति न। परम् एतदतिरिच्य अपि अन्य उपकरणानि, प्रयोगाः, स्रोतांसि च सन्ति। तस्यापि अभिज्ञानम् अवश्यं भवेत्।

***

# श्रीमद्भागवते विश्वबन्धुत्वपोषकाणि शैक्षिकतत्त्वानि

**डा. परमेशकुमारशर्मा**
सहायकाचार्यः,
श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्,
नईदिल्ली-16. मो- 9454323060

**श्रीमद्भागवतं पुराणतिलकं यद्वैष्णवानां धनं**
**यस्मिन् पारमहंस्यमेवममलं ज्ञानं परं गीयते।**
**यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं**
**तच्छृण्वन् प्रपठन् विचारणपरो भक्त्या विमुच्येन्नरः।।**

भागवतरसिकानां हृदि सर्वदा प्रसिद्धोऽयं विषयः पुराणतिलकत्वेन राराजते श्रीमद्भागवतम्। तत्र हि न कश्चनापि बौद्धिकसाररसहीनो विषयः संवादो वा। भागवतस्य प्रत्येकेन प्रसङ्गेन जनानां बोधनं प्रेरणं च जायते। एवन्तु पुराणोऽयं व्यासदेवस्य अन्तिमकृतित्वेन प्रसिद्धः इति कारणेनव्यासस्य सर्वविधनूतनविनूतनानुभवः चिन्तनगाम्भीर्यं वात्र पूर्णरूपेण समाविष्टं विद्यते। उच्यते विद्वद्भिः आभाणकमिदं 'विद्यावतां भागवते परीक्षा ' अर्थात् भागवतपरीक्षां ये उत्तरन्ति ते वस्तुतः पूर्णरूपेण सर्वेषु अपि पुराणेषु उत्तीर्णाः सन्ति इति।

अत्र मानवेषु विश्वबन्धुत्वभावास्सन्ति एव, वृक्षेषु अपि सः एव विषयः दृग्गोचरी भवति इति 'तरवोऽभिनेदुः' इत्यनेन स्पष्टं भवति यत् वृक्षाणां मानवानां सर्वेषाम् अपि रक्षणवर्धनभावाः जीवने संरक्षणीयाः। अस्यैव प्रमाणत्वेन शुकदेवः वृक्षेषु आत्मानं संप्रेष्य संयोज्य वा 'अहं शुकोऽहं' अहं शुकोऽहम्' इति वादयति।

न केवलं प्रियं प्रति सद्भावः शत्रुं प्रति सद्भावः वर्तते भागवते वर्णितः अयमेव सद्भावः विश्वबन्धुं सम्पोषयति अश्वस्थामा द्रोपद्याः प ञ्च सुप्तान् पुत्रान् हतवान् किन्तु यदा अर्जुनः तं हन्तुं गृह्णाति तदा द्रोपदी ब्राह्मणकुलभूषणस्य अश्वस्थामनः हननं निवारयति कथयति च ''मुच्यतां मुच्यतामेष ब्राह्मणो नितरां गुरुः '' इति अर्थात् सा तस्य हननं स्वकष्टमेव चिन्तयति (द्रोपदी)''मा रोदीदस्य जननी गौतमी पतिदेवता। यथाहं मृतवत्साऽऽर्ता रोदिम्यश्रुमुखी मुहुः।

यथा साम्प्रतमहं रोदनं कुर्वती अस्मि तथैव अस्य माता गौतमी अपि रोदनं करिष्यति अतः एनं त्यजन्तु इति। अत्र कथं हि विश्वबन्धुत्वपोषकाः भावाः रराजन्ते यतः उत्तमभावः वर्तते तस्याः। आत्मनः प्रतिकूलं यत् वर्तते तदन्यैः सह न व्यवहर्तव्यमिति भावं सम्पोषयति अयं श्लोकः।

स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां ध्यायन्तु भूतानि शिवं मिथोधिया।
मनश्च भद्रं भजतादधोक्षज आवेश्यतां नो मतिरप्यहैतुकी॥

भागवते तादृशाः पोषणात्मकाः श्लोकाः सन्दृश्यन्ते यैः सुस्थिरं ज्ञायते यत् न केवलं सज्जानानां प्रसन्नतायाः विषयः अत्र वर्णितः वर्ततेऽत्र तु ये केऽपि दृष्टाः अपि वर्तन्ते तेऽपि प्रसन्नाः स्युः इति विषयः प्रतिपादितः विद्यते। अस्मिन् केऽपि दुःखिन न स्युः।

सर्वोऽपि प्राणी तादृशे एव संसारे जीवितुमीहते यत्र सर्वविधसौविध्यं स्यात्। सर्वेऽपि परस्परं साहाय्यं कर्तुं कृतसङ्कल्पाः स्युः। न कोऽपि यत्र विवादः स्यात्।

विश्वबन्धुत्वकाल्पना अस्माकं पूर्वजैः अत्यन्तं पूर्वमेव कृता आसीत्।

चिन्तनं हि अग्रिमसमाजः शिक्षितः विकसितः कार्यदक्षश्च समुत्पद्येत। जनाः समर्पितमनसः त्यागान्विताः च स्युः। तेषु उदारभावाः सम्पृक्ताः भवेयुः। वायुः यथा कैः सहापि भेदभावं न करोति , जलमपि न, पृथिवी अपि न तद्वत् मानवः कार्याणि कुर्यात्।

श्रीमद्भागवते उत्तमकार्याणि कर्तुं बहुधा कथितं विद्यते यतः यावत्पर्यन्तं जीवाः स्वीयविचाराणां कर्मणां परिष्कारं व करोति तावत्पर्यन्तं तस्य जीवने सर्वदा दुखानां बाहुल्यमेव जायते इति तु पूर्णरूपेण प्रसिद्धिं याति एव। अतः जीवने समाजे वा कदाचित् कष्टं जातं चेत् तस्य कारणं जनः नास्ति मत्कर्मणः कारणेनैव तत्प्राप्तमस्ति इति चिन्तयित्वा पूर्णमनोयोगेन स्वीयविचाराणां नियन्त्रणपुरस्सरं सर्वेषां रक्षायै प्रयत्नंकुर्यात् एतान् एव विचारान् परियोषयन् श्रीकृष्णः कथयति भावगते-

कर्मणा जायते जन्तुः कर्मणैव विलीयते।
सुखं दुःखं भयं क्षेमं कर्मणैवाभिपद्यते॥

अर्थात् जीवने यत्किमपि समुत्पद्यते तत्सर्वं तस्य कारणेन एव समुत्पद्यतेऽतः सर्वदा अन्यान् प्रति स्वत्वभावः समुत्पादनीयः इति। अन्यच्च कथयति ईश्वरः यदि विद्यते तर्हि सः तु कर्मरूपेणैव विद्यते

मानवः यथा व्यवहारं करोति तदनुरूपेण जनानां व्यवहारः जायते इति यतः सर्वैः अपि कर्मणः फलम् अवश्यं भोक्तव्यं भवति।

अस्ति चेदीश्वरः कश्चित् फलस्वरूप्यन्यकर्मणाम्।
कर्तारं भजते सोऽपि न ह्यकर्तुः प्रभुर्हि सः।।

यः यथा कर्म समाचरति सः तथैव फलं प्राप्नोति अतः ''आत्मनः प्रतिकूलानि परेषां न समाचरेत्'' इति नियमः सर्वदा परिपालनीयः इति।।

अस्माभिः परिशीलितं न केवलं मानवानामेव सर्वेषामपि विषये अर्थात् खलानां विषयेऽपि उदात्तभावाः बन्धुत्वरूपेण दरीदृश्यन्ते। न केवलं मानवेषु अपितु ये जन्तवः पशवः पक्षिणश्च वर्तन्ते। तान् प्रति बन्धुत्वभावः शिक्षकत्वभावः च केवलं पुराणेषु एव दृश्यते। वैश्यायाम् अपि बन्धुत्वभावः दत्तात्रेयस्य।

अर्थात् चतुविंशतिं गुरून् कृत्वा सः सूचयति शैक्षिकसामथ्र्यं सर्वेषु प्राणिषु विद्यते मानवेन शिक्षास्वीकरणसामथ्र्यम् आत्मनि उत्पादनीयम्। जनः सामथ्र्यं समुत्पादयति सः अवश्यं सफलः समर्थश्च भवति।

भागवतस्य पदे पदे प्रतिश्लोकं च विश्वबन्धुत्वपोषकतत्त्वानि दृश्यन्ते एव। यथा श्रीकृष्णः गोपान् अपि स्वमित्राणि करोति। बृजगोपीः स्मृत्वा सः रोदिति। अर्थात् कथं तस्य उदारभावः गजः एकवारम् उच्चैः स्मरति तस्य सर्वविधदुःखानां निवृत्तये साक्षात् समायाति प्रकटितः च भवति। वरुणमपि न आह्वयति।

नमो नमस्तेऽखिलकारणाय निष्कारणायाद्भुतकारणाय।
सर्वागमाम्नाय महार्णवाय नमोऽपवर्गाय परायणाय।।

अर्थात् प्रत्येकं प्राणिषु तस्य बन्धुत्वभावः वर्तते। यं कमपि सः पश्यति तं सः प्रेम्णः पश्यति इति सर्वत्रापि भागवते वर्णितं विद्यते एव। कुब्जामपि अत्यन्तं प्रेम्णा पश्यति। कथं तस्य बन्धुत्वभावः विद्यते।

''प्रसन्नो भगवान् कुब्जां त्रिवक्रां रुचिराननाम्।
ऋज्वीं कर्तुं मनश्चक्रे दर्शयन् दर्शने फलम्।।

अर्थात् ज्ञायते दुःखितस्य रूपरहितस्य विषयेऽपि उदात्तभावः प्रेमदृष्टिः एव भागवते विश्वबन्धुत्वपोषकशैक्षिकतत्त्वानि विद्यन्ते इति बोधयति। तद्वदेव वक्तुं शक्यते यत् सर्वोऽपि जनः पूर्णरूपेण स्वीयज्ञानस्य परिपेषणेन समाजं सर्वोत्कृष्टं कर्तुं प्रयतते इति। रूपरहिते एव न बन्धुत्वभावः सा कंसस्य शत्रोः दासी , तां प्रति अपि बन्धुत्वभावः। भागवतस्य प्रत्येकं पदेचिन्तनस्य वैलक्ष्यं प्रतिपादितस्य अस्ति। रूपरहितेषु पशुपक्षिषु निर्धनेषु खलेषु दुष्टेषु असमीचीनेषु सर्वेषु च बन्धुत्वभावः केवलं भागवते एव प्रतिपादितः विद्यते।

श्रीकृष्णबलरामौ मथुरांयदा प्रविशतः तदा निर्धनमालाकारस्य गृहमपि गच्छतः तन्नाम निधनेषु एव तेषां बन्धुत्वप्रेम विद्यते लिखितं हि श्रीमद्भागवते-

''ततः सुदाम्नो भवनं मालाकारस्य जग्मतुः।
तौ दृष्ट्वा स समुत्थाय ननाम शिरसा भुवि।।

अर्थात् कथमासीत् बन्धुत्वभावः श्रीकृष्णस्य अनेन अस्माभिः अनुमातुं शक्यते। यः कश्चनापि भवतु सर्वान् प्रति प्रेम एव जनान् सर्वदा अग्रे नयति इति अस्ति कश्चन विशेषः। कि ´ ्चन कृष्णस्य मित्रमपि वर्तते सुदामा इति।

सः स्वात्मनः विषये स्वयमेव कथयति -

क्वाहं दरिद्रः पापीयान् क्व कृष्णः श्रीनिकेतनः।
ब्रह्मबन्धुरिति स्माहं बाहुभ्यां परिरम्भितः।।

अर्थात् सुदामा अत्यन्तं दरिद्रः वर्तते चेदपि श्रीकृष्णः तस्य प्रेरणा आलिङ्गनं करोति एवं प्रेम वर्तते तस्य सर्वान् प्रति। कथनस्याभिप्रायो विद्यते यत् यावत्पर्यन्तं जनानां सर्वान् प्रति बन्धुत्वभावः नैव समुत्पद्यते तावत्पर्यन्तं केषाम् अपि समस्यानां समाधानं भवितुं नार्हति। अतः निधनं प्रति प्रेम वर्तते श्रीकृष्णस्य।

श्रीकृष्णः स्वयमेव सुदाम्नः चरणयोः उपविशति तं स्वपर्यङ्के उपावेशयति इति वर्तते निर्धनं स्वमित्रं प्रति तस्य भावः -

अथोपवेश्य पर्यङ्के स्वयं सख्युः समर्हणम्।
उपदृत्यावनिज्यास्य पादौ पादावनेजनीः।।

किं बहुना भागवते प्रतिपदं लोककल्याणस्य विषयः समुचितरूपेण विवरीतो विद्यते यथा निःश्रेयसाय लोकस्य )1/3/41) लोकस्य कल्याणाय मोक्षाय वा यथायोग्यम् अवधानं प्रदत्तम् अस्ति। अन्यश्च मनुः भागवतस्य चतुर्थे स्कन्धे कथयति ''मैत्र्याचाखिलजन्तुषु'' अर्थात् सर्वेषु प्राणिषु मैत्रीभावः समुत्पद्येत। यदि मैत्री उत्पद्यते तर्हि कुत्रापि अयोग्यभावो नैव दृष्येत इति। भगवान् सर्वेषु प्राणिषु विद्यमानोऽस्ति इति भावं मनसि निधाय जनाः कार्याणि कुर्युः लिखितं च विद्यते - चराचरस्याखिलसत्त्वधाम्नः'' ।भागवतस्य तृतीयस्कन्धे स्वयमेव भगवान् कथमपि ''अहं सर्वेषु भूतेषु विद्यमानोऽस्मि , यः जनानाम् उपेक्षां कृत्वा ममार्चनं करोति। सः केवलं भस्मनि एव यज्ञं करोतीति । अर्थात् भगवान् सर्वान् संबोधयति ''केवलं मम चिन्तनपूर्वकमेव समाजस्थानां जनानां मङ्गलाय प्रयत्नान् कुर्वन्तु इति ''। भगवन्तं श्रीकृष्णं हन्तुं पूतना स्तनयोः विषं लेपयित्वा आयाति। तस्याः दुग्धं पीत्वा श्रीकृष्णः तस्यै मातृगतिं प्रददाति। कथं विद्यते तस्य बन्धुत्वभावः। खले दुष्टे अनुत्तमे अनर्हे अपि सः दयां करोति न केवलं दयां करोति मातृगतिमपि प्रददाति। लिखितं च विद्यते भागवते लेभे गतिं साधूचितां ततोऽन्यां-, कं वा दयालुं शरणं व्रजेम।कृष्णात् अधिकः दयालुः अस्मिन् समाजे कः वर्तते इति। सर्वान् प्रति बन्धुत्वभावः तस्य।

निष्कर्षत्वेन भागवते प्रतिपदं लोकमङ्गलकामनापरिपोषकतत्त्वानि दरीदृश्यन्ते यैः स्पष्टं सुतरां जायते यत् विश्वबन्धुत्वभावना स्वयमेव भागवताध्ययनेन जनेषु समुत्पस्यते इति। यतः जनाः एव स्वीयभावान् प्रोषयितुं पूर्णरूपेण प्रयतन्ते-

अन्येषां वर्धनं रक्षणं वा मानवस्य विशिष्टः स्वभावः येन प्रेरितस्सन् सः कार्याणि स ंचालयति। सः समाजः स्तरं गुणं विषयं बोधं सात्त्विकतां चेच्छति। अतः निरन्तरं सत्ये रमते जनः इति ज्ञातव्यमेव इति शम्।।

पद्मपुराणस्थमाहात्म्यम् अध्यायः-6/श्लोकः-82

01/02/02 श्रीमद्भागवतम्।

1/7/43 श्रीमद्भागवतम्।

1/7/47 श्रीमद्भागवतम्।

5/18/9 श्रीमद्भागवतम्।

10/24/13 श्रीमद्भागवतम्।

8/10/15 श्रीमद्भागवतम्।

10/42/6 श्रीमद्भागवतम्।

10/41/43 श्रीमद्भागवतम्।

10/80/20 श्रीमद्भागवतम्।

1.3.41 श्रीमद्भागवतम्।

4/8/8 श्रीमद्भागवतम्।

तितिक्षया करुणया मैत्र्या चाखिलजन्तुषु।

समत्वेन च सर्वात्मा भगवान् सम्प्रसीदति।।) 14/11/13) श्रीमद्भागवतम्।

अहं सर्वेषु भूतात्मावस्थितः सदा।

तमवज्ञाय मां मत्र्यः कुरुतेऽर्चाविडम्बनम्।।) 3/29/21) श्रीमद्भागवतम्।

यो मां सर्वेषु सन्तमात्मानमीश्वरम्।

हित्वार्चां भजते मौढ्याद्भस्मन्येव जुहोति सः।।) 3/29/22) श्रीमद्भागवतम्।

4/11/13 श्रीमद्भागवतम्।

***

# संस्कृतशिक्षणे भाषाप्रयोगशालायाः उपयोगिता

**डा. प्रेमसिंहसिकरवारः**
सहायकाचार्यः; शिक्षाशास्त्रविभागः,
श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्,
मानितविष्वविद्यालयः, नवदेहली-110016

अस्याः सृष्टेः निर्माणं कदा अभवत् ? अस्मासु को अपि न जानाति ? यदा सृष्टेः निर्माणप्रक्रिया आरम्भमभवत्, जीवानामुत्पत्तिः अभवत्, मानवजातेः जन्म अभवत् वयं न जानीमः, यत् ते सर्वे केन माध्यमेन व्यवहारं कुर्वन्ति स्म। भाषाशब्दस्य व्युत्पत्तिः 'भाष् व्यक्तायां वाचि' इति धातोः भाष्यते इति भाषा भवति। वस्तुतः मानवः स्वकीयभावान् अभिव्य ञ्जयितुं यस्य सार्थकमौखिकमाध्यमस्य उपयोगं करोति सा भाषा इति कथ्यते। अथ सा 'भाषणाद् हि भाषा' इत्यपि कथ्यते। भाषायाः शिक्षा व्यक्तित्वस्य विकासे सहायिका भवति। सा व्यक्तेः कृते दैनिकजीवने व्यावहारिक कुषलतां कल्पयति। अपेक्षितं ज्ञानं ददाति , कलात्मकानुभूतेः रचनात्मकाभिव्यक्तेष्च अवसरान् कल्पयति। मानवव्यक्तित्वस्य गतिषीलता भाषाप्रयोगे निर्भरा भवति। तथा चैतत् स्पष्टं भवति यत् शिक्षायां भाषायाः विषेष महत्त्वमस्ति। यदि शिक्षा जीवनाय सन्नाहः , तर्हि भाषा अस्य उद्देष्यस्य पूर्तये प्रबलं साधनं भवति। यद्यपि संकेतादिभिरपि भावनाभिव्यक्तिः क्रियते तथापि मनुष्यस्य सम्पूर्णं भावानामभिव्यक्तये एते संकेताः पर्याप्ताः न सन्ति। अतः वाचिकसंकेतानामुपयोगः मानवेन कृतः। भावाभिव्यक्तेः मुख्यं साधनं भाषेति सर्वैरंगीक्रियते। मानवसभ्यतासंस्कृत्योष्च विकासे भाषायाः विषिष्टमेव स्थानं भजते , अतः भाषायाः कथा सभ्यतायाः कथेति प्रसिद्धा वर्तते। चिन्तनस्य विचारविनिमयस्य च प्रबलमाध्यमरूपेण मानवविकासस्य प्रमुखसाधनत्वेन मानवसमाजस्य निर्माणस्य, विकासस्य च निदानरूपेण च भाषायाः योगदानं सर्वै मन्यन्ते। मानवसभ्यतायाः संस्कृतेश्च विकासे भाषायाः स्थानं महत्त्वपूर्णं वर्तते। भाषा मानवजीवनस्य प्राचीनतमोपलब्धिरस्ति भाषायाः सर्वोत्कृष्टतां स्पष्टीकुर्वन् व्याकरणमहाभाष्ये महर्षिपतंजलि लिखति-

एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुक् भवति।
दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।।

काव्यादर्शकर्त्रा आचार्यदण्डिना काव्यादर्शे कथितं यत्-

वाचामेव प्रसादेन लोकयात्रा प्रवर्तते,

इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्

यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।

अनेन स्पष्टं भवति यत् व्यावहारिकदृष्ट्या भाषायाः कीयती उपयोगिता वर्तते। स्वीट् महाभागस्यानुसारम्-‘ध्वन्यात्मकषब्दैः विचाराणां प्रकटीकरणमेव भाषा’ वर्तते। ई. एच. गार्डीनर महोदयानुसारम्- विचाराणाम् अभिव्यक्तये ध्वनिसंकेत एव भाषा अस्ति। डा. मंगलदेवमहाभागानुारम्- भाषा मानवस्य सा चेष्टा उच्यते , यया मानवः स्वकीयोच्चारणोपयोगि षरीरावयवैः उच्चारितैः वर्णनात्मकम् अथवा अभिव्यक्तशब्दैः स्वकीयविचारान् प्रकटीकरोति।’’ डा. भोलानाथतिवारीमहोदयः वदति यत्- भाषा उच्चारणावयवैः उच्चारिताध्ययनविष्लेषणैः यादृच्छिक ध्वनिप्रतीकानां सा व्यवस्था वर्तते , यस्याः माध्यमेन समाजे जनाः परस्परं स्वकीयभावानाम् आदान-प्रदानं कुर्वन्ति।’’

भाषायाः प्रकृतिः -

भाषायाः प्रकृतिः विषये भाषावैज्ञानिकानां मतम् अतीव उत्कृष्टं वर्तते। यथा-

1. भाषा प्रतीकात्मका वर्तते।
2. भाषा समाजस्य साधनमस्ति।
3. भाषा अर्जिता सम्पत्तिः वर्तते।
4. भाषा व्यावहारिककुषलता वर्तते।
5. भाषायाः अर्जनम् अभ्यासातिरिक्तानुकरणेन भवति।
6. भाषा मूलतः मौखिकसाधनमस्ति।
7. भाषा परिवर्तनषीला वर्तते।
8. भाषा विष्वस्य आधारषिला वर्तते।

संसारस्य प्राचीनतमा भाषा संस्कृतमस्ति। भारतीयेतिहासानुसारं विष्वस्य आदिकर्ता ब्रह्मणः मुखात् वेदमयीसंस्कृतभाषायाः जन्म अभवत्-

‘‘ अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।

आदौ वेदमयी दिव्याः यतः सर्वाः प्रवृत्तयः॥''

संसारस्य अन्यदे शानां जनाः यदा सांकेतिकभाषामाध्यमेन विचाराणाम् आदानप्रदानं कुर्वन्ति स्म अथवा व्यवहरन्ति स्म। तदा अस्माकं भारतदे शे संस्कृतभाषया ब्रह्मज्ञानस्य प्रचारप्रसारं प्रचलन्ति स्म। भाषायाः सुप्रयोगाय तस्याः व्याकरणसम्बन्धिनियमान् ज्ञातुं भाषायाः ज्ञानमावष्यकमस्ति। भाषायाः अवबोधस्य कृते तस्याः शिक्षणमपि आवष्यकमस्ति। संस्कृतभाषाशिक्षणे दृश्यश्रव्यसामग्रीणाम् उपकरणानां च स्वमहत्त्वं विशिष्टं वर्तते।

**संस्कृतशिक्षणेदृष्यश्रव्यसाधनानि-**

वर्तमानसमये अस्माभिः सूचनायाः संचारस्य तकनीक्याः च क्षेत्रे अद्विितीयाः उपलब्धयः प्राप्ताः। अद्य अधिकाधिकसूचनाः कस्यापि देषस्य विकासस्य मेरुदण्डं संजातम्। उपग्रहाः अन्यग्रहाः इव केवलम् आकाषे विचरणमेव न कुर्वन्ति , अपितु सूचनानाम् आदानप्रदानयोः अपि सहायकाः भवन्ति। अनेन वयं 'कर्गदरहितसमाजम्' प्रति गच्छामः। एतादृषस्थितौ अस्माभिः संस्कृतशिक्षणस्य परम्परासु परिवर्तनं कत्र्तव्यम् , एवं च नवीनतमदृष्यश्रव्यसाधनानाम् अधिकाधिकोपयोगं कृत्वा शिक्षणं रूचिकरम्, आकर्षकम्, सुग्राह्यं च कर्तव्यम्।

अनेकैः षोधाध्ययनैः इदं सिद्धं यत्किमपि कार्यम् अधिगन्तुं व्यक्तेः प्रयासं कुर्वन्ति , तावान् एव अधिगमः अधिकः स्थायी भवति। 'यूनिसेफ' इत्यस्य अध्ययनाधारेण- वयं कथं जानीमः? वयं कथं स्मरामः? उपर्युक्त वर्गचित्रद्वारा एतत् स्पष्टं भवति यद् अधिगमप्रक्रियायां दृष्यश्रव्योपकरणानां महत्वपूर्णभूमिका भवति। थामस एम रिस्कमहोदयानुसारम्- ''ज्ञानेन्द्रियानुभवेन एव कस्यापि वस्तुनः अथवा कस्याः अपि क्रियायाः मानसिकप्रतिबिम्बस्य रेखाचित्रस्य निर्माणं भवति। अस्य चित्रस्य आधारेण एव तत्सम्बन्धिनः प्रत्ययाः निर्मिताः भवन्ति। अतः शिक्षणेन ज्ञानस्य प्रत्यक्षीकरणाय मूर्ततासम्पादनाय च एतादृषानां शैक्षिकोपकरणानाम् आवष्यकता महत्ता च स्वयमेव सिद्धा भवति, येषां माध्यमेन वस्तुनः क्रियायाः भावानां विचाराणां च बिम्बग्रहणं सम्भवेत्।''
अतः दृष्यश्रव्यसाधनानि शिक्षणस्य एतादृष्यः सामग्र्यः सन्ति , यैः स्थौल्यात् सूक्ष्मतां प्रति गच्छतां छात्राणां ज्ञानं पोषयितुं बलं प्राप्यते। कस्याः अपि भाषायाः शुद्धस्य परिष्कृतस्य परिमार्जितस्य ज्ञानस्य हेतोः अभ्यासकरणमावष्यकमस्ति , यतोहि संस्कृतभाषा व्यावहारिकी भाषा नास्ति , अतः जनाः प्रायः इमां शुष्कनीरस इत्यादिभिः विषेषणैः सम्बोधयन्ति , किन्तु एतेषां विषेषणानां प्रयोक्तारः

संस्कृतभाषायाः महत्तां सरलतां च न जानन्ति। श्लोकानां यत् माधुर्यं सस्कृतभाषायां विद्यमानं वर्तते तत्कस्यामपि अन्यभाषायां नास्ति। माध्यमिकस्तरपर्यन्तं छात्रः तिसृभिः भाषाभिः सह अन्यविषयाणाम् अपि भारं वहति , अतः आवष्यकता वर्तते यत् संस्कृतभाषायाः शिक्षणं रूचिकरं स्यात्।

भाषायाः विकासार्थं विष्वविद्यालयेषु अधुना दृष्यश्रव्योपकरणानां प्रयोगाय दृष्यश्रव्यविभागाः स्थापनीयाः। चतुर्षु क्षेत्रीयप्रशिक्षणमहाविद्यालयेषु प्रशिक्षणसहोत्पादनकेन्द्राणि उद्घाटनीयानि। सम्प्रति अध्यापकपरिषदापि एतस्योपरि बलं दत्तम् , यत् शिक्षकप्रशिक्षणमहाविद्यालयेषु दृष्यश्रव्यसाधनानां प्राचुर्येण संग्रहो भवेत्।

प्रत्येकभाषाशिक्षकः श्यामपट्टस्य , चार्टपत्राणाम्, सान्द्रमुद्रिकाणां च प्रयोगं करोति। भाषाशिक्षणं स्वाश्रितं निर्मातुं ध्वनिविस्तारकयन्त्राणां आविष्कारः कृतः। पूर्वप्रचलितदृष्यश्रव्योपकरणानि शिक्षकाय केवलं सहायकोपकरणान्येव आसन् येषां माध्यमेन शिक्षणं प्रभावकारि भवति स्म। यथा-यथा कालक्रमेण यान्त्रिकोपकरणानां तकनीकीसंषोधनं कृत्वा शनैः शनैः भाषाप्रयोगशालारूपेण विकसितो भूत्वा शिक्षणकेन्द्रेषु तानि उपकरणानि भाषाप्रयोगशाला इति कथ्यते। इयं भाषाप्रयोगशाला शिक्षणप्रक्रियायाः मूलाधारो अभवत्।

विदेशेषु भाषाप्रयोगशाला भाषाशिक्षणक्षेत्रे स्वमहत्त्वपूर्णं स्थानं भजते। इयं शिक्षणयोजना आधुनिकतायाः प्रतिष्ठासूचकमस्ति। उपयोगितादृष्ट्या व्यवहारदृष्ट्या च मतद्वयं दृष्यते-एकं मतं भाषाप्रयोगषालां भाषाशिक्षणकेन्द्रे स्थापयति , शिक्षकं च सहायकरूपेण स्वीकरोति। द्वितीयमतानुसारेण शिक्षकः भाषाशिक्षणस्य केन्द्रे भवति। भाषाप्रयोगशाला च शिक्षणस्य एका सहायकसामग्री भवति। एतत् मतद्वयं क्रम शः 'प्रयोगशाला-केन्द्रित-अभिविन्यासः शिक्षक-केन्द्रित-अभिविन्यासश्च कथ्यते।

**प्रयोगशाला-केन्द्रित-अभिविन्यासः -**

1. पाठाः स्वाश्रिताः पूर्णाष्च भवन्ति।
2. पाठस्य व्याख्यायाः कृते शिक्षकस्य आवश्यकता न भवति।
3. शिक्षणम् अभ्यासोन्मुखी भवति। व्यक्तेः इच्छानुसारं भाषाव्यवहारस्य अभ्यासस्य अवसरश्च लभ्यते।

4. मौखिकपुनरावृत्ति अभ्यासस्य अवसरः लभ्यते।

5. भाषादक्षतायाः स्तरानुगुणं पाठसामग्रयाः पाठनिर्देषस्य च मानकीकृतरूपं लभ्यते।

अतः सर्वे शिक्षार्थिनः एकमेव पाठम्, एकमेव अभ्यासम् एकां ध्वनिम् एव श्रृण्वन्ति।

**शिक्षक-केन्द्रित-अभिविन्यासः -**

अस्मिन्नपि भाषाप्रयोगशालायाः उपयोगः भवति। अस्मिन् सन्दर्भे भाषाप्रयोगशाला केवलं शिक्षकस्य सहायकरूपेण भवति , कक्ष्यायाष्च विस्तार एव भवति। अस्मिन् प्रेरितशिक्षणविधौ शिक्षकः केन्द्रभूतः भवति, एतादृषः प्रयासो क्रियते यत् प्रयोगशाला शिक्षकशिक्षार्थिनोर्मध्ये बाधा न स्यात्। अतः भाषाप्रयोगशालायै निर्मिताः पाठ्यसामग्रयः पाठानां पूरकाः एव भवन्ति।

**भाषाप्रयोगशालायाः अर्थः** -

प्रो. एडावन पैकावरमहोदयेन अभिहितं यत्- ‘‘ भाषाप्रयोगशाला विद्यन्नियन्त्रितः क श्चन शिक्षणपप्रकोष्ठः, यस्योपयोगः सामूहिकरूपेण भाषाशिक्षणार्थं क्रियते। अत्र छात्राः एकत्र उपवि श्य भाषाभ्यासं कुर्वन्ति, वैयक्तिकनिर्देशनं च प्राप्नुवन्ति। एकैकस्यापि छात्रस्य उपवेषनार्थम् अत्र पृथक् आसन्दव्यवस्था भवति। अवरोधपट्टिकायाः संलग्नहेतोः छात्राः इतस्ततः द्रष्टुं नार्हन्ति। प्रत्येकमासन्दस्योपरि श्रवणयन्त्रं ध्वनिमुद्रणयन्त्रं च संलग्नं भवति। एतस्य यन्त्रस्य सहाय्येन छात्राः कथयन्तः अध्यापकस्य ध्वनिं ध्वनिमुद्रिकां वा श्रोतुं प्रभवन्ति। तत्र अध्यापकस्य आसन्दः तादृशस्थाने भवति , यत्र स्थित्वा सः प्रयोगशालायां शिक्षमाणान् सर्वान् छात्रान् नियन्त्रयितुं शक्नोति।

**भाषाप्रयोगशालायाः सम्प्रत्ययः -**

भाषाप्रयोगशालायाः प्रकृतिं स्वरूपं च अवगन्तुं तत्सम्प्रत्ययः अव श्यं ज्ञातव्यः। अतः केचन सम्प्रत्ययाः अधः निर्दिश्यन्ते-

1. विकसितप्रयोगशालासु मुद्रितभाषणेन व्याख्यानेन वा छात्रेभ्यः अनुदेषनम् आदौ प्रदीयते।

2. अत्र छात्राः ध्वनिग्रहणयन्त्रमाध्यमेन पठितभाषासु उक्तानि पदानि वाक्यानि च श्रृण्वन्ति।

3. अत्र कथयितुं शब्दान् वाक्यानि च द्विवारं त्रिवारं श्रोतुं ध्वनिमुद्रणयन्त्रस्य स्थगनं मध्ये मध्ये क्रियते।

4. अनन्तरं प्रष्नोत्तराभ्यासेन पाठः पाठ्यते।

5. चित्रस्य प्रदर्षनं यवनिकायां क्रियते, येन कक्षायां विद्यमानाः सर्वे छात्राः सुष्ठुं शक्नुयुः।

**भाषाप्रयोगशालायाः उपयोगिता -**

आधुनिककाले कस्यांचित् भाषायां सुष्ठु अधिकारप्राप्तये भाषाप्रयोगशालायाः उपयोगिता वर्तते। निम्नलिखितानि कारणानि एतस्याः उपयोगितां द्योतयन्ति। यथा-

1. एषा वैयक्तिकभिन्नतानुगुणं भाषाभ्यासार्थं छात्रान् सहकरोति।
2. अध्यापकस्य अभावे अपि छात्राः स्वयं भाषाभ्यासं कर्तुं शक्नुवन्ति।
3. प्रयोगशालायामेव भाषाभ्यासार्थम् अधिकतया पुनराववृत्तिः भवितुमर्हति।
4. प्रयोगशालायां भाषाभ्यासार्थम् अधिकसमयः लभ्यते।
5. छात्रः स्वीयदोषान् स्वयमवगन्तुं शक्नोति।
6. अन्येषाम् अवरोधं विना अध्यापकः नियन्त्रयन् छात्रेभ्यः वैयक्तिकानुदेशनं दातुं प्रभवति।
7. श्रुत्वा उच्चारयितुम् अत्र समुचितः अववकाषः विद्यते।

भाषाप्रयोगशालायाः प्रकृतिः -

अत्र एकस्मिन् पा र्श्वे ध्वनिवर्धकम्। अपरस्मिन् पाष्र्वे छात्रनिमित्तं श्रवणयन्त्रं भवति। यथा ग्रन्थालयात् छात्रः पुस्तकं स्वीकृत्य पठित्वा प्रत्यर्पयति, तथैव पाठांकितां ध्वनिमुद्रिकां सान्द्रमुद्रिकां वा स्वीकृत्य तच्छ्रुत्वा, पुनः प्रत्यर्पयति। शब्दसक्रियप्रयोग शालायां श्रवणसौकर्येण सह प्रदत्तपाठस्य अनुकरणं पुनरुच्चारणं च कर्तुम् अभ्यासस्य सौविध्यं वर्तते। एतादृषप्रयोगशालायां प्रत्युत्तरं मुद्रयितुं ध्वनिमुद्रणस्य व्यवस्था भवति। शिक्षकः अनन्तरं तां ध्वनिमुद्रिकां श्रुत्वा छात्राणां दोषान् ज्ञातुं शक्नोति। भाषाप्रयोगशालायां सम्प्रेषणकौषलस्य सम्वर्धनं भवति।

1. प्रत्येकभाषायां केचन अभ्यासाः अनुवर्तनीयाः भवन्ति। भाषायाः अभ्यासः असकृद् अनुकरणेन सम्पाद्यते। अतः केचन विषयाः बहुवारम् अभ्यसनीयाः भवन्ति। एतदर्थं ध्वनिमुद्रिकां निरोद्धुम्, अग्रे चालयितुम् , पष्चात् चालयितुं वा छात्राणाम् अवका शः विद्यते। एवं सम्यक् अवबोधपर्यन्तम् अभ्यासं कर्तुं शक्यः।
2. एकैकः अपि छात्रः स्ववेगेन अधिगन्तुं शक्नोति।
3. भाषाप्रयोगशालायां ग्रन्थालयव्यवस्थापि भवति। अर्थात् अधिगन्ता आवष्यकध्वनिमुद्रिकां स्वेच्छया नियन्त्रणप्रकोष्ठात् बहिः स्वीकर्तुम् अर्हति।

भाषाप्रयोगशालायाः आवश्यकता -

अस्मिन् आधुनिकप्रविधियुगे भाषाप्रयोगशालायाः महती आवष्यकता वर्तते। तद्यथा-

1. छात्राणां वैयक्तिकभेदेन तेषाम् अधिगमयोग्यता अपि भिन्ना भवति। अतः भाषाधिगमे अपि वैयक्तिकयोग्यतानुगुणं शिक्षणप्रदानार्थम् अस्याः आवष्यकता भवति।

2. सफलसम्प्रेषणे भाषायाः भाषणकौषलस्य च अधिकं महत्त्वं वर्तते। अतः भाषणकौषलसंवर्धनाय एतद्भाषाभाषिणां सम्भाषणं मुद्रयित्वा छात्रेभ्यः श्राव्यते। एतनैव ते अभ्यासं कुर्वन्ति।

3. भाषाध्ययने वारम्वारम् आवष्यकता वर्तते। असकृत् श्रोतव्यम् उच्चरणीयं च भववति। एतदर्थं भाषाप्रयोगशालायाः आवष्यकता भवति।

**भाषाप्रयोगशालायाः प्रकाराः -**

भाषाप्रयोगशाला विद्युन्नियन्त्रितः एकः कक्षः भवति। यस्मिन् कक्षे छात्राः सम्भूयः भाषायाः ज्ञानं प्राप्नुवन्ति तथा च व्यक्तिगतनिर्देषनमपि प्राप्नुवन्ति। छात्राणां कृते पृथक् पृथक् उत्पीठिका-आसन्दिका च भवतः। तत्र यवनिकायां व्यवस्थापि भवति , अतः छात्राः इतस्ततः द्रष्टुं न शक्नुवन्ति। प्रत्येकोत्पीठिकायामुपरि कर्णवाणी ध्वन्याभिलेखादयष्च भवन्ति। शिक्षकः ईदृ शे स्थले भवति। यतः सः प्रयोगशालायां छात्रेषु नियन्त्रणं कर्तुं शक्नोति।

भाषाप्रयोगशालायाः निर्माणम् -

भाषाप्रयोगशालायां त्रयः विभागाः वर्तन्ते। तद्यथा-

1. श्रवणविभागः
2. सहायकविभागः
3. नियन्त्रणविभागष्चेति।

1. **श्रवणविभागः -**

भाषाप्रयोगशालायां छात्राणां कृते श्रोतुं षोडषतः आरभ्य विंषतिपर्यन्तं प्रकोष्ठाः भवन्ति। प्रतिप्रकोष्ठम् एका उत्पीठिका , एकः आसन्दः , एकं ध्वनिमुद्रणयन्त्रम् एकं श्रवणयन्त्रं च भवति। अध्यापकेन सह वार्तालापं कर्तुम् अन्तर्दूरवाण्याः सौलभ्यमपि भवति।

2. **सहायकविभागः -**

विभागे अस्मिन् मुख्यध्वनिमुद्रिकाः भवन्ति। तेन अध्यापकः प्रयोगशालायां युगपत् सर्वे एकेन सह वा सम्भाषयितुं प्रभवति।

3. **नियन्त्रणविभागः -**

नियन्त्रणविभागे सर्वविधाः ध्वनिमुद्रिकाः भवन्ति। एवमेव छात्रदोषान् नियन्त्रयितुम् आवष्यकीयपरिकराः अपि भवन्ति। ततः एव छात्राणां नियन्त्रणम् अध्यापकः करोति।

भाषाप्रयोगशालायाः सीमा -

भाषाप्रयोगशाला यद्यपि अस्मिन् आधुनिककाले अत्यन्तमुपयोगिनी भवन्ति , किन्तु एतस्याः उपयोगे काष्चन परिमितयः वर्तन्ते। तद्यथा-

1. श्रवणभाषणकौषलयोः कृते एएव एतस्याः उपयोगः भवितुमर्हति। न तु पठनलेखनकौषलयोः।
2. अस्याः उपयोगः एकवारं 10 तः 20 छात्राणां कृते एव भवति।
3. एतदर्थम् अधिकधनव्ययः भवति।
4. अन्यविषयाणां बोधने इयं नोपकरोति।
5. अस्मिन् क्षेत्रे प्रषिक्षिताध्यापकाः विरलाः एव भवन्ति।

**भाषाप्रयोगशालायाः प्रक्रियाः -** भाषाप्रयोगशालायाम् उपकरणानां व्यवस्थां दृष्ट्वा भाषाशिक्षणस्य योजना निर्मीयते। तत्र इमानि सोपानानि भवन्ति-

1. **कार्यक्रमप्रसारः -** सर्वप्रथमम् अध्यापकः आदर्षमुद्रणं प्रसारयति। प्रकोष्ठस्थासु ध्वनिमुद्रिकासु तस्य मुद्रणं भवति। केनापि छात्रेण तस्य स्थगनं कठिनांषानां पुनः श्रवणं वा कर्तुं न शक्यते। अयमेव पिहितसोपानाधिगमः इत्युच्यते। प्रसार्यमाणे कार्यक्रमे छात्राणां कृते चयनस्य अवसरो न भवति।

2. **एकमार्गिव्यवस्थायाम् -**

एकमार्गिव्यवस्थायाम् अभ्यासार्थं पंचचरणाः अनुस्रियन्ते। ते यथा -

1. श्रवणम्
2. अनुकरणम्
3. श्रवणम्

4. परीक्षणं पुनरावृत्तिष्च।

3. **उभयमार्गिव्यवस्था -**

उभयमार्गिव्यवस्थायाम् अभ्यासार्थं चत्वारः चरणाः अनुक्रियन्ते। ते यथा -

1. संचालनं श्रवणं च
2. अनुकरणं ध्वनिः मुद्रणं च
3. श्रवणं परीक्षणं च
4. पुनरावृत्तिः ध्वनिः मुद्रणं च।

**संस्कृतशिक्षणे उपयोगिता -**

संस्कृतभाषाशिक्षणे विभिन्नध्वनीनामुच्चारणस्थानस्य संस्कृतसम्भाषणस्य , शुद्धोच्चारणस्य, श्लोकपाठस्य, प्रार्थनायाः, नाटकानां संवादस्य , आदर्षवाचनम् अभ्यासार्थं भाषाप्रयोगशाला अत्युपयोगिनी भवति। व्यवस्थेयं व्यवस्थासाध्या विद्यते किन्तु सामूहिकभाषाशिक्षणाय उपचारात्मकशिक्षणाय च लाभदायिनी अस्ति।

**निष्कर्षः -**

भाषाप्रयोगशाला केवलं श्रव्यप्रकारत्वेन , दृष्यश्रव्यप्रकारत्वेन वा भवितुमर्हति। श्रव्यभाषाप्रयोगशालायां ध्वनिमुद्रणयन्त्रम् , वर्तुलपंजिका भाषापंजिका , सान्द्रमुद्रिका इत्यादि यन्त्राणि भवन्ति। दृष्यश्रव्यप्रयोगशालायां सर्वैः श्रव्योपकरणैः सह चित्रप्रकाषकः , चित्रपत्रम्, चित्रपट्टिका इत्यादि साधनानि अपि भवन्ति। दृष्यश्रव्यप्रयोगशालायां समस्तश्रव्योपकरणैः सह चित्रप्रकाषकः, चित्रपत्रम्, चित्रपट्टिका इत्यादीनि उपकरणानि भवन्ति। श्रव्यप्रयोगशाला श्रवणकौषलस्य, दृष्यश्रव्यप्रयोगशाला मौखिकाभ्यासस्य महत्त्वं प्रयच्छति।

संस्कृतभाषाशिक्षणे विभिन्नध्वनीनाम् उच्चारणस्य स्थानम् , संस्कृतसम्भाषणम्, शुद्धोच्चारणम्, श्लोकपठनम्, प्रार्थना, नाटकानां संवादः, आदर्षवाचनम्, इत्यादीनाम् अभ्यासार्थं भाषाप्रयोगशाला अत्यन्तम् उपयोगिनी मनसि निधाय यदि उपयुज्यते , तर्हि अधिगन्तृणां श्रवणसम्भाषणकौषलयोः विकासः अवष्यं सम्भवति। यद्यपि अस्य उपयोगः विदेषीयभाषाभ्यासार्थम्, द्वितीयभाषाभ्यासार्थम् च उपयुज्यते , तथापि प्रथमभाषाभ्यासार्थमपि भाषाप्रयोगशाला उपयोक्तुं शक्या इति नास्ति सन्देहः।

**सन्दर्भग्रन्थसूची-**

1. सफाया, रघुनाथ, 1990, संस्कृतशिक्षण, हरियाणा ग्रन्थ अकादमी, चण्डीगढ, हरियाणा।
2. पाण्डेय, रामषकल, 1995, संस्कृतशिक्षण, विनोद पुस्तक मन्दिर, आगरा, उत्तरप्रदेषः।
3. शर्मा च.ल.ना. एवं सिंह फतेह , 1997, संस्कृतशिक्षणम्-नवीनप्रविधयष्च, आदित्यप्रकाषनम् जयपुरम्।
4. मित्तल, सन्तोष, 1997, संस्कृतशिक्षण, लाल बुक डिपो, मेरठ, उत्तरप्रदेषः।
5. शर्मा, मुरलीधरः, 1995, संस्कृतशिक्षणसमस्याः, रा.सं. विद्यापीठम् , तिरूपतिः, आन्ध्रप्रदेषः।
6. मित्तल, सन्तोष, 2006, संस्कृतशिक्षणम्, नवचेतनापब्लिकेषन्स, जयपुरम्।
7. आप्टे, डी.जी. एण्ड डोगरे, पी. के.,1990, टीचिंग आंफ संस्कृत इन सैकण्डरी स्कूल।

# शिक्षायां मानसिकस्वास्थ्यम्

डा. कौशलेश शर्मा
सहाचार्यः शिक्षाशास्त्रविभागः,
श्रीसदाशिवपरिसरः, पुरी

' शरीरमाद्यं खलु धर्मसाधनम् " कालिदासकृत कुमारसम्भवकाव्यस्य सूक्तिरियं प्रणिनः शरीरस्य महत्त्वं ज्ञापयति। शरीरेण युक्तं शारीरिकम् , तेन शारीरिकेन सम्बन्धितं स्वास्थ्यं शारीरिकस्वास्थ्यम्। शारीरिकस्वास्थ्ये शरीरसम्बन्धिरोगाणाम् अभिज्ञानमुपचारश्च क्रियते, तथैव मानसिकस्वास्थ्यविज्ञानेऽपि मनसः विविधानां रोगाणामध्ययनं , निवारणम्, उपचारश्च विधीयते। मनसा युक्तं मानसिकम् , तेन मानसिकेन सम्बन्धितं स्वास्थ्यं मानसिकस्वास्थ्यम्। शिक्षामनोविज्ञाने बालकस्य व्यक्तित्वस्य विविधपक्षाणामध्ययनं क्रियते । यथा शारीरिकपक्षः , मानसिकपक्षः, सामाजिकपक्षः, सांवेगिकपक्षश्चादयः। एतेषु पक्षेषु मानसिकपक्षस्य महत्वं प्रभावश्चान्यतमः वर्तते। यतोहि अन्येषु सर्वेषु पक्षेषु मानसिकपक्षस्य उन्नतेः अवनतेश्च प्रभावः पतत्येव। शिक्षाक्षेत्रे बालकेभ्यः शिक्षाप्रदानकाले तेषां मानसिकस्वास्थ्यस्य परीक्षणमपि कुर्यादिति। यतोहि यदि बालकानां मानसिकस्वास्थ्यमुत्तमं भवति, तर्हि ते अधिगमप्रक्रियायां सक्रियाः भवन्ति, तथा च तेषां व्यक्तित्वस्य विकासोऽपि बहुप्रितभया सम्पद्यते।

मानसिकस्वास्थ्यस्य तात्पर्यं मनसा मस्तिष्केन च सह वर्तते। मानसिकस्वास्थ्यं मानसिकशक्तीनां समुचितं विकासं स्पष्टयति। मनः जीवनञ्च सुखमयमानन्दमयञ्च विधातुं रक्षणोपायान् उपचारान् च बोधयति।

गुड कार्टर वी. महोदयः स्वसम्पादिते शिक्षाशब्दकोषे मानसिकस्वास्थ्यस्यार्थमित्थं परिभाषते - मनसः स्वास्थ्यस्य तात्पर्यं पूर्णता समग्रता वा इत्यस्मिन् रूपे स्वीकृता वर्तते। अस्मिन्नर्थे मानसिकस्वास्थ्यस्य प्रयोजनं व्यक्तेः मानसिकक्लेशान् अपाकृत्य आनन्दपूर्वकं जीवनयापनेन सह वर्तते।

जे. ए. हैडफील्डमहोदयः अभणत् – मानसिकस्वास्थ्यस्याभिप्रयं व्यक्तेः समग्रव्यक्तित्वस्य आत्मना सह समायोजनपूर्वकं कार्यसम्पादनम्।

मानसिकस्वास्थ्यस्य क्षेत्रं शारीरिकस्वास्थ्यापेक्षा विस्तृतं भवति। यतो हि शारीरिकस्वास्थ्यस्य सम्बन्धः शारीरिकविकासः तथा तस्य उत्तमकार्यकरणेन सह भवति , किन्तु मानसिकस्वास्थ्यस्य सम्बन्धः व्यक्तित्वस्य विविधपक्षैः सह वर्तते। प्रत्येकं पक्षस्योपरि एतस्य प्रभावः दरीदृश्यते। यदि

कस्यचिद् बालकस्य मानसिकस्वास्थ्यमुत्तमं भविष्यति , तर्हि तस्य बालकस्य शारीरिकविकासः , सांवेगिकविकासः, सामाजिकविकासश्चापि सुष्ठु भविष्यति।

कट्स तथा मोसले महोदयाभ्यामेवं निगदितं यत् – मानसिकस्वास्थ्यं सा योग्यता वर्तते, या अस्मान् जीवनस्य विषमपरिस्थितिषु समायोजनाय उपकरोति।

मानसिकस्वास्थ्यस्यावश्यकता – यजुर्वेदे लिखितमस्ति यत् ' तन्मे मनः शिवसङ्कल्पमस्तु "। अस्माकं मनः शुद्धं स्यात्, कल्याणकरं स्यात्। 'मन एव मनुष्याणां कारणं बन्धमोक्षयोः" इति सूक्तिः मनसः महत्वं स्पष्टयति। तस्य मनसः सुस्वस्थता परमावश्यकती। जीवने मनसः मस्तिष्कस्य च महत्वपूर्णं स्थानं भवति। मानवस्य सर्वाणि कार्याणि सामान्यतः मानसिकशक्त्यैव सम्पाद्यन्ते। अधुना समाजे विभिन्नानि परिवर्तनानि समभवन् , यैः मानवेष्वपि प्रभावः पतत्येव। मानवस्य दैनिकचर्या अपि तादृशी अव्यवस्थिता एव वर्तते। अधुना समाजप्रभावेन जनाः मानसिकान्तर्द्वन्द्वैः पीडिताः भवन्ति। शिक्षायामपि शिक्षकः विद्यार्थी कर्मचारिणश्च कर्म कुर्वन्ति , यदि एतेषां मानसिकस्वास्थ्यं समीचीनं न भविष्यति , तर्हि शिक्षाप्रदानं निष्फलं भविष्यति। अतः शिक्षाक्षेत्रेऽपि अध्यापकच्छात्रयोः मानसिकस्वास्थ्यस्य संरक्षणाय , दोषान् अपाकरणाय च मानसिकस्वास्थ्यस्य आवश्यकता भवति। अतः अस्माभिः मानसिकस्वास्थ्योपरि अवधानं नूनमेव प्रदेयम्।

अरस्तूमहोदयः निगदितवान् यत् – स्वस्थशरीरे स्वस्थमस्तिष्कस्य निर्माणमेव शिक्षा।

उत्तममानसिकस्वास्थ्यस्य लक्षणानि – प्रयः मानसिकरूपेण स्वस्थः जनः स्वव्यवहारेण , जीवनशैल्या, विशेषताभिश्च सह अन्येभ्यः जनेभ्यः भिन्नो भवति। तस्य व्यक्तित्वे निम्नाः विशेषताः प्रप्यन्ते। ताः यथा –

मानसिकरूपेण स्वस्थः जनः स्वयोग्यताभिः, क्षमताभिः, न्यूनताभिश्च सह परिचितो भवति।

अस्मिन् जने परिवर्त्यपरिस्थितिषु परिवर्तनाय समग्र योग्यता भवति।

सः संवेगात्मकदृष्ट्या स्थितप्रज्ञः परिपक्वश्च भवति। सः संवेगानाम् अभिव्यक्तिं स्पष्टरीत्या करोति।

तस्य मानसिकशक्तयरपि विकसिताः भवन्ति। सः स्वतन्त्ररूपेण चिन्तयति, उचितञ्च निर्णयति।

सः काल्पनिकजगतः अपेक्षा यथार्थजगति विचरति।

सः स्वसमूहे पर्यावरणे चात्मानं सुरक्षितः सम्मानितश्चानुभवति।

मानसिकदृष्ट्या स्वस्थः जनः मानसिककुण्ठाभिः, चिन्ताभिः, विविधरोगैश्च पीडितो न भवति।

अयं जनः आत्मविश्वासी भवति। तस्मिन् सामाजिकगुणाः भवन्ति।

जीवनस्य विषये तस्य दृष्टिकोणः स्पष्टः भवति। तस्य जीवनादर्शाः अपि समुचिताः भवन्ति।

अयं स्वकार्यैः व्यवसायेन च सन्तुष्टिमनुभवति।

असामान्यमानसिकस्वास्थ्यस्य लक्षणानि –

सांवेगिकदृष्ट्या अस्थिरः।

शंकालुः, असुरक्षाभावनया ग्रस्तः।

आत्मविश्वासस्य इच्छाशक्तेश्चाभावः।

वातावरणेन आत्मना च साकं समायोजने विफलता।

धैर्यस्य सहिष्णुतायाश्चाभावः।

निर्णयशक्तेरभावः।

मानसिकरोगैः चिन्ताभिश्च पीडितः।

स्वनिर्मितकाल्पनिकजगति विहरणम्।

मानसिकस्वास्थ्यं प्रभावयन्तः कारकाः

मानसिकस्वास्थ्यस्योपरि नैके कारकाः कुप्रभावं जनयन्ति। येन बालकस्य समायोजनशक्तिः विनश्यति। तस्य व्यक्तित्वं कुसमायोजनं प्रित गच्छति। एते कारकाः अधोलिखिताः वर्तन्ते –

वंशानुक्रमः – बालकः स्वपितृभ्यां काश्चन मानसिकागुणान् प्रप्नोति। तैश्चावगुणैः सः मानसिकदृष्ट्या अस्वस्थः जायते। अनेन तस्य समायोजनमपि प्रभावितं भवति।

शारीरिकस्वास्थ्यम्–शारीरिकस्वास्थ्यस्य मानसिकस्वास्थ्येन साकं घनिष्ठः सम्बन्धः भवति। उत्तमशारीरिकस्वास्थ्यमेव उत्तममानसिकस्वास्थ्यस्य आधारः भवति। शारीरिकदृष्ट्या अस्वस्थाः बालकाः सामान्यतः नूतनपरिस्थितिषु समायोजने काठिन्यमनुभवन्ति।

शारीरिकदोषः –जन्मना दुर्घटनाभिः वा शारीरिकविसंगतयः अपि बालस्य मानसिकस्वास्थ्यं नितरां प्रभावयन्ति। तेषु हीनभावना आगच्छति। अनेन तेषां व्यक्तित्वं विघटितं भवति।

पारिवारिकवातावरणम् – पारिवारिकमनुशासनम्, आर्थिकस्थितिः, उच्चमहत्वाकांक्षाः, परस्परं सम्बन्धश्चैते कारकाः अपि बालकस्य मानसिकस्वास्थ्यं प्रभावयन्ति।

समाजः- समाजस्य प्रभावः बालके स्वाभाविकरूपेणैव जायते। सामाजिकवातावरणं दोषपूर्णम् , जातीयसंघर्षः, सम्प्रदायवादः, उच्च-नीचभेदाः इत्यादयश्चापि बालकस्य मानसिकस्वास्थ्यं प्रभावयन्ति।

विद्यालयः – विद्यालयस्य वातावरणम् , पाठ्यक्रमः,शिक्षणविधयः, परीक्षाप्रणाली अध्यापकस्य व्यवहारश्चैते अपि तस्य स्वास्थ्यं मुख्यरूपेण प्रभावयन्ति।

अनेन स्पष्टं भवति यदेते विविधकारकाः बालकानां मानसिकस्वास्थ्यं प्रभावयन्ति। अत एव बालकानां मानसिकस्वास्थ्यस्य संरक्षणाय विकासाय च परिवारेण, विद्यालयेन, समाजेन च उत्तमानि कार्याणि नूनमेव कर्तव्यानीति।

निष्कर्षः -

शिक्षाशास्त्रे सर्वाधिकं चिन्तनीयः विषयः वर्तते मानसिकं स्वास्थ्यम्। यतोहि शारीरिकास्वस्थता तु दर्शनेन ज्ञायते, किन्तु मानसिकास्वस्थता न। अधुना अस्माभिः दृश्यते यत् विद्यालये विश्वविद्यालये वा अधीयेषु छात्रेषु चिन्ता, नैराश्यम्, भयमादयश्च वर्द्धन्ते एव। एभिः तेषामधिगमस्तरः न्यूनः भवति , तथा च शनैः शनैः तेषां व्यक्तित्वमपि विखण्डितं भवति। अतः शिक्षकाणामिदं परमं कर्तव्यं वर्तते यत्ते बालान् जानीयुः, तेषां समस्याभिः सह परिचिताः भवेयुः , तैस्सह आत्मीयं सम्बन्धं स्थापयेयुः। यदि शिक्षकाः इत्थं व्यवहर्युः , तर्हि अस्माभिः सगर्वं वक्तुं शक्यते यत् राष्ट्रस्य विकासः नूनमेव भविष्यत्येव।

सन्दर्भग्रन्थसूची –

१. शिक्षामनोविज्ञान – मंगल एस.के., पी.एच.आई.लर्निंग प्रइवेट लिमिटेड, नई दिल्ली।
२. शिक्षामनोविज्ञानम् – डा. फतेहसिंहः, आदित्यप्रकाशनम्, जयपुरम्।
३. कुमारसम्भवम् , कालिदासकृतम्।
४. यजुर्वेदः – शिवसङ्कल्पसूक्तः।

***

# उच्च शिक्षा में गुणवत्ताः समस्याएं एवं संभावनाएं

**डा. शुद्धात्मप्रकाश जैन**
निदेशक, के. जे. सोमैया सेंटर फॅर स्टडीज इन जैनिज्म,
विद्या विहार, मुम्बई
Email- shuddhatmapjain@gmail.com

वर्तमान युग में उच्च शिक्षा अपना अपरिमित विस्तार कर रही है। उच्च शिक्षा संस्थान बड़ी संख्या में खोले जा रहे हैं तथा अधिकाधिक लोग उच्च शिक्षा को प्राप्त करना चाह रहे हैं, परन्तु विचारणीय प्रश्न यह है कि क्या हम उच्च शिक्षा संस्थाओं में संख्यात्मक विकास के साथ-साथ उनके गुणात्मक उन्नयन के बारे में भी सोच रहे हैं? शायद हमें इस प्रश्न का उत्तर अत्यन्त गहराई से ढूंढना होगा, हमने इस (संख्यात्मक वृद्धि) अन्धानुकरण में उच्च शिक्षा की गुणवत्ता को कहीं बहुत पीछे छोड़ दिया है। आज हम सम्पूर्ण गुणवत्ता प्रबन्धन (ज्फड) की चर्चा कर रहे हैं। हम विभिन्न स्तरों पर और विभिन्न सम्बन्धित पक्षों को अत्यन्त बारीकी से देखते हुए गुणवत्ता प्रबन्धन को सुनिश्चित करते हैं, परन्तु यह सर्वविदित है कि हम विविध सम्बन्धित महत्वपूर्ण पक्षों की गुणवत्ता का ध्यान नहीं रख रहे हैं। चाहे वह शिक्षण अधिगम व्यवस्था हो या मूलभूत संरचना हो, हम केवल संख्यात्मक विकास पर बल दे रहे हैं। वास्तव में इसप्रकार की गुणवत्ताविहीन उच्च शिक्षा हमारे देश को इस वैज्ञानिक समुदाय की प्रतियोगिता में बहुत पीछे छोड़ देगी।

भूमिका- आधुनिक युग सूचना एवं संचार तकनीकी का युग है। साथ ही भूमण्डलीकरण , सार्वभौमीकरण जैसे शब्द आज सर्वाधिक प्रासंगिक है। उदारीकरण एवं निजीकरण की ओर हम अग्रसर हैं, परन्तु उच्च शिक्षा के क्षेत्र में गुणवत्ता स्थापन , गुणवत्ता प्रबन्धन एवं गुणवत्ता उन्नयन अभी प्राथमिकता में है। नेशनल नालेज कमीशन ( 2004) ने 2007 में देश में 1500 विश्वविद्यालयों की स्थापना की संस्तुति की। इससे स्पष्ट होता है कि हम उच्च शिक्षा के संख्यात्मक प्रसार के प्रति अत्यन्त जागरूक हैं। हम यह चाहते हैं। कि हमारे देश का प्रत्येक नागरिक उच्च रूप से शिक्षित हो , परन्तु इस प्रक्रिया के दुष्परिणामों के प्रति हमें अत्यन्त गम्भीरता से विचार करना होगा। यदि हमने अत्यन्त उच्च रूप से शिक्षित नागरिक तैयार किये तो यह संभावना बढ़ जायेगी

कि हम इनको उच्च शिक्षा की डिग्री तो दे देंगे , परन्तु हम उन्हें अपेक्षित रूप से शिक्षित नहीं कर पायेंगे, क्योंकि यदि हमने अधिक संख्या में उच्च शिक्षा संस्थानों की स्थापना की तो यह विचारणीय बिन्दु होगा कि हम उन्हें गुणवत्तायुक्त शिक्षा एवं नैतिक मूल्यों को प्रदान कर सकेंगे। इसलिए यह एक अत्यन्त महत्वपूर्ण समस्या है जिसके बारे में हमें साथ बैठकर विचार करना होगा , हमें यह देखना होगा कि गुणवत्तायुक्त उच्च शिक्षा के लिए हमने कौनसे मानक निर्धारित किये हैं।

गुणवत्ता का अर्थ- यदि हम गुणवत्तायुक्त शिक्षा को परिभाषित करना चाहते हैं तो हम यह कह सकते हैं कि न्यूनतम एवं सहज प्रयासों में इष्टतम एवं सफलतापूर्वक अभीष्ट शिक्षण-उद्देश्यां को प्राप्त कर लेने की क्षमतायुक्त शिक्षापद्धति को गुणवत्तायुक्त शिक्षापद्धति कही जा सकती है।

उच्च शिक्षा में गुणवत्ता की वर्तमान स्थिति- आज हमने गुणवत्ता के एक महत्वपूर्ण घटक ''नैतिक मूल्य'' को वर्तमान शिक्षापद्धति से तिरोभूत कर दिया है , जिससे आज मानवीयता की महती समस्या समक्ष आई है। आज का युवा उच्च शिक्षा प्राप्त कर बौद्धिक और तार्किक योग्यता तो प्राप्त कर लेता है , किन्तु जीवन में सांवेगिक सन्तुलन एवं भावनात्मक विकास नहीं कर पाया , जिसकी वजह से वह अपनी तार्किक योग्यता द्वारा कुतर्क का प्रयोग करता है और भावनात्मक विकास नहीं होने से जीवन में छोटी-छोटी समस्याओं से घबरा जाता है और पलायन का मार्ग अपना लेता है , अन्यथा आत्महत्या जैसे जघन्य कृत्य को अपना लेता है। यदि आत्महत्या से बचाने का कार्य शिक्षा ने नहीं किया तो फिर वह वह उच्च शिक्षा कैसे कही जा सकती है ? अतः आज हमें ऐसी शिक्षा की आवश्यकता है जो पूर्णतः सन्तुलित हो अर्थात् जिसमें नैतिक , आध्यात्मिक, भावनात्मक, यौगिक, मानसिक, संवेगात्मक आदि सभी प्रकार के पहलुओं का समग्र विकास होता हो। तभी उच्च शिक्षा में गुणवत्ता लाई जा सकती है।

गुणवत्ता सम्बन्धी समस्यायें- समाज आज विघटन और संक्रान्ति काल से गुजर रहा है। आस्था , विश्वास, शांति व सद्भाव जैसे मानवीय व नैतिक मूल्य आज अपना अस्तित्व खोते जा रहे हैं। व्यक्ति आज भीड़ में अकेला होकर रह गया है। पारिवारिक बंधन कमजोर हो रहे हैं। एक राष्ट्र के रूप में हमने भौतिक उन्नति में कई कीर्तिमान स्थापित किये हैं। अन्तरिक्ष भेदने से लेकर परमाणु बम तक हमारी उपलब्धियां हैं, किन्तु नैतिक व मानवीय धरातल पर हम पिछड़ते जा रहे हें। नागरिक को उसके कर्तव्य भी संविधान द्वारा याद दिलाने की आवश्यकता पड़ती है।

गुणवत्ता के सम्बन्ध में हम देखें तो हम पायेंगे कि शिक्षा के क्षेत्र में उच्च तबके से लेकर निम्न स्तर तक का वर्ग भ्रष्टाचार के घोर साये में सोया हुआ है। महाविद्यालयों के निरीक्षण आदि से लेकर कोर्सेज, मान्यता, शिक्षण, उपाधियां आदि सभी दृष्टियों से गुणवत्ता को कमजोर बनाने में हम सभी शिक्षित वर्ग को हाथ अशिक्षित की अपेक्षा कहीं अधिक है। आज हम गुणवत्ता की बात करने के लिए सेमीनार, कार्यशाला आदि का आयोजन कर बहुत धनराशि व्यय करते हैं , लेकिन गुणवत्ता कहने-सुनने से नहीं आती है, इसके लिए स्वयं को आगे बढ़कर पहल करनी होगी। किसी और की प्रतीक्षा करने के पहले हर एक शिक्षित वर्ग को लोभ-लालच के व्यामोह को छोड़कर पूर्ण ईमानदारी और कर्तव्यनिष्ठा से गुणवत्ता निष्पादन के लिए तैयार रहना होगा। जबतक शिक्षा को पैसे या व्यवसाय की दृष्टि से देखा जायेगा , तब तक गुणवत्ता की बात तो दूर , इसके लिए अपेक्षित वातावरण भी नहीं बन पायेगा।

गुणवत्तायुक्त शिक्षा की आवश्यकता- प्राचीन भारतीय विद्वान मानते थे कि समुचित नैतिक भावना और चरित्र के अभाव में मात्र बौद्धिक उपलब्धियों का कोई महत्व नहीं है। उनकी दृष्टि में सबसे अधिक महत्वपूर्ण चीज है- सदाचार, अर्थात् आचार ही उनके लिए परमधर्म था-

'आचारः परमो धर्मः श्रुत्युक्तः स्मृति एव च। मनुस्मृति में कहा गया है कि यदि कोई व्यक्ति कम ज्ञानवान हो पर सदाचारी हो तो वह उस व्यक्ति की अपेक्षा अधिक श्रेष्ठ है जो विद्वान तो है पर दुराचारी है-

सावित्रीमात्रसारोऽपि वरं विप्रः सुयंत्रितः।<br>
नायंत्रितस्त्रिवेदोऽपि सर्वांशी सर्वविक्रयः।।

वस्तुतः शिक्षा छात्रों के भावी जीवन की समस्याओं के बुद्धिमत्तापूर्ण विश्लेषण व निर्णय करने का प्रशिक्षण नहीं दे पाती तो यह अपने एक महत्वपूर्ण उद्देश्य का तिरस्कार कर रही है। प्राचीन भारतीय संस्कृति में मूल्यों को प्रमुखतः चार पुरुषार्थ के रूप में लिया गया है , ये चार पुरुषार्थ हैं- धर्म , अर्थ, काम और मोक्ष। सामाजिक संदर्भ की दृष्टि से धर्म अत्यन्त व्यावहारिक एवं प्रमुख मूल्य है। बौद्ध धर्म में अष्टांग मार्ग द्वारा नैतिक मूल्यों का संपोषण किया गया है। जैनधर्म द्वारा अहिंसा , किसी को कष्ट न पहुंचाना , जियो व जीने दो , शान्ति, बन्धुत्व, सदाचार, शाकाहार इत्यादि को प्रमुख मूल्य

माना गया है। ईसाई धर्म ने भी सत्य, अहिंसा, भाईचारा, दूसरों की गलतियों को क्षमा करना, परहित आदि मूल्यों का अवलम्बन करके सामाजिक शान्ति की स्थाना की परिकल्पना पेश की है।
वस्तुतः शिक्षा के केन्द्र में नैतिक एवं सामाजिक मूल्यों का विकास होना चाहिए था , परन्तु वर्तमान परिस्थितियों में ऐसा दिखाई नहीं देता। गुरुदेव रवीन्द्रनाथ टैगोर ने कहा- अब तक हम पिंजरे की सजावट में लगे रहे, परन्तु भीतर का पक्षी भूखा ही रहा , यह बात इतने वर्ष बाद आज भी सत्य है। डॅ. जाकिर हुसैन का भी मत है- हमें प्राविधिक के लिए नैतिकता का बलिदान नहीं कर देना चाहिए, अपितु प्राविधिक को इस भाव तथा पर्यावरण में प्रस्तुत करना चाहिए ताकि वह उच्च मानव मूल्यों को शक्तिशाली व मजबूत करने का साधन बन जाये। नैतिक मूल्यों की गिरावट नागरिक बोध के ह्रास, समाज में बढ़ते अपराध और घटती मर्यादाओं को ध्यान में रखकर ही सम्भवतः किसी शायर ने कहा है-

सभी कुछ हो रहा है इस तरक्की के जमाने में।
मगर ये क्या गजब है आदमी इंसां नहीं होता।।

इस सम्बन्ध महान् वैज्ञानिक आइन्सटीन के विचार थे- '' मेरे मत से विद्यालय के लिए वह सबसे दुखदायी समय होता है जब उसे भय , त्रास और कृत्रिम प्रभुत्व का आश्रय लेना पड़ता हो। इस प्रकार के व्यवहार से विद्यार्थियों के कोमल मन को ठेस पहुंचती है , उनकी भावनाएं और आत्मविश्वास नष्ट हो जाता है........मनुष्य को विशेषज्ञता प्रदान करना ही पर्याप्त नहीं है यह उसे एक प्रकार की उपयोगी मशीन मात्र तो बना सकती है, परन्तु एक सन्तुलित समन्वित विकसित व्यक्तित्व नहीं दे पाती , जीवनमूल्यों को जानना और उनके लिए एक जीवन्त भाव प्रवणता को पालना विद्यार्थियों के लिए अत्यन्त आवश्यक है। उसे सौन्दर्य की व्यापकता और नैतिकता का आधार ग्रहण करना चाहिए। अन्यथा उसका विशिष्ट ज्ञान उसे संतुलित व्यक्तित्व प्रदान करने के स्थान पर एक प्रशिक्षित जानवर के समकक्ष रख देगा।''
इस सम्बन्ध में राष्ट्रीय शिक्षा आयोग (1964-66) ने माना है- विद्यालयी पाठ्यक्रम का एक गम्भीर दोष है- सामाजिक, नैतिक और आध्यात्मिक मूल्य शिक्षा की अनुपस्थिति। यदि हम अपनी शिक्षा संस्थाओं से नैतिक शिक्षा व आध्यात्मिक प्रशिक्षण को निकाल देंगे तो हम अपने सम्पूर्ण ऐतिहासिक विकास के विरूद्ध कार्य करेंगे।

गुणवत्ता उन्नयन के उपाय- आज शिक्षा का प्रभाव नहीं हो रहा है , क्योंकि उसकी प्रक्रिया पूरी नहीं हो रही है। शिक्षा की पूरी प्रक्रिया है- ग्रहण करो फिर उसका आसेवन करो , जीवन में उतारो। जानो और प्रयोग करो। आज यह आसेवन की बात छूट सी गई। अतः शिक्षा में उन्नयन को हम भूल गये। एतदर्थ आज पुनः चित्तनिरोध की आवश्यकता हो गई है। इसके दो उपाय हैं- अभ्यास और वैराग्य। शिक्षा का यथार्थवादिता के दृष्टिकोण से देखने का प्रयास किया जायेगा तो मैं समझता हूं कि शायद वह शिक्षा गुणवत्तापूर्ण हो , भारतीय परम्परा में जानना सिर्फ जानने के लिए नहीं , ज्ञान सिर्फ ज्ञान के लिए बल्कि जीवन के लिए है। शास्त्रों में ज्ञान का फल प्रत्याख्यान बतलाया है। अच्छी और बुरी , हेय और उपादेय , त्याज्य और ग्राह्य को ग्रहण करो , यह है सच्चा ज्ञान और सच्चा फल। ज्ञान के साथ संयम का अभ्यास भी होना चाहिए , इससे सदाचारिता सम्वर्द्धन होता है। इस सन्दर्भ में आचार्य महाप्रज्ञ का कथन है- मैं चाहता हूं कि विद्यार्थियों के जीवन में धर्म का संचार हो।

विश्व में तेजी से आ रहे सामाजिक आर्थिक एवं वैज्ञानिक परिवर्तन एवं बढ़ती हुई जनसंख्या के परिप्रेक्ष्य में ही शिक्षा को परिवर्तित एवं संशोधित करना होगा। अतः ऐसे परिवेश में हमारे पाठ्यक्रम को समाजवादी लक्ष्य रखने हैं। शिक्षा वह है जो जीवन में चरितार्थ होती है। पाठ्यक्रम को ऐसा होना चाहिए कि वह केवल आज की स्थिति का सामना करना ही नहीं सिखाए , बल्कि यह भी सिखा दे कि बदलती स्थिति में कैसे वे अपने पैर जमाए रखें और किसी भी धारा में बह न जाएं। हमारे अधिकांश पाठ्यक्रम अपरीक्षित और अस्पष्ट हैं और इस अवधारणा पर आधारित है कि भविष्य भी वर्तमान की भांति ही होगा। विद्यार्थियों को अपना मूल्य प्रक्रम कायम करना है , अन्यथा जटिल विकल्पों से तारतम्य न बिठाने पर उनका व्यक्तित्व अपंग हो उठेगा। भविष्य का समाज वस्तुतः योग्यतापरक होगा। जिसमें सामाजिक गतिशीलता उन्नति और प्रतिष्ठा का निर्धारण शिक्षा और योग्यता के आधार पर होगा। कोठारी आयोग के अनुसार शिक्षा के त्रिपाश्र्वीय लक्ष्य हैं- ज्ञान देना, विभिन्न कौशलों का विकास तथा समुचित अभिरुचियों , प्रवृत्तियों तथा मूल्यों का अभिस्थापन।

उपर्युक्त सभी के विकास के लिए जीवन विज्ञान की शिक्षा जरूरी है और जीवन विज्ञान की शिक्षा के द्वारा हमें मानसिक दोषों को समझना है। उनकी प्रतिक्रियाओं और परिणामों को जानना है। उन्हें जानकर ही हम मानसिक स्वास्थ्य का जीवन जी सकते हैं। इस विद्या की ओर हमारा ध्यान नहीं है ,

क्योंकि लौकिक शिक्षा के द्वारा एक दृष्टिकोण बन गया है कि समस्या पदार्थ जगत् से पैदा होती है। समस्या का समाधान भी पदार्थ जगत् से ढूंढना होगा। पदार्थ जगत की सीमा को छोड़कर हम न समस्या पर विचार करते हैं और न समाधान पर। समस्या और समाधान का स्रोत है- पदार्थ का जगत्।चेतना के जगत् से तो जैसे नाता ही नहीं है। न समस्या के बारे में हम चेतना पर विचार करते हैं और न समाधान के लिए वहां खोज करते हैं।

जीवन विज्ञान शिक्षा का महत्वपूर्ण अंग है। विश्वविद्यालयों में हायर स्टडीज के प्रयोग चलते हैं , उच्चतम अध्ययन की सुविधाएं मिलती हैं , किन्तु उच्चतम अध्ययन उन्हीं शाखाओं का , जो शाखाएं हमें बाहर की ओर ले जाती है , दृष्टि को बाहर ही अटका देती है। यह शिक्षा को सर्वांगीण बनाने का उपाय है। आज की शिक्षा से बुद्धि तेज होती है , पर बेचारी बुद्धि क्या करेगी ? जितनी बुराइयां और विकृतियां हैं , वे सब मन की चंचलता से उत्पन्न होती है। उसकी उत्पत्ति में बुद्धि का कोई हाथ नहीं है। मन को शिक्षित किये बिना इन विकारों से छुटकारा नहीं पाया जा सकता है। आज की शिक्षा में मन को प्रशिक्षित करने का कोई प्रावधान नहीं है। आज की शिक्षा में प्राण की शक्ति का कोई प्रशिक्षण नहीं है। उस पर विचार नहीं किया जाता है , जबकि शिक्षा में यथार्थ में मूल उद्देश्य है- मन का संतुलन , मन की शांति , मन का निर्विकल्प होना। इस ओर लोगों ने कभी ध्यान नहीं दिया। आज व्यक्ति पढ़-लिखकर अच्छा वैज्ञानिक बन जाता है , इंजिनियर या डॅक्टर बन जाता है, विशेषज्ञ बन जाता है , फिर भी वह लड़ाई करता है , निन्दा और ईर्ष्या में फंसा रहता है , आत्महत्या कर लेता है। ऐसा क्यों ? आज देखा जाता है कि छोटे-छोटे बच्चे जरा सी बात पर आत्महत्या कर लेते हैं , क्योंकि उनमें सहिष्णुता का अभाव है। सहिष्णुता का विकास तब होता है जब सहारे की बात नहीं सोची जाती। जो कष्ट सहते हैं , कठिनाइयां झेलते हैं वे सहिष्णुता का विकास कर लेते हैं। यह सब जीवन विज्ञान की शिक्षा के द्वारा सम्पन्न हो सकता है। यह विद्याशाखीय शिक्षा के द्वारा कभी नहीं हो सकता है।

अब प्रश्न उत्पन्न होता है कि जीवन विज्ञान क्या है ? जीवन विज्ञान की शिक्षा का तात्पर्य है- मन को शिक्षित करना , वाणी को शिक्षित करना , काया को शिक्षित करना। आज शिक्षा के साथ आचरण पर बल दिया जाना चाहिए , क्योंकि ज्ञानी की अपेक्षा चरित्रवान् अधिक आदरास्पद होता है। ज्ञानी के प्रति अंगुलियां उठ सकती हैं, किन्तु चरित्रवान् के प्रति सहजतया अंगुली नहीं उठती।

जो शिक्षाशास्त्री हैं वे भी यह कहते हैं कि शिक्षा की पद्धति समुचित नहीं है। राजनेता भी यही कहते हैं। पर वह समुचित या अच्छी क्यों नहीं है , यह कोई नहीं जानता। शिक्षा में क्या कमी है , यह कोई नहीं बता पाता। कमी को कैसे पूरा किया जाए , इसे कोई नहीं जानता। यदि वे जानते तो आज तक ठीक हो जाती। विगत पचास वर्षों में शिक्षा से संबंधित अनेक आयोग बैठे , पर आज तक कोई समाधान नहीं मिला। यह शिक्षा जगत् की महती समस्या है। इस समस्या में अध्यात्म भी जुड़ा है , ध्यान और साधना भी जुड़ी है।

शिक्षा के माध्यम से मानसिक और बौद्धिक विकास होता है , पर अनुशासन का विकास क्यों नहीं होता, इस पर किसी का ध्यान नहीं है।अनुशासन आता है बुद्धि से परे और शिक्षा रह जाती है बुद्धि की सीमा में ही। पढ़-लिखकर बुद्धि का तो विकास हो सकता है और बुद्धि का काम ही तर्क करना है। तर्क सिखाता है अपना घर भरना और दूसरे को धोखा देना। आज विचार करने की आवश्यकता है कि विश्वविद्यालयों में हम पचास प्रतिशत शिक्षा पाते हैं और पचास प्रतिशत शिक्षा हमें अध्यात्म के क्षेत्र में आत्मानुशासन की प्राप्त करनी है।

उपर्युक्त चिन्तन द्वारा एक तथ्य निश्चित रूप से उभर कर सामने आता है कि प्रत्येक विद्यार्थी युवक अपनी विश्वविद्यालयी शिक्षा में उत्तीर्ण होने के पश्चात् पीएच. डी. आदि के उपक्रम कर लेने के पश्चात् एक वर्ष का पूरा समय अपने जीवन को समझने के लिए लगाए , अपने आत्मानुशासन के विकास के लिए लगाए। यदि प्रत्येक विद्यार्थी में यह भावना बलवती हो जाए तो यह निश्चय के साथ कहा जा सकता है कि सरकार शिक्षा की जिस जटिल पहेली का समाधान नहीं कर सकती , उसको समाज अपने प्रयत्न और पुरुषार्थ से सुलझा देगा , अनुशासन की प्रतिष्ठा करेगा और यह धार्मिक जगत् का बहुत बड़ा अवदान होगा।

शिक्षा चिन्तन, मूल्य अभिप्रेत जीवन, चुनौतियों से जूझना एवं नवीन सृजन की दिशा दे सके इसी में पाठ्यक्रम की सार्थकता है , न कि परीक्षा पास करने और प्रमाणपत्र प्राप्त करने मात्र में। शिक्षा का उद्देश्य होना चाहिए-इंसानियत। इसे सभी व्यक्तियों को अपने राष्ट्रीय एवं विश्व के सर्वनिष्ठ हितों की ओर तत्पर करना है। इसे उनके मस्तिष्क को पूर्वाग्रहों से मुक्त करना है , व्यावहारिक बुद्धि की नींव रखनी है और विचार एवं क्रिया के तार्किक मानकों के विकास का समावेश करना है। यही तो है

समग्र शिक्षा के व्यापक एवं निर्देशक लक्ष्य और इन्हीं लक्ष्यों को प्राप्त करने वाली शिक्षा ही गुणवत्ता का स्तर कायम रख सकती है।

**सन्दर्भ ग्रन्थ सूची-**

1. National Knowldege Commission 2004

2. मूल्यशिक्षा और उसका शिक्षण, डा. शुद्धात्मप्रकाश जैन, एच, पी, भार्गव प्रकाशन, आगरा

3. शिक्षाः दार्शनिक परिप्रेक्ष्य, चांद किरण, दिल्ली विश्वविद्यालय हिन्दी माध्यम कार्यान्वयन समिति

4. जीवन विज्ञान की रूपरेखा, मुनि धर्मेश, जैन विश्व भारती, लाडनूं, राजस्थान

5. भारतीय आधुनिक शिक्षा, जुलाई 2003, राष्ट्रीय शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद्, दिल्ली

***

# वैदिकशिक्षायाः स्वरूपं तद्वैशिष्ट्यानि च

**डा. देवदत्त सरोदे**
सहायकाचार्यः, शिक्षाशास्त्रविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि)
क. जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई

ऋते ज्ञानान्न मुक्ति: इति शास्त्रवचनमनुशुश्रुम: तर्हि जिज्ञासा जायते कुत: मुक्ति:? दु:खेभ्य: मुक्ति:। किमिदं दु:खं नाम? खं नाम इन्द्रियं, इन्द्रियेभ्य: यन्न प्रीतिकरं, यन्न रोचते तद्दु:खम्। अस्य जगतः सर्वसमस्यानांपरिणति: तापत्रयदु:खरूपेण जायते । तापत्रयविघाताय तन्मूलं मृग्यं , नूनं तन्मूलमज्ञानम् अज्ञानं नानारूपाणि धृत्वा असंख्यकाः समस्याः इव प्रतिभाति। सर्वासां समस्यानां समाधानं तु अशक्यम् अतः मूलसमस्या परिहर्तुम् ऐहिकामुष्मिकफ़लावाप्तयेऽस्माकं वैदिकसंस्कृतौ वर्णाश्रमव्यवस्था दृश्यते। ब्रह्मचर्याश्रम :, गृहस्थाश्रम:, वानप्रस्थाश्रम:, संन्यासाश्रम: इतिचत्वार: आश्रमा: सन्ति तत्र ब्रह्मचर्याश्रमे शिक्षाया: व्यवस्था कल्पिता। अत: अस्मिन्शोधपत्रे वैदिकशिक्षाया: स्वरूपं वैशिष्ट्यानि इत्यमुं विषयमधिकृत्य विचार्यते।

शिक्षा- सा विद्या या विमुक्तये इति उक्तत्वाद् वि द्यासमुपार्जनीया। कथं सास्वायत्तीकर्त्तव्येति जिज्ञासायामुच्यते शिक्षया। शिक्षया ज्ञानाधिगमो जायते। का सा शिक्षेति जिज्ञासायाम्? उच्यते, शिक्ष्यते बोध्यते ज्ञायते अनयासा शिक्षा। प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते अत: शिक्षाया: कानि उद्देश्यानि स्यु:? इति जिज्ञासायामुच्यते-

**वैदिकशिक्षाया उद्देश्यानि** -

1. सच्चारित्र्यसद्गुणानांसम्पादनम्।
2. अभ्युदयनिश्रेयसोरवाप्तिः।
3. नैतिकमूल्यानां संवर्धनम्।
4. षडङ्गानां वेदानामन्यशास्त्राणामध्ययनम्।
5. वेदानां शास्त्राणाञ्च रक्षणम्।

6. चिन्तनशक्तेः तर्कशक्तेः संवर्धनम्।
7. धर्मपूर्णजीवनस्य कृते पूर्णव्यक्तित्वविकाससम्पादनम्।
8. परबोधायासन्निरासाय शास्त्रार्थकौशलसम्पादनम्।
9. आत्मसंयमात्मानुशासनजीवनसम्पादनम्।
10. वेदादिशास्त्रेषु पूर्णपाण्डित्यसम्पादनम्।
11. वेदशास्त्रानुकूलधार्मिकादर्शत्यागपूर्णजीवनम्।
12. सत्प्रवर्तनमर्यादानाम् उत्तमोत्तमाचाराणां शीलानाम् संरक्षणम्।
13. दैवभक्तिधार्मिकभावनानां संवर्धनम्।
14. पर्यावरणेन प्रकृत्या सह आनुकूल्येन सामञ्जस्य स्थापनम्।
15. सुसंस्कृतसभ्यमानवनिर्माणम्।

पारस्करगृह्यसूत्रे- वैदिकशिक्षाया: उद्देश्यानि निम्नोक्तरीत्याअभिवर्णितानि

**ओ३म् अग्नये समिधमाहार्षं बृहते जातवेदसे। यथा त्वमग्ने समिधासमिध्य स एवमहमायुषा, मेधया, वर्चसा, पशुभिर्ब्रह्मवर्चसेन समिन्धे, जीवपुत्रो मम आचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्व्यन्नादोभूयासं स्वाहा।**[1]

समित्पाणि: सन्कश्चिद्ब्रह्मचारी अग्निमुद्दिश्य एवमाह अहम् अग्नये बृहते जातवेदसे समिधम् आहार्षम् (आनैषम्,) हे अग्ने यथात्वम्समिधा (समिध्द्वारा) दीप्यसे तथा अहम् आयुषा बुद्ध्या वर्चसा (तेजसा), पशुभि:, ब्रह्मवर्चसेन दीप्तो भवामि। आचार्यो मम जीवपुत्र: स्यात्, अहम्मेधावी भवेयम्, सद्वर्तनशीलानाम् अनिराकरिष्णु:, यशस्वी, तेजस्वी, ब्रह्मवर्चस्वी, अन्नादो भूयासम् इति

**आधत्त पितरो गर्भं कुमारं पुष्करस्रजम्। यथेह पुरुषोऽसत्।**।[2]

पितरौ आचार्यमुपगम्य एवं निवेदयत: .... आचार्य ! कमलमालाबिभ्राणम् अस्मदीयं तनयम् आत्मनि गर्भे धारय, येनायं मनुष्यो भवेत् ।

वेदानामुपनिषदामनुशीलनेनतत्र उन्नता काचित् शिक्षापरम्परा शिक्षास्वरूपञ्चविलोक्यते। विद्या कथम् अधिगता भवति ?अथवा ज्ञानप्रदानाय शिक्षाव्यवस्था कथंभूता स्यात् ? सा च तैतिरीयोपनिषदि शिक्षाध्याये पञ्चमहासंहितासु अन्यतमायां संहितायां वर्णिता।

**अथाधिविद्यम्** -

**आचार्यः पूर्वरूपम् अन्तेवास्युत्तररूपं विद्यासन्धिः प्रवचनं संधानम्। इत्यधिविद्यम्।**
3

अस्यां संहितायां शिक्षायाः कात्स्न्र्यम् अथवा विद्यायाः प्राप्तिः , आचार्यः अन्तेवासी , विद्या, प्रवचनम् एभिः चतुर्भिः घटकैः भवति इति वर्णितम्। यथा - संहितायां वर्णानां सामीप्यं भवति तद्वद् एतेषां चतुर्णां घटकानां नैकट्यात् शिक्षा पूर्णा भवति। लोके शिक्षायामेते घटकाः अनिवार्याः सन्ति। इममेव विषयं भागवत्पुराणे एवं वर्णितम् .....

आचार्योऽरणिराद्य: स्यादन्तेवास्युत्तरारणि:।
यत्संन्धानंप्रवचनंविद्यासन्धि: सुखावह:॥[4] –

अथ कोऽयमाचार्य इति जिज्ञासायां मनुस्मृतौ आचार्यस्य लक्षणमेवमाह

उपनीयतुय: शिष्यम्वेदमध्यापयेद्द्विज: |
सङ्कल्पंसरहस्यंचतमाचार्यंविदुबुधा ||[5]

आचार्यः ज्ञानवान् सन् ज्ञानप्रदानाय एकतः भवति तर्हि जिज्ञासुः अन्तेवासी ज्ञानावाप्तये अपरतः भवति। एतयोः संयोगः विद्यानिमितमेव भवति। अपि च अध्यापनपटुः आचार्यः ज्ञानस्य संप्रेषणं प्रवचनमाध्यमेन करोति। तदानीं विद्याप्राप्तिर्भवति।

निरुक्ते तु आचार्यमेवं वर्णयामास निरुक्तकार; यास्क:

**आचार्यः कस्माद् ? आचारं ग्राहयति, आचिनोति अर्थम्, आचिनोति बुद्धिमिति वा।** [6]

**आचार्यः आचारं ग्राहयति** ...

आचार्यः सदाचारी , धार्मिकः, नैतिकः, तपस्वी सन् आत्मनः अन्तेवासिनः आचारं ग्राहयति।

आचार्यः आचिनोति अर्थम् –

आचार्यः बहुश्रुतः स्यात्। आचार्यः समुपयुक्तशब्दैः अर्थान् नानापदार्थान् विषयान् बोधयति। शब्दैः एव अर्थज्ञानं भवति । शब्दैरेव नानाविद्याः विज्ञानं कलाः शिल्पं ज्ञायन्ते। बहुश्रुतः आचार्यः अनेकाः विद्याः शिल्पानि च शिक्षयति। अयमेव विषय: ऐतरेयारण्यके लिङ्गपुराणे एवं वर्णितम्

आचिनोतिचशास्त्रार्थमाचारेस्थापयत्यपि

स्वयमाचरतेयस्मादाचायस्तेनकीर्त्यते - ऐ. आरण्यक

आचिनोतिशास्त्रार्थान्यमैः सनियमैर्युतः।लिङ्गपु.

आचार्यः आचिनोति बुद्धिम् -

आचार्यः अन्तेवासिनि अन्तर्निहिताः सुप्ताः शक्तीः, जागरयति। बुद्धेः विकासं करोति, मानसिकशक्तिं वर्धयति बुद्धिं सर्जनकार्येषु विद्यासु च नियोजयति। सन्मार्गे प्रेरयति। अनेन अन्तेवासिनः बौद्धिकः मानसिकः अन्तःसुप्तशक्तीनाम् विकासः सम्पद्यते।

आचार्योमृत्युर्वरुणःसोमओषधयः पयः।जीमूताआसन्त्सत्वानस्तैरिदंस्वराभृतम्।।[7]

वेदेषुचआचार्यः यमः(मृत्युः) इति वर्णितः, यथा मृत्योः सकाशे अङ्कारः गलितः नष्टो भवति तद्वद् आचार्योऽपि मृत्युः सदृश : अस्माकमहङ्कारं विनाशयति सत्यं तत्वं बोधयति। आचार्यस्य सविधे स्वीयमहङ्कारं परित्यज्य निष्कल्मषतया विनयेन ज्ञानार्जनं कर्तव्यम्। यतः उपनिषदि समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरूमुपगच्छेत्[8] इति निर्देशः। गुरुः श्रोत्रियः स्यात्। श्रोत्रियः इत्यस्य वेदविद् इत्यर्थः तथा च श्रोत्रियश्च्छन्दोऽधीते[9] वेदस्यज्ञाता गुरूर्भवेत्किञ्च गुरूःब्रह्मनिष्ठः ब्रह्मज्ञानी भवेत् अर्थात् पराविद्या, अपराविद्या, इत्यनयोः कोविदः स्यात्। अन्तेवासिनि पराविद्यया आध्यात्मिकविकासं अपिच अपराविद्यया लौकिकविद्यासु कलासु च विकासं सम्पादयति। अनया अन्तेवासिनः सर्वाङ्गीणविकासः सम्पद्यते।

अन्तेवासी –

अन्ते वस्तुं शीलमस्य। यः आचार्यस्य सन्निकटे सेवां शुश्रूषां कुर्वन् विद्यामधिगच्छति। स च अन्तेवासी कथं भवेत्? अधिकारी स्यात्। अपात्राय यदि ज्ञानं दीयते चेत् तद् अहितायैव भवति न तु कल्याणाय। अतः अयं जनः अस्याः विद्यायाः अधिकारी विद्यते न वेति परीक्ष्य ज्ञानं प्रयच्छति आचार्य।

निरुक्ते कस्मै अन्तेवासिने विद्या देया ? इमं विषयं स्पष्टीकुर्वन् निरुक्तकारः प्राचीनमुद्धरणमदात् ....

विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि ।

असूयकायानृजवेऽयताय न मा ब्रूया वीर्यवती यथा याम्।।[10] इति

अलसाय, कुटिलजनाय, असूयकाय विद्या न देया इत्यर्थः

ब्रह्मचारी - अन्तेवासी ब्रह्मचारी स्यात्। ब्रह्मणि चरति इति ब्रह्मचारी । ब्रह्म नाम वेदः। ब्रह्मनाम परमतत्वम्। इन्द्रियाणि मनः बुद्धिं संयम्य अन्तर्निहितं। शक्तिं वेदाध्ययने अथवा परब्रह्मान्वेषणे निदधाति। विषयविकाररहितं पवित्रं जीवनं यस्य भवति स ब्रह्मचारी।

जिज्ञासुः – अन्तेवासी जिज्ञासुर्भवेत्। ज्ञानं परमतत्त्वं ज्ञातुं यस्य इच्छा भवति स जिज्ञासुः। परमार्थतः जिज्ञासामन्तरेण लौकिकं ज्ञानमपि सम्यक् प्राप्तुं न शक्यम् तर्हि अध्यात्मसूक्ष्मज्ञानस्य का कथा अत एव वेदान्तदर्शनेऽपि प्रथमसूत्रे अथातो ब्रह्मजिज्ञासा [11] जिज्ञासा पदप्रयोगो विद्यते अनेन ज्ञायते अन्तेवासिनः स्वीया जिज्ञासा यदि तीव्रा न भवति स्वयमेव स ज्ञातुं तत्परो न भवति तर्हि तस्मिन् ज्ञानं वा तत्वज्ञानं फलितं न भवति।

श्रद्धावान् – अन्तेवासी श्रद्धावान् स्यात्। श्रद्धामन्तरेण ज्ञानप्राप्तिर्दुष्करा। तथा च गीता

श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।
ज्ञानंलब्ध्वापरांशान्तिमचिरेणाधिगच्छति।।[12]

अन्तेवासी श्रद्धावान् ,तत्परः, संयतेन्द्रियः भवेत्। एतादृशः एव जनः ज्ञानार्जनं कर्तुमर्हति।

प्रशान्तचित्तः –अन्तेवासी शमान्वितः प्रशान्तचितः स्यात्। स एव ब्रह्मविद्यायाः अधिकारी भवति। तथाच

तस्मै स विद्वानुपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय येनाक्षरं पुरूषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्।[13]

विद्या -वैदिकशिक्षायां लौकिकपारलौकिकविद्यानां उत्कर्षः प्रतिभाति। पराविद्या अपराविद्येति द्वे विद्ये आस्ताम् तथाच मुण्डकोपनिषद् .- तस्मैहोवाच द्वे विद्ये वेदितव्ये इति हस्म ब्रह्मविदो वदन्ति। पराचैवापरा च[14]

तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षाए कल्पो व्याकरणं निरूक्तम् छन्दो ज्यौतिषमिति। अथ परा यया तदक्षरमधिगम्यते।

छन्दोग्योपनिषदि सप्तमप्रपाठके अपराविद्यायाः विस्तरशः वर्णनमुपलभ्यते। सनत्कुमारमुपगम्य नारदः एवमुवाच - ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां , नक्षत्रविद्यां सर्पदेवजन विद्यामेतद् भगवोऽध्येमि सोऽहं भगवो मन्त्रविदेवास्मि नात्मविद्।[15]

१.ऋग्वेदः, २. यजुर्वेदः, ३.सामवेदः, ४. अथर्ववेदः, ५.इतिहासपुराणम् ६. पित्र्यम् , शुश्रुषाविज्ञानम् , ७. राशि -गणितम् ८. दैवम् –उत्पातविज्ञानम् , ९. निधिम् -अर्थशास्त्रम्,१०. देवविद्याम् –निरुक्तम्, ११. ब्रह्मविद्या -दर्शनशास्त्रम् शास्त्रीयज्ञानम् , १२. भूतविद्या –भौतिकी, रसायनम् , प्राणिशास्त्रम् , १३. क्षत्रविद्याम् -धनुर्वेदः सैनिकशिक्षा , १४. नक्षत्रविद्या – ज्यौतिषम् , १५. सर्पदेवजनविद्या - सर्पविषचिकित्सा ललितकला : एताः विद्याः अधिगताः अहं मन्त्रविदस्मि न आत्मविद् आत्मज्ञानंमदीयं नास्ति इत्यर्थः।

अध्यापनशैली –

वसोष्पतेनिरमयमय्येवास्तुमयिश्रुतम्।[16]

हे आचार्य! तथा रोचिष्णुशैल्या बोधय येन यत्किञ्चित् शास्त्रमधीतं तन्मयि ( मम) बुद्धौ स्थिरं तिष्ठेत् ।

संश्रुतेनगमेमहिमाश्रुतेनविराधिषि।[17]

यत्किञ्चित् शास्त्रं वयं पठेम तदनुचरेम, तद् विरुध्य न वर्तामहे

इहैवाभिवितनुभेआर्त्नीइवज्यया।वाचस्पतिर्नियच्छतुमय्येवास्तुमयिश्रुतम्।।[18]

हे वाचस्पते यदधीतं शास्त्रं तत्सदा स्मृतौ तिष्ठेत् अर्थात् शिक्षणं रुचिरं प्रभावपूर्णं चिरस्मरणीयं भवेत्

प्रवचनम् –

आचार्यः प्रवचनमाध्यमेन ज्ञानम् अन्तेवासिन उपदिशति। प्रवचने शिक्षणपद्धतयः , शिक्षणव्यूहाः , शिक्षणयुक्तयः शिक्षणसूत्राणि शिक्षणकौशलानि , एतानि सर्वाणि अन्तर्भवन्ति। वेदेषुउपनिषत्सु अनेकाः शिक्षणपद्धतयः दृश्यन्ते। तद् यथा –

प्रत्यक्षपद्धतिः -शिक्षणपद्धतिषु एषा अतीव प्रभावदायिनी मनोवैज्ञानिकी , विशिष्टापद्धतिः विद्यते। अत्र प्रत्यक्षप्रदर्शनपुरस्सरं प्रयोगपुरस्सरं बोधयति आचार्यः। उपनिषत्सु प्रत्यक्षपद्धतेः नेकाः सन्दर्भाः सन्ति। तद्यथा -

न्यग्रोधफलमाहरेतीदं भगव इति। भिन्धीति।

भिन्नं भगव इति। किमत्रपश्यसि इत्यण्व्य इवेमा धाना इति

आसाम् अङ्गैकां भिन्धीति

भिन्ना भगव इति। किमत्रपश्यसीति।

न किञ्चन भगव इति।[19]

अत्र प्रत्यक्षपद्धत्या शिक्षणं विहितं किञ्च स्थूलात् सूक्ष्मं ,सरलात् कठिनं , ज्ञाताद् अज्ञातं इत्यादीनि शिक्षणसूत्राणि प्रयुक्तानि सन्ति।

क्रियामुखादधिगमः -क्रियया अधिगमः यस्यां पद्धत्यां भवति अथवा क्रियया छात्रः अधिगच्छति सा पद्धतिः क्रियामुखादधिगमपद्धतिः वर्तते। उपनिषदि क्रियामुखात् अधिगमः दर्शितः। तद् यथा -

लवणमेतदुदकेऽवधायाथ मा प्रातरूपसीदथा इति। स ह तथा चकार। तं होवाच यद् दोषा लवण मुदकेऽवाधा अङ्ग तदाहर इति। तद् धावमृश्य न विवेद।

यथा विलीन मेवाङ्गास्यान्तादाचामेति। कथमितिलवणमिति। मध्यादाचामेति। कथमितिलवणमिति। अन्तादाचामेति। कथमिति लवणमिति। अभिप्राश्य एनद् अथ मोपसीदथा[20]।

प्रश्नोत्तरपद्धतिः -प्रश्नोत्तरपद्धतौ प्रश्नोत्तरमाध्यमेन अध्यापनं भवति उपनिषत्सु बहुत्र एषा पद्धतिः प्रयुक्ता।

प्रश्नोपनिषदि साक्षात् प्रश्नोत्तरपद्धत्या सूक्ष्मतत्त्वस्य शिक्षणं विद्यते।

व्याख्यापद्धतिः -व्याख्यानपद्धतेः प्रयोगः उपनिषदि बहुत्र विद्यते विषयस्य विस्तरशः स्पष्टीकरणमनया पद्धत्या विधीयते तथाच

ओम् इत्येतद् अक्षरमुदगीथमुपासीत ओमिति ह्युद् गायति तस्योपव्याख्यानम्। अत्र उपव्याख्यानं पदेनैव ज्ञायते इह व्याख्याविधिः प्रयुक्तः। यथा

एषां भूतानां पृथिवीरसः। पृथिव्याः आपो रसोऽपामोषधयो रस ओषधीनां पुरूषो रसःए पुरूषस्य वागरसो वाच ऋग् रस ऋचः साम रसः साम्न उदगीथो रसः[21]

वादविवादविधिः, शास्त्रार्थपद्धतिः - वादे वादे जायते तत्त्वबोधः इति वचनं श्रूयते तत्त्वनिर्णयाय संवादः, वादः, वादविवादः, शास्त्रार्थः अपेक्षितः।

केनापि किमपिकथितमिति न प्रमाणम् अपितु तत् हेतुप्रदानपुरस्सरं प्रमाणीकर्तव्यम् , सैव शास्त्रार्थपद्धतिः। उपनिषत्सु शास्त्रार्थपद्धतेः बहूनि प्रमाणानि सन्ति। तद्यथा -

जनकस्य् सभायां याज्ञवल्यउषस्तचाक्रायणयोः शास्त्रार्थः। तद् यथा

अथ हैहनमुषस्तश्चाक्रायणः पप्रच्छ याज्ञवल्क्येति होवाच यत्साक्षात् अपरोक्षाद् ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्व इत्येष त आत्मा सर्वान्तरः कतमो याज्ञवल्क्य सर्वान्तरो यः प्राणेन प्राणिति स त आत्मा सर्वान्तरो योऽपानेनापानिति ........

स होवाचोषस्तश्चाक्रायणो यथा विब्रूयादसौ गौरसावश्वश्च इत्येवमेवैतद व्यपदिष्टं भवति। यदेव साक्षाद् अपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेत्येव त आत्मा सर्वान्तरः कतमो याज्ञवल्क्य सर्वान्तरः। न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारं शृणुया न मतेर्मन्तारं मन्वीथा न विज्ञातेरू विज्ञातारं विजानीयाः। एष त आत्मा सर्वान्तरोऽतोऽन्यदार्तं ततो होषस्थचाक्रायण उपरराम [22]। एवमेव याज्ञवल्क्यकोहलयोः शास्त्रार्थः, विद्यते। यत्र शास्त्रार्थविधिः स्पष्टतया परिलक्ष्यते।

विद्याधिगमाय सोपानानि –

श्रवणम्, मननम् , निदिध्यासनम् , साक्षात्कारः एभिः उपायैः परमार्थतः विद्याधिगमो भवति , तत्वबोधो जायते। तथा च

आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।

श्रवणम् . श्रोतव्यःमननम् . मन्तव्यःनिदिध्यासनम् . निदिध्यासितव्यःसाक्षात्कारः - द्रष्टव्यः

अनेन प्रमाणेन ज्ञायते यत् उपनिषदि अधिगमः बोधः इत्यस्य ताह्त्पर्यं केवलं विषयपरिचयः तद् विषयकं ज्ञानं वा नास्तिअपितु अनुभूतिः प्रधाना विद्यते। तदानीमेव ज्ञानप्राप्तेः कृत्स्नता भवति।

अन्तेवासी कथं वर्तेत–

अनुशासनम् –

आचार्यः अन्तेवासी अनुशासने भवतः उभौ तपश्चरतः उभौ ब्रह्मचर्यं चरतः। कठोरव्रतानिधृत्वा जीवनं पावयतः। तैतिरीयोपनिषदि शिक्षाध्याये शिक्षान्ते दीक्षान्तोपदेशः अनुशासनरूपेण प्रदीयते। तद्यथा -

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यंवद। धर्मचरं। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियंधनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवोभव पितृदेवोभव आचार्य देवोभव अतिथिदेवोभव। यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि ........... एष आदेशः एष उपदेशः। एषा वेदोपनिषद्।

शिक्षायांतप: -

तमहं ब्रह्मणा तपसा श्रमेणानयैनं मेखलया सिनामि ।[23]

आचार्य: उपनयमानो ब्रह्मचारिणं तपस:, श्रमस्य, ब्रह्मचर्यस्य च प्रतिकभूतां मेखलां बध्नाति

सा नो मेखलेमतिमाधेहिमेधामथोनोधेहितप इन्द्रियं च।[24]

इयं सा मेखला ब्रह्मचारिणि मतिं, मेधां, तप:, इन्द्रियशक्तिमादधातु इति।

अग्नेतपस्तप्यामहेउपतप्यामहेतप:।श्रुतानिशृण्वन्तोवयमायुष्मन्त: सुमेधस:॥[25]

हे अग्ने वयं ब्रह्मचर्याश्रमे तपश्चराम:, वेदशास्त्राणि शृण्वन्त: आयुष्मन्त: मेधाविन: स्याम्।

इयं समित्पृथिवीद्यौर्द्वितीयोतान्तरिक्षं समिधा पृणाति।[26]

ब्रह्मचारिण: ज्ञानाग्नौ पृथिवी द्यौरन्तरिक्षं च समित् जायते, अर्थात् एते त्रय: विषया: अस्य अध्ययने भवन्ति , इति आलङ्कारिकरीत्या वर्णितम् ।

अथर्ववेदे तु एकविंशते: विद्यानां साङ्केतिकोल्लेख: उपलभ्यते। तद्यथा

ये त्रिषप्ता: परियन्ति विश्वारूपाणि बिभ्रत:। वाचस्पतिर्बलां तेषां तन्वो अद्य दधातु मे ॥[27]अपि च प्रश्नोपनिषदि पिप्पलादः प्रोवाच तपसा , ब्रह्मचर्येण , विद्यया , श्रद्धया च संवत्सरं संवत्स्यथ [28]इति ।

तप:, ब्रह्मचर्यम् , विद्या, श्रध्दा इति एतानि तत्वानि ब्रह्मविद्याधिगमाय अत्यन्तं मूलभूतानि सन्ति।

- तपः अन्तरेण लौकिकं वा पारलौकिकं वा ज्ञानं वा नहि किञ्चन प्राप्यते। अतः तपश्चरणीयम्।
- ब्रह्मचर्यम् - विषयेभ्यः पृथग् भूय ब्रह्मणि ज्ञाने वा यदा संपृक्तः भवति जनः तदानीं यथार्थबोधो जायते। ब्रह्मचर्यम् इन्द्रियमनोनिग्रहः इन्द्रियाणां मनसः संयमनम्।
- श्रध्दा - श्रद्धावान लभते ज्ञानम्। अश्रद्धो जनः किमपि साधयितुमर्जयितुं वा नार्हति। अश्रद्धयैव जीवने स्थैर्यं न भवति। अश्रद्धो सर्वथा संशयग्रस्तोभवति ।संशयात्मा विनश्यति[29]। अतः उपनिषदि बहुत्र श्रद्धस्व सौम्य श्रद्धस्व[30] इति उपदेशो दृश्यते।

आचार्यान्तेवासिनो: सम्बन्धः पितापुत्रवत् वर्तते तथा च श्रूयते पुत्रीयति आचार्यः शिष्यम् पुत्रम् इव आचरति इत्यर्थः । आचार्यः अन्तेवासिनः सर्वविधकल्याणाय यतते।

आचार्यउपनयमानोब्रह्मचारिणंकृणुतेगर्भमन्त:।

तंरात्रीस्तिस्रउदरेबिभर्तितंजातंद्रष्टुमभिसंयन्तिदेवा:॥[31]

आचार्य: यथा माता गर्भे आत्मन: शिशुं बिभर्ति: तद्वद् उपनयमानो आचार्य: ब्रह्मचारिणं ज्ञानगर्भे तिस्र: रात्री:बिभर्ति ज्ञानम्,कर्म, उपासना इति वेदत्रयीविषयकमज्ञानान्धकारं दूरीकृत्य ज्ञानकर्मोपासना: बोधयति तदा तं ज्ञानसम्पन्नं ब्रह्मचारिणं द्रष्टुं विद्वांस: देवा: आयान्ति इत्यर्थ: । अपि च उपनयमानो आचार्य: ब्रह्मचारिण: हृदयस्थाने स्वीयं हस्तं निधाय एवं ब्रूते

ममव्रतेतेहृदयंदधामिमच्चित्तमनुचित्तंतेअस्तु।

ममवाचमेकमनाजुषस्वप्रजापतिष्ट्वानियुनक्तुमह्यम॥ [32]

हे ब्रह्मचारिन् वरुणरूपसन् मम व्रते अध्ययनतपोव्रते तव हृदयं दधामि त्वदीयं मन: मदनुकूलं भवेत् , त्वं मम वाणीं श्रद्धया दत्तमना सेवस्व, प्रजापति मदर्थं त्वां नियुनक्तु इति ।

पुनरेहिवाचस्पतेदेवेनमनसासह ।[33]

हे वाचस्पते ! दिव्यगुणयुतचेतसा पुन: आयाहि

लक्ष्यम् –

वैदिक शिक्षायाः लक्ष्यं आत्मानुभूतिः तथा च

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमस: परस्तात्। तमेव विदित्वातिमृत्युमेति नान्य: पन्था विद्यते अयनाय ॥[34]

अहं तमस: परस्तात् महान्तम् आदित्यवर्णं पुरुषं वेद ( ज्ञातवान्)। तं पुरुषं ज्ञात्वैव कोपि मृत्युमतिक्रामते संसारसागरतरणाय अन्य: उपाय: न विद्यते ।

सा विद्या या विमुक्तये ।[35]

यथार्था विद्या सैव या मोक्षाय कल्पते ।अर्थात् मोक्षप्राप्तिरेव विद्याया: परमप्रयोजनम् ।

प्रणवो धनुः शरोह्यात्मा ब्रह्मतल्लक्ष्यमुच्यते[36]।

स यो ह वै तत्परमं ब्रह्मवेद ब्रह्मैव भवति। नास्याब्रह्मवित्कुले भवति। तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति[37]।

भिद्यते हृदयग्रन्थि छिद्यन्ते सर्वसंशयाः।क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे [38]॥

इत्यादीनि शास्त्रवचनानि वैदिकशिक्षाया: प्रधानं लक्ष्यं सूचयन्ति।

वैदिकशिक्षापद्धतेः गुणाः-

1. अस्यां पद्धत्यां मौखिकाभ्यासकार्यमधिकमस्ति। तस्मात् शास्त्रं जिह्वाग्रे भवति। छात्राश्च सक्रियाः भवन्ति।

2. आचारवान् आचार्यः स्वयं तीक्ष्णानि व्रतानि धारयन् कठोरं नियमानुशासनं पालयन् छात्रान् अनुशास्ति। तस्माद् न केवलं शास्त्रे प्रावीण्यं भवति,किन्तुआदर्शव्यक्तित्वनिर्माणमपि भवति।

3. अत्र प्रकृत्या सह सामञ्जस्यं संस्थाप्य प्रकृत्यनुकूलजीवनयापनाय शिक्षणंभवति। तस्मात् पर्यावरणं प्रतिचैतन्यं, संरक्षणभावना उत्पद्यते।

4. याः साम्प्रतं नवीनशिक्षणपद्धतयः इत्युच्यन्ते। ताः पुराऽपि प्रचलन्त्यः आसन्।

5. संस्कृतिः संस्कृतमनया संरक्षिते भवतः। अनयैव संस्कृतज्ञानविज्ञाः विशेषज्ञाः ,धुरन्धरविद्वांसः, संस्कृतिसंरक्षकाः उत्पद्यन्ते।

6. अनया एका अजस्रं प्राचीनशिक्षणपरम्परा रक्षिता वर्तते।

7. इह धार्मिकमाध्यात्मिकं वातावरणं स्वतः प्रसृतं भवति। गुरुशिष्ययोः घनिष्ठः सम्बन्धो भवति। गुरुः छात्राणां मानसपिता भवति तर्हि छात्राः गुरोः मानसपुत्रा भवन्ति। श्रूयते च उदाहरणं पुत्रीयति शिष्यं पुत्रमिव आचरति , गुरुः पुत्रीयति।

8. भाषाज्ञानं सुष्ठु भवति शास्त्रेषु पूर्णपाण्डित्यमायाति।

वैदिकशिक्षयाऐहिकामुष्मिकफलप्राप्तिर्भवति। अस्यां शिक्षायां परापराविद्याभ्यांमानवस्य व्यक्तित्वस्य परिनिष्ठितोविकासः सम्पद्यते।एषैका परिपूर्णा शिक्षापद्धतिः विद्यते , या मानवस्य सर्वाङ्गीणविकासाय कल्पते। एवमत्र वेदेषुवर्णितशिक्षायाः स्वरूपं वैशिष्ट्यञ्च दिङ्मात्रं दर्शितम्।

**सन्दर्भाः**

1. पा.गृ.सू.२.४.३
2. यजु.२.३३
3. तैत्तिरीयोपनिषद्............ शिक्षाध्याय
4. भागवत-पु.११.१०.१२
5. मनु. २.१४०
6. निरुक्तम्

7. अथर्व. ११.५.१४
8. तद् विज्ञानार्थं स गुरूमेवाभिगच्छेत समित्पाणिं श्रोत्रियं ब्रह्मनिष्ठम् - मुण्डक –१.२.१२
9. अष्टाध्यायी ५.२.८४
10. निरुक्तम्
11. वेदान्तदर्शनम् १.१
12. गीता. ४.३९
13. मुण्डकोपनिषद् २.१.१३
14. मुण्डको. १.४.५
15. छान्दोग्य ७.१
16. अथर्व.१.१.२
17. अथर्व.१.१.४
18. अथर्व.१.१.३
19. छान्दोग्योपनिषद् ६.१२.१
20. छान्दोग्योपनिषद् ६.१३.२
21. छान्दोग्योपनिषद् १.१.२
22. बृहदारण्यकोपनिषद् ३.४.१
23. अथर्व-६.१३३.३
24. अथर्व – ६.१३३.४
25. अथर्व- ७.६३.२
26. अथर्व- ११.५.४
27. अथर्व. १.१.१
28. प्रश्नोपनिषद् २
29. गीता ४.४०
30. छान्दोग्योपनिषद् ६.१२.२
31. अथर्व -११.५.३

32. पारस्कर. २.२.१६
33. अथर्व – १.१.२
34. यजु. ३१.१८
35. विष्णु.पु.१.१९.४१
36. मुण्डकोपनिषद् २.२.४
37. मुण्डकोपनिषद् ३.२.९
38. मुण्डकोपनिषद् २.२.८

***

# वर्तमानशिक्षाव्यवस्थायां बौद्धशिक्षायाः योगदानम्

**Contribution of Buddhistic Education to the Present Educational System**

✍ *Dr. V S V Bhaskar Reddy**

भारतीयशिक्षेतिहासे शैक्षिकावसराणां प्रकल्पने बौद्धकालः स्वर्णयुग इति इतिहासकारैः कीर्तितं वर्तते। बौद्धकालीनशिक्षाव्यवस्थायां सर्वेषां बालकानां सर्वासां बालिकानाञ्च कृते समशैक्षिकावसराः प्रकल्पिता आसन्। जनानां वर्ण-वर्ग-जाति-लिङ्गादिनिरपेक्षं शैक्षिकावसराणां प्रकल्पनं कृतमासीत्। सामान्यतया बौद्धकाले प्रदत्ता शिक्षा , गौतमबुद्धेन तस्य अनुयायिनाञ्च विचाराणां सम्प्रत्ययादीनामनुसारं प्रदत्ता च शिक्षा बौद्धशिक्षेति व्यवह्रियते। शिक्षायारस्याः कालावधिः 6 BCतः 12 BCE पर्यन्तं भवतीति इतिहासकारैः मन्यते। अर्थात् भगवतः गौतमबुद्धस्य जन्मनाधारभ्य (563 BC) द्वितीयस्थानेश्वरसंग्रामपर्यन्तं (1192 BCE) भवति। वर्तमानकालीनशिक्षाव्यवस्थायाञ्च सर्वदा अनुप्रयोगणीयाः शिरोदार्ड्याः केचन सम्प्रत्ययाः विचाराः बौद्धशिक्षायां दृश्यन्ते। वर्तमानतकालीनशिक्षा-व्यवस्थायां तेषां सम्प्रत्ययादीनां क्रियान्वयनेन सर्वजनहिताय सर्वजनसुखाय च कारणं भजते , उत्तमोत्तमभारतीयसमाजस्य निर्माणम् अंशिकतया कर्तुं शक्यत इत्यत्र नास्ति लेशमात्रमपि सन्देहः। ते चसम्प्रत्ययाः यथा—

1. शिक्षायाः सार्वजनिकीकरणं वैश्वीकरणं वा (Universalisation of Education) -

बौद्धकाले मठ-विहरादिषु प्राथमिकशिक्षायै निर्दिष्टस्य पब्बज्जासंस्कारस्य , उच्चशिक्षायै निर्दिष्टस्य उपसम्पदासंस्कारस्य चायोजने तत्कालीन जनानां वर्णाधारेण जातेराधारेण लिङ्गाधारेण च न वा भेदभावाः न च प्रतिषेधाश्च परिकल्यते स्म। अर्थात् - बौद्धकाले मठ-विहरादिषु विद्यार्जनाय सर्वेषां बालकानां सर्वासां बालिकानाञ्च कृते अवसराः प्रकल्पिता आसन्। बौद्धकाले शिक्षायै सार्वजनिकावसराः प्रचलने आसन्। अर्थात् शिक्षा कस्यचित् व्यक्तिविशेषस्य वर्णस्य वर्गस्य जातेः वा पैतृकसम्पत्तिः नासीत्। इयं सार्वजनिकसम्पत्तिरजायत , तदर्थं सार्वजनिकरीत्या अवसराः परिकल्पिता आसन्। अनेन शूद्र-पञ्चमवर्णीयानां जनानां सर्ववर्णीयमहिलानाञ्च विद्यार्जनाय शैक्षिकावसराः समुपलभ्यन्ते , ते जीवने अग्रिमपथं प्राप्तुं योग्याः जायन्ते स्म। एवं साक्षरभारतस्य निर्माणाय शिलान्यासः बौद्धकाले एव जातो वर्तते। वर्तमानकालेपि बौद्धकालीन सार्वजनिक-

शिक्षाधिकारस्य क्रियान्वितश्चेत् बहुसंख्याकाः सामजिकवञ्चिताः जनाः महिलाश्च सर्वे छात्राः लाभान्विताः भवन्ति। जीवने अग्रिमपथं प्राप्तुं सर्वेषाम् अधिकाराः अवसराश्च समुपलभ्यन्ते , अनेन सर्वेषां जनानां हितं कल्याणञ्च जायते। उत्तमोत्तमसमाजस्य निर्माणाय शिक्षायाः सार्वजनिकीकरणं वैश्वीकरणं वा अनिवार्यं भवति , येन प्रत्येकं नागरिकः समाजिकजीवने अग्रिमपथं प्राप्तुमवसराः समुपलभ्यन्ते। दायित्व-आत्मनिर्भरादि गुणसहितस्य चोत्तमसमाजस्य निर्माणञ्च जायते।

2. निःशुल्कशिक्षा (Free Education) -

बौद्धकाले मठ-आराम-विहारादिषु छात्रेभ्यो निःशुल्कतया शिक्षा प्रदीयते स्म। विद्यार्जनाय छात्रेभ्यो लेशमात्रं नाममात्रं वा शुल्कं नैव स्वीक्रियते स्म , प्रत्युत भोजन-आवासादि सौविध्यानि निःशुल्कतया प्रकल्प्यन्ते स्म। तदानींतनकाले विद्यार्जनमेव भवति स्म , न तु विद्याक्रयः। वर्तमानकालीनशिक्षाव्यवस्थायां बहुत्र विद्याक्रयो जायमानो वर्तते , न तु विद्यार्जनं भवति। अनेन सम्पन्नानामेव विद्यार्जनाय शैक्षिकावसराः समुपलभ्यन्ते , ते एव जीवने अग्रिमपथं प्राप्तुं योग्याः जायन्ते। एतादृशदयनीयपरिस्थितिषु बौद्धकालीन निःशुल्कशिक्षेति (निःशुल्कशिक्षाधिकारः) क्रियान्वितश्चेत् निर्धन-दुर्बलादि सर्वे छात्राः लाभान्विताः भवन्ति। जीवने अग्रिमपथं प्राप्तुं सर्वेषाम् अधिकाराः अवसराश्च समुपलभ्यन्ते, अनेन सर्वेषां जनानां हितं कल्याणञ्च जायते।

3. सुव्यवस्थिता प्रणालीबद्धा च विद्यालयव्यवस्था (Institutionalization of Education) -

वर्तमानकालीनशिक्षाव्यवस्थायां बौद्धानां प्रणालीबद्धा विद्यालव्यवस्था महत्वपूर्णा योगदानविशेषा भवति। बौद्धानां काले शिक्षा केवलम् एकस्य व्यक्तिविशेषस्योपरि निर्भरा नासीत् , सा समिष्टि-व्यवस्थायां निर्भरा आसीत्। बौद्धकालीन शिक्षाव्यवस्थायां मठ-आराम-विहारादिषु सामूहिकरीत्या शिक्षा प्रदीयते स्म, न तु वैय्यक्तिकशिक्षणं क्रियते स्म। तदानींतनकाले सम्पूर्णं शिक्षणं प्रणालीबद्धानुसारं क्रियते स्म। प्रत्येकं कालांशे कः विषयः अध्येतव्यः , तं विषयं को शिक्षको अध्यापयते इति सुनिश्चितं भवति स्म।

4. आवासीय /आश्रमविद्यालयाः (Residential Schools) -

बौद्धकाले च मठ-आराम-विहारादिषु प्राथमिकशिक्षायै उच्चशिक्षायै च प्रविष्टाः श्रमणेराः भिक्षुणश्च न केवलं ज्ञानार्जनमेव कुर्वन्ति स्म , अपि च मठ-विहारादिषु गुरुणा सह , गुरोः परिवारेण सह सहपाठिभिस्सह सहजीवनं करणीयं भवति। अर्थात् गुरुशिष्याणां प्रत्यक्षसम्बन्धाः न केवलं

अध्यापनं कालं यावदेव सीमितं न भवन्ति , अपि च अहर्निशं(24*7) भवन्ति। अनेन प्रत्येकं दिने यातायाताय जायमानस्य समयव्यर्थतात्मुक्तिः जायते , सक्रियात्मकाधिगमस्योपरि सकारात्मकप्रभावश्च दृश्यते। स्वाध्यायसमये सञ्जनितानां सन्देहानां सद्यः निवृत्तये अवसराः , गुरोः निर्देशनप्राप्तये च मार्गाश्च समुपलभ्यन्ते , यतः सर्वे छात्राः गुरुभिस्सह मठादिषु वसन्त्येव । अनेन सक्रियात्मकाधिगमस्योपरि सकारात्मकप्रभावश्च दृश्यते स्म ।

5. महिलानाञ्च शिक्षाधिकारः

बौद्धानां काले प्राथमिकशिक्षायै निर्दिष्टस्य पब्बज्जासंस्कारस्य , उच्चशिक्षायै निर्दिष्टस्य चोपसम्पदासंस्कारस्यायोजने लिङ्गाधारेण न वा भेदभावाः न च प्रतिषेधाः प्रचलने नासन्। सर्वासां बालिकानां प्राथमिकशिक्षायै अधिकार आसीत्। बालिकाः भिक्षुणीभूत्वा उच्चशिक्षाग्रहणञ्च कर्तुमर्हन्ति स्म।

6. महिलानां पृथक् आवासव्यवस्था विद्यालयाश्च

बौद्धकालीनशिक्षाव्यवस्थायां बालिकानां कते पृथक्तया आवासाय मठाः (छात्रावासाः) निर्मिता आसन्। एवमेव अध्ययनाय च पृथक्तया आराम-विहारादयश्च संस्थापिता आसन्। एवं बौद्धकाले विशिष्टशिक्षाया उपरि प्रबलं प्राधान्यमददत्। अनेन बालिकानां वैय्यक्तिकतायाः भंगो नैव जायते, अपि च विषमलिङ्गाकर्षणात् दूरे च भवन्ति स्म।

7. मठे सामूहिकजीवनम् उत्तमोत्तमजीवनाभ्यासानां विकासश्च ( Development of Good habits)-

मठ-विहारादिषु निर्दिष्टानाम् आनुशासनिकनियमानां पालनं कुर्वन्नेव विद्यार्जनं करणीयं भवति स्म । यथा - निर्दिष्टानुशासनिकनियमानां पालनं ,ज्येष्टानां प्रति विधेयता , ज्येष्टानां वाक् पालनं, गुरुदेवं प्रति च विधेयता , स्वास्थ्यस्य शुद्धतायाः स्वच्छतायाश्च पालनं , प्रकृतिं प्रति पूज्यभावः, नैव कस्यचिदपि निन्दा अपमानं वा , न वा द्वेषशीलता न च क्रोधशीलता , परस्पर-सहयोगः, सामूहिकजीवनमित्यादयः । सुरा-सोम-मद्यादि मादकद्रव्यानां प्रयोगो प्रतिषेधाः भवन्ति स्म। सामाजिकतया शारीरिकतया च अनभीष्टगुणानां परित्यागः , अभीष्टानां स्वीकारश्च जायते। फलतः छात्राणां व्यवहारे उत्तमोत्तजीवनाभ्यासानां विकासो जायते ।

7. शिक्षकपदनियुक्तये मुक्तता -

बौद्धकालीनशिक्षाव्यवस्थायां न केवलमध्ययनाय सर्वेषामवसाराः प्रकल्पिताः अपि च अध्यापनाय सर्ववर्णीयाजनानाञ्च कृते अवसराः प्रकल्पिता आसन्। अर्थात् शिक्षपदे नियुक्तिः जन्माधारेण वर्णाधारेण लिङ्गाधारेण च न भवति स्म।

8. बहूनां शिक्षणविधीनाम् अनुप्रयोगः

बौद्धकालीन मठ-विहारादिषु शिक्षणवेलायां बहूनां शिक्षणविधीनाम् अनुप्रयोगः क्रियते स्म। शिक्षणे सैद्धान्तिकपक्षस्य व्यावहारिकपक्षस्य चोपरि प्राधान्यं प्रदीयते स्म। अत्र शिक्षणं केवलं मौखिकी नासीत्, शिक्षणे प्रत्यक्ष-वादविवाद-वार्तालाप-संगोष्ठी-देशाटनादि विविधशिक्षणविधीनाम् अनुप्रयोगाः क्रियन्ते स्म।

9. संक्रामकरोगग्रस्तानाम् अपराधिनाञ्चोपरि अङ्कुशाः

बौद्धशिक्षायां संक्रामकरोगग्रस्तानाम् अपराधिनाञ्च कृते प्रवेशाः तात्कालिकतया प्रतिषेधिता आसन्। संक्रामरोगात्मुक्त्यनन्तरमेव अपराधात्वात् मुक्त्यनन्तरमेव च प्रवेशाः प्रदीयन्ते स्म। शिक्षव्यवस्थायां निर्मला आनीयन्ते स्म।

10. सामाजिकगुणानां विकासः (Social development) -

अध्ययनकाले सर्वे छात्राः मठ-विहारादिषु सहपाठिभिस्सह सामूहिकजीवनं करणीयं भवति । अनेन अन्येषां छात्राणां व्यवहारे दृश्यमानानां उत्तमोत्तमाभ्यासादीनाञ्च स्वीकरणाय चावसराः समुपलभ्यन्ते स्म। छात्राणां व्यवहारे सहयोगभाव-सहनशीलता-व्यवहारशीलतादि सामाजिकगुणानां सुविकासो जायते, अन्यैः छात्रैस्सह समायोजने सामञ्जस्यसम्पादने च कुशलतां प्राप्नुवन्ति , फलतः व्यवहारो गतिशीलको भविष्यति , समाजे राष्ट्रे च उत्तमोत्तमनागरिको भवितुमर्हति च । वर्तमानकालीनशिक्षाव्यवस्थायां दृश्यमानस्य छात्रव्याकुलतायाः असन्तोषस्य वा दूरीकरणे अयमत्यन्तमहत्वपूर्णो भवति।

11. गुरु-शिष्ययोः मध्ये आदर्शसम्बन्धाः ( Ideal Relations between Teacher & Student) -

बौद्धकालीनशिक्षाव्यवस्थायां दृश्यमानाः गुरुशिष्यसम्बन्धा उत्तमोत्तमाः , सम्पूर्णविश्वे अस्तित्वे प्रचलने वा विद्यमानशिक्षाव्यवस्थानाम् आदर्शाश्चासन् । तदानींतनकाले गुरु-शिष्ययोः मध्ये प्रत्यक्षसम्बन्धाः , अविनाभावाः अन्योन्याश्रिताश्च सम्बन्धाश्चासन् । शिक्षाव्यवस्था

गुरुशिष्ययोर्मध्ये अवरोधकी न भवति स्म , यतः गुरुवः शिष्याश्च मठादिषु वसन्ति स्म। एवं सहवासकारणेन गुरुशिष्ययोर्मध्ये सांवेगिकसम्बन्धानां विकासो जायते स्म । गुरुः स्वशिष्येण सह पुत्रवत् , शिष्याश्च गुरुणा सह पितृवत् व्यवहरन्ति स्म , अर्थात् गुरुशिष्ययोर्मध्ये पिता-पुत्रसम्बन्धाः विलसिता आसन। वर्तमानकालीनशिक्षायां सम्प्रत्ययोयम् अवश्यं क्रियान्वतो भवेत् , यतः वर्तमानशिक्षाव्यवस्थायां केचन शिक्षकाः(पुरुषाः महिलाश्च) छात्रैस्सह रावणवत् , दुःशासनवत्, कीचकवत् , शूर्पनखावत् च व्यवहरन्तीति दैनन्दिनपत्रिकासु वार्ताः सर्वैः ज्ञाता एव । बौद्धकालीन आदर्शसम्बन्धा इति सम्प्रत्ययोयं क्रियान्वितश्चेत् उत्तमोत्तमभारतीयसमाजस्य निर्माणं सुसाध्यञ्च शीघ्रमेव सम्भवं भवति ।

12. लौकिक-आध्यात्मिकपाठ्यक्रमयोश्च प्राधान्यम्

बौद्धानां पाठ्यचर्याया अन्तर्गते धार्मिकानां लौकिकानाञ्च विषयाणां कृते समप्राधान्यं यच्छन्ति स्म। अनेन छात्राणां व्यवहारे नैतिक-चारित्र्यक-धार्मिक-मानवीयगुणानां विकासो जायते स्म। अर्थात् संतुलितव्यक्तित्वस्य विकासाय सोपनवत् निर्मिता आसीत् पाठ्यचर्या।

13. जनभाषा शिक्षणमाध्यमा

बौद्धशिक्षाव्यवस्थायाम् अध्यापनाध्ययनाय जनभाषायाः पालीभाषायाः प्रयोगः क्रियते स्म। अवश्यकते सति अन्यक्षेत्रीयभाषाणाञ्च प्रयोगाः क्रियन्ते स्म। शिक्षणे जनभाषायाः प्रयोगेण छात्राणां व्यवहारे सरलतया अधिगमो जायते। फलतः कण्ठस्थीकरणात्मुक्तिः जायते स्म।

14. धार्मिकजीवनम् (Religious Life) -

बौद्धकाले सांसारिकबन्धनेभ्यो मुक्तये छात्रेषु धार्मिकभावनायाः जागरणं क्रियते स्म । मानवानां मूलप्रवृत्तौ प्रच्छन्नतया विद्यामानस्य पशुप्रवृत्तेः संस्करणं , तत्स्थाने मानवीय-सामाजिक-सत्यनिष्ठादि मूल्यानां विकासश्च केवलं धार्मिकमूल्यानां विकासेनैव जायत इति जगद्विदितसत्यं भवति। जीवने धार्मिकमूल्यरहितजीवनं नाम पाशविकजीवनमेव भवतीति कथने नास्त्यतिशयोक्तिः। अन्तेवासिनां व्यवहारे धार्मिकभावनानां विकासेन ते संस्कारयुक्ताः नागरिकाः भविष्यन्ति स्म। लोकतान्त्रिकभारते गुणोयं सर्वदा स्वागतार्ह एव भवति।

15. सरलजीवनम् उच्चविचाराश्च (Simple life & High level thinking) -

बौद्धाकालीन मठ-विहारादिषु अध्ययनकाले छात्राः भिक्षुवश्च निराडम्बरम्

